भगवद्भर्तृहरिविरचितं

वाक्यपदीयम्

तत्र

हर्य्युपज्ञवृत्तिसनाथं वृषभदेवटीकासंक्षेपसंयुतं

प्रथमं काण्डम्

तच्च

होशयारपुरमण्डलान्तर्गताऽहियापुराभिजनेन लवपुरीये श्रीदयानन्दकालेजे
संस्कृतसाहित्याध्यापकेन एम्. ए. एम्. ओ. एल्. इति विरुदभाजा
व्याकरणद्वादशाध्याय्या निर्मात्रा श्री गान्धिचरितस्य प्रणेत्रा
श्रीरामकृष्णतनुजनुषा श्रीचारुदेवशास्त्रिणा बहुकोश-
संवादेन संशोध्य पाठान्तरैः संयोज्य विविध-
विषयावगाहिन्या भूमिकया समुद्भास्य
कतिपयीभिः सूचिकाभिश्चावद्योत्य
व्याख्यान्तरैष्टिप्पणैश्चोपबृंहितम्।

तदेतत्
लवपुरे स्थितिमत्या श्रीरामलालकपूरन्याससमित्या वेदोद्धारव्यसनिन्या
संस्कृतसाहित्यहितप्रयुक्तया हिन्दीभवननाम्नि मुद्रणयन्त्रालये
संमुद्र्य प्राकाश्यं नीतम्।

प्रथमं संस्करणम्] विक्रमवत्सराः १९९१ [मूल्यं रूप्यकपञ्चकम्

P. S. Sharma

Pages 1—32 of the text printed by Khazanchi Ram Jain at the Manohar Electric Press, Lahore, pages 33—136 printed by Shrimati Sushila Devi at the Vidya Prakash Press, Lahore and title, preface, introduction and appendices printed by D. C. Narang at the Hindi Bhawan Press, Lahore and published by L. Rup Lal Kapur for L. Ram Lal Kapur Trust Society, Anarkali, Lahore.

* The Private Secretary to H. H. the Maharajah of Travancore, however,

PREFACE.

For the right understanding of a text, the correctness of it is the minimum that is needed. As it is, it is denied to us in the case of so many of our Sanskrit texts. It is hardly necessary for me to say that the Benares edition of the Vákyapadíya denies us this minimum. This work is so ill-done that it does not deserve to be called an edition, much less a critical one. A critical edition of the Vákyapadíya, therefore, has been a long-felt desideratum. The paucity of manuscript material, however, damped the ardour of many a keen scholar. Burnell tells us that Kielhorn cherished the idea of editing the Vákyapadíya; but it appears that he was discouraged in this pursuit of his by the scantiness of the then available materials.

Search For MSS.

It was in the beginning of the year 1925 that my esteemed friend P. Bhagavad Datta suggested to me on his return from the Third Session of the All-India Oriental Conference held at Madras, that I should undertake a critical edition of the Vákyapadíya and its commentaries. The Bhandarkar Oriental Research Institute, Poona agreed to undertake the publication of the work, when ready. I then set about a diligent search for the MSS. The Institute helped me, in the initial stages, in securing for me at my own expense, transcripts or the original MSS. of the Vákyapadíya deposited in some of the Public Libraries, both Indian and foreign. I myself visited the south during the summer vacation of 1927. I collated my copy of the Tanjore Ms. of the Vṛtti Samuddeśa with a Ms. at the Government Oriental Library, Madras. In Malabar, I visited Trippunithura (Cochin) and Trivandrum. At the former place, Principal K. Ráma Pisharoti offered to supply me with a Transcript of the whole of the Vṛtti Samuddeśa. At Trivandrum I met with little encouragement. P. Sámba Śiva Śástrí, curator of the Government Publication Department, when requested, declined to help me either with the MSS. in his possession or their transcripts on the ground that he had himself undertaken the edition of the Prakírṇa-Prakáśa (commentary on Káṇḍa III of the Vákyapadíya). The MSS. with this department are said to be reliable and in a fairly good condition.
* The Private Secretary to H. H. the Maharajah of Travancore, howe-

very kindly agreed to supply a copy of a Ms. of the text of the Vákyapadíya at the Palace Library. Here too, the same niggardly spirit was betrayed. Only the first two Káṇḍas were transcribed for me and Káṇḍa III was reserved for the exclusive use of the privileged curator.

Similarly, I went to Jammu and did collation-work there at the Raghunath Temple, for the authorities would not loan out the MSS. in their possession. Anxious as I was to make use possibly of all available MSS. I have left no source untapped. Public libraries in India and outside, barring Trivandrum and Alwar, either lent their original MSS. or supplied transcripts or rotographs. Friends like Mr. R. A. Shastrý, the well-known manuscript collector, also made a search for the MSS. and acquired a few. The acquisition of MSS. or Transcripts, has entailed a heavy personal expense, which, however, I do not grudge in the least.

Discovery of Bhartṛhari's own Vṛtti.

A year before I was at Madras, I was fortunate enough to secure a loan of the two MSS. of the commentary on Káṇḍa I from the Asiatic Society of Bengal. I then undertook to compare this commentary with the one published long ago at Benares. The *variae lectiones* seemed to be too numerous to be noted between the lines and on the margin. The Bengal MSS. being very corrupt, but very comprehensive, it appeared at first sight that the commentary contained in these codices was an amplification, though in its present form, a hopeless muddling up, of the clear and concise commentary printed at Benares. I had, therefore, to discontinue the collation already undertaken and prepared a copy of one of the MSS. and noted the important variants noticed in the other.

It was at the Government Oriental Library, Madras, that I discovered that the Bengal MSS. contained a commentary on Kaṇḍa I by no other person than the author of the Vákyapadíya, the great Bhartṛhari himself. I examined at the Library a Ms. of a commentary by Vṛṣabhadeva already noticed by Mr. T. R. Chintamani. Mr. Chintamani could not make out the exact nature of the relation in which this commentary stood to the publication at Benares. He jotted down a few comparisons and hazarded certain conjectures. Of course, he could not do better. When I compared this commentary by Vṛṣabha with the commentary as presented in the Bengal MSS., I discovered that the latter formed a text for the former, Vṛṣabha, it may remarked in passing, takes no notice of the shorter Benares commentary.

Preparation of the Press-Copy.

I prepared a press-copy of Kánda II with Puṇyarája's commentary and extracts bearing on the Vákyapadíya Kárikás for which I had to ransack the entire later Sanskrit literature. This I presented to the Institute, as early as December, 1928. The Executive Council approved it in a meeting held in the last week of January, 1929. Next I set about preparing a press copy of Káṇḍa I with Hari's own commentary and Vṛṣabha's exposition of it. Unfortunately, the Ms. of Vṛṣabha's exposition breaks off in the middle, at the 82nd Káriká. I thought it best to incorporate only important extracts from Vṛṣabha's Tíká. I submitted this Press-copy too to the Institute, accompanied by a request that the Institute would kindly see its way to undertake the printing of the first two Káṇḍas. The Executive Council again met, reviewed the work, but resolved that it could not begin printing, unless the Press-copy of the entire work was submitted. Both these Press-copies were thereupon returned to me.

I then engaged myself in the collation of the MSS. of the commentary by Heláràja, and succeeded in effecting a distinct improvement on the readings as contained in the Benares publication. The number of MSS. availed of is pretty large, coming up to 10. Every one of these MSS. is fragmentary; none of them gives us a complete commentary on all the 14 sections of Káṇḍa III. But this by itself does not belittle their value. Indeed one complete Ms. of the entire Prakírṇa-Prakáśa would be a huge pile of leaves. But I was not quite satisfied with the results of the detailed collation, and therefore could not prepare a Press copy and submit it, though Dr. Belvalkar wrote to me in a letter of his advising me to be content with what had been achieved and leave something for the future editor. Though it was a bit complimentary to me, I could not place before scholars a work which admitted of improvement at so many places, left a number of readings obscure and had *lacunae* at several places.

Retouching of the Vṛtti.

When my mind was a little disengaged from the third Káṇḍa and its commentary, I learnt of the discovery of two more MSS. of Hari's Vṛtti and a complete Ms. of Vṛṣabha's Tíká in the Madras Presidency. I procured transcripts of these MSS. from the Madras G. O. Library, and Adyar Library and from Mr. M. Ráma Kṛṣṇa Kavi M. A. Mr. Kavi was so very kind that he sent me the printed forms of Hari's

Vṛtti and a faithful copy of the unprinted portion. With the help of this new material I revised thoroughly the final form of the Vṛtti with me and accomplished a good deal. The Adyar transcript of Vṛṣabha's Tíká, though very carelessly done, (as is the case usually with copies supplied by the Adyar Library) still helped a litile in determining the readings of the Vṛtti.

Now that a thoroughly revised and enlarged Press-copy of the first Káṇḍa was ready, I found my patience breaking and could not wait. The Institute would not undertake the printing, unless the complete work were submitted. I therefore knocked at other doors. Messrs. Mehar Chand Lachhman Das, well-known Sanskrit Publishers at Lahore agreed to publish the work. Printing began. Progress was very slow. The Press was busy turning out works more important from the Publishers' stand-point. Then came a hitch and we parted company. Printing was suspended. Happily for me, P. Brahmadatta offered help. Actuated by a noble desire to serve the cause of Sanskrit literature, he tried to arrange for the publication of this work and succeeded.

Ram Lal Kapoor Trust Publication

It was at the instance of P. Brahmadatta that members of the Ram Lal Kapoor Trust Society, Lahore agreed to publish the present edition. The first Káṇḍa, therefore, is appearing as their publication. The second Káṇḍa is still in the press. It may take six months more. This Trust Society has been publishing pamphlets and booklets on religion only for sometime past. In acceding to my request, it went out of its way and did me a favour for which I cannot thank it adequately.

Manuscript Material availed of.

In the preparation of the present edition of the First Káṇḍa I have used no less than 20 manuscripts and Transcripts. I give below brief descriptive notes of each one of them :—

MSS. of the Text.

क १—A Ms. of the Central Library, Baroda, No. 12656. Script Devanágarí. Uses पृष्ठमात्रा. About 500 years old. Incomplete. Folios 6 and 7 missing. 25 Folios in all. Worn out at the corners and patched up. Has 12 lines to a page.

क २—A Ms. of the India Office Library No. I-0-954 (E. 706). Script Devanágarí. Named वाक्यप्रदीप. Copied in the year 1833 of the Vikrama era. Contains 63 folios. Has 11 lines on the average to a page of 11"×4". Very corrupt. Full of omissions. These omissions perhaps led Colebrook to remark on the outer cover of the Ms. : "This is different from the Harikáriká and is not Bhartrhari's work, but compiled from it."

क ३—A Ms. of the text of the Vákyapadíya, Kánda I and a commentary by Punyarája on Kánda II, No. 314/1875-76 of B. O. R. Institute, Poona. Script Devanágarí. Has a modern look. Incorrect. 164 folios. Has 9 lines to a page of 10"×3½".

क ४—A Ms. (Kánda I only) of the Sanskrit College, Benares, No. 111. Script Devanágarí. Incorrect at places. Only 9 folios. Agrees with क १ and ख wherever it differs from the Benares edition.

क ५—A Ms. of the Sanskrit College, Benares, No. 112. Script Devanágarí. Incomplete. Breaks off after the 10th Káriká of Kánda III. At places, its readings agree with those of क १.

क ७—A rotograph of a Berlin Ms. Script Devanágarí. A very beautifully written Ms. Complete. Readings inferior. Now deposited in the Punjab University Library, Lahore; Acc. No. 6071. After the Second Kánda, the Ms. has the colophon:

इति भगवद्भर्तृहरिकृते वाक्यपदीये द्वितीयं काण्डम् । समाप्ता वाक्यपदीयकारिका.

In this it follows क १.२ and ख १.२.३.

ख १—A Ms. of the Central Library, Baroda, No. 12698. Script Devanágarí. Folios 52. Second leaf missing. Complete and mostly correct.

ख २—A Ms. of the Mysore G. O. Library, No. C. 1325. Script Devanágarí. Copied in the year 1896 of the Vikrama era. 90 folios. Complete and mostly correct. Called वाक्यप्रदीप. Closely follows ख १. Notes in Kándas II and III readings adopted by the commentators.

ख ३—A Ms. of the Royal Asiatic Society of Bengal, Calcutta, No. 8085. Script Devanágarí. Almost correct. Copied in the year 1758 of the Vikrama era. Has 2—88 folios, with 9 lines on a page of 10¼"×4½". Closely coincides with ख १.२. Like ख २ it also notices a number of variant readings.

ग १—A Transcript belonging to the India office Library, London, numbered Burnell 307. Script Malayalam. Copied very beautifully. Complete and mostly correct. Pages 200. Follows क२ in its additional Ślokas. Has a number of finite verbs peculiar to itself. Supplies the lacunae in other MSS. The colophon at the end reads as—

इति श्रीभगवत्भर्तृहरिवृषभमहावैयाकरणपादविरचिते वाक्यपदीये प्रकीर्णकनाम्नि पदकाण्डे वृत्तिसमुद्देश्चतुर्दशः । शुभमस्तु । श्रीरस्तु ।

ग २—A transcript in Devanágarí of a Ms. No. 48 of 1919—24 in Malayalam script, of B. O. R. Institute, Poona. Consists of 12 half sheets of foolscap paper written on one side. Incomplete. Goes up to the 6th Káriká of Kánda II. Incorrect at places. Gives some very superior readings, not found elsewhere. The original Ms. is very old.

ग ३—A Transcript in Devanágarí of a Ms. deposited in the Palace Library, Trivandrum. First two Kándas only. The original Ms. contains all three Kándas. Script of the original Malayalam. Transcription ill done and comparison meagre.

ग ४—Collation of my copy with a Ms. of the G. O. Library, Madras, done for me by the Pandits of the Library. Readings generally agree with ग १. and ग ३.

MSS. and Transcripts of the Commentary.

घ १—A Ms. of Harivrsabha's commentary on Kánda I, No. III C. 60 of the Asiatic Society of Bengal, Calcutta. Originally belonged to the college of Fort William. Script Devanágarí. Folios 40. Complete but corrupt. Notices variants in between the lines. Basis of the variants designated here as घ २. The colophon at the end runs as—

इति श्रीहरिवृषभमहावैयाकरणविरचिते वाक्यप्रदीपे आगमसमुच्चयो नाम ब्रह्मकाण्डं समाप्तम् ।

ङ —A Ms. of Harivrsabha's Commentary on Kánda I, No. III C. 61 of the Asiatic Society of Bengal, Calcutta. Originally belonged to the College of Fort William. Complete, but corrupt. Badly written. Folios 60. Closely agrees with घ, except that it does not notice variants. Copied in the year 1769 of the Vikrama era. Has the same colophon as घ. It reads वाक्यपदीये instead of वाक्यप्रदीपे which is merely a scribal error. There is no word for commentary in the colophon.

D [6] **घ १**—A Transcript in Devanagari of Vṛsabhadeva's exposition of Harivṛsabha's Commentary supplied by the G. O. Library, Madras. Incomplete. Pages 136. It breaks off at Káriká 82. Mostly correct. Carefully prepared. Now deposited in the Punjab University Library, Lahore; Acc. No. 6139.

D [5] **घ २**—A Transcript in Devanagari of Vṛsabhadeva's Exposition of Harivṛsabha's Commentary supplied by the Adyar Library, Madras. Complete. Pages 607. End missing. It agrees with **घ १** in the portion common to both. Apart from a large number of lacunae, the work is ill done. It is a perfunctory performance, and does little credit to the Adyar Library. Now deposited in the Punjab University Library, Lahore; Acc. Nos. 6650,6661.

C [6] **ङ** —A Ms. of a Commentary on Káṇda I by Harivṛsabha, of the Sanskrit College, Benaras, No. 113. Script Devanagari. Look modern. Copied in the year 1934 of the Vikrama era. Folios 44. It gives the Commentary as printed and published at Benares. Very closely agrees with the printed edition. No other Ms. of this Commentary is known to be in the possession of any Public Library, Indian or Foreign. It calls the Commentary **वाक्यपदीयप्रकाश.**

B [8] **ट** —A Transcript in Devanagari of a Ms. of Harivṛsabha's Commentary on Káṇdas I and II supplied by the G. O. Library, Madras. Covers 182 half-sheets of foolscap paper. A great many lacunae, the Ms, being ill-preserved, old and worm-eaten. End missing. At places very corrupt. Now deposited in the Punjab University Library, Lahore. The same colophon as in **घ, ङ.**

ठ —Printed sheets of Harivṛsabha's Com. up to Sloka 72 and a true copy of the rest of the Ms. supplied to me so very kindly by Mr. M. R. Kavi, M. A. Corrupt at places, but a better preserved Ms. than **ट.** Usually agrees with **ट.** The same colophon as in **घ, ङ, ट.**

When the present work was ready for publication, only the Preface being in the press, I received a letter from Mr. Kavi saying inter-alia that he had an independent copy of Vṛsabhadeva's Ṭiká with him. I regret I could not know of it earlier.

Besides these MSS. I have consulted, for purposes of textual criticism and elucidation, a large number of works which quote from the

Vákyapadíya and interpret it. The Vákyapadíya is one of the most widely quoted Sanskrit writings. Almost all branches of classical Sanskrit literature : Grammar, philosophy, rhetoric, philology etc. are rich with quotations from it. Some of the works which have furnished a beautiful exposition of a number of Kárikás are : Tattva Saṃgraha, Nyáya kaṇiká, Syádváda-Ratnákara, and Gopáliká. Nyáya-Mañjari also explains a few verses quoted here.

The Vákyapadíya is the only extant work which preserves quotations from the Saṃgraha of Vyáḍi. I have brought together these quotations found both in the text and Vṛtti of Káṇḍa I in an appendix at the end. I have added a few more appendices ; the one on important words will be found to be very useful and full of interest.

The reading of proof-sheets has been done very carefully ; still some misprints have crept in which are noticed at the end.

It is my pleasant duty to acknowledge here a deep debt of gratitude I owe to M.M. Pt. Mádhava Shastri Bhandari, Head Pandit Oriental College, Lahore, for the help he rendered me in the preparation of this edition. Wherever the text was very obscure, and I felt diffident or my judgment failed me, I approached him for suggestions which he offered me most gladly. My thanks are also due to my teacher Dr. A. C. Woolner, and L. Labbhu Ram Librarian of the Punjab University Library, who most kindly helped me with transcripts and rotographs of the MSS. of the Vákyapadíya which they procured for my use at a heavy expense. But for their encouragement and hearty co-operation, I could not have achieved what little I have.

D-A V. College,
LAHORE :
12th November, 1934.

CHARUDEVA SHASTRI.

ओं नमः परमात्मने ।

उपोद्घातः

वैयाकरणनिकाये टीकाकार इति समाख्यां गतः सुकृतिभिः कृतिभिः परमादरेण परिगृहीतः प्रतीतानां न्यासकारप्रभृतीनामनेकेषां व्याकर्तॄणामुपजीव्यतामितः पतञ्जलिरिव प्रतीक्ष्यः प्रमाणभूत आचार्य्यस्तत्रभवान् भर्तृहरिः कस्यां वेलायां कतमस्मिंश्च भूभागे सम्बभूवेति विनिश्चित्य वक्तुं न पारयामः । ख्रिस्ततः सप्तम्यां शताब्द्यां सौगतं मतमातिष्ठन् भर्तृहरिरवर्तिष्टेति चीनयात्रिकस्य इत्सिङ्गाख्यस्य वचसि प्रत्ययिता इतिवृत्तविदः । अत्रैवं प्रत्यवतिष्ठामहे—भूतार्थ एवोद्गीर्णः स्यादित्सिङ्गेन मृषोदितं वा तेनेति मीमांस्यं तद्वचो न प्रमाणकोटिमाटीकते । ऐतिहासिकैः प्रमाणीकृतं तद्वचः कथमप्रमाणमिति चेत् । मैवम् । इत्सिङ्गो हि नाप्तः, तत् कथमस्योक्तिरनाशङ्कितं प्रामाण्यमियात् । कथमनाप्त इति चेत् । उच्यते । वाढमनाप्तः । यत्तेन प्रण्यगादि वाक्यपदीयस्य कर्ता तथागतमतमास्थितो भिक्षुत्वं ग्राहं ग्राहं व्यजहादिति तन्नितान्तमसत् । वाक्यपदीयकारिकाभिरेव तस्य वैदिकत्वस्य त्रय्यन्तवेदित्वस्य चात्रैवाग्रे प्राञ्जलं प्रसाधितत्वात् । यः खल्वेकत्र प्रमादादिनाऽन्यथाचष्टे परेण वा प्रतारितोऽपरीक्ष्यैवार्थं प्रस्तुवीति तस्य वचोऽपरत्र कथमुपादेयं स्यात्सुधीभिर्बाधसंभवतौल्यात् । अत इत्सिङ्गस्य लपितं सांशयिकं निर्णयसव्यपेक्षम् । भर्तृहरिर्नाम विक्रमादित्यभूपतेः सोदर्य इति प्रथते सम्प्रदायः । परं येषां विपश्चितां विक्रमादित्य एव शशशृङ्गायते शिलालेखैरशंसनात्, कुतस्ते तद्भ्रातृसद्भावं प्रतीयुः । नामूला जनश्रुतिरिति न्यायेनास्य सम्प्रदायस्य समूलत्वसंभावनायामप्युपोद्बलकमन्तरा नैनमास्थातुं सहामहे । कतमं भरतखण्डैकदेशं स्वजनुपालञ्चकार हरिरिति कानि वाऽस्यावदानानीति पृच्छा त्वद्याप्यदत्तोत्तरा राजते ।

हरिकृतयः

अथ विपश्चिदपश्चिमः किं किं ग्रन्थरत्नं जग्रन्थेतीदानीमालोच्यते । वाक्यपदीयं त्रिपदीत्याख्या भाष्यटीका वाक्यपदीयप्रथमद्वितीयकाण्डयोर्वृत्तिश्चेति व्याकृतिविषयाः कृतयः समुपलभ्यन्ते । वृत्तिरेव क्वचिद्विवरणमित्यपि संज्ञायते

वृषभदेवादिभिष्टीकाकृद्भिः । अनेन महावैयाकरणेन पाणिनीयाष्टकेऽपि काचिद् व्याख्याऽलेखीति शक्यतेऽनुमातुम् । तथा हि । उञि च पदे (८।३।२१) इति सूत्रं विवृण्वन्मैत्रेयः स्माह—भर्तृहरिणा च नित्यार्थतैवास्योक्ता । तथा च भागवृत्तिकारेण प्रत्युदाहरणमुपन्यस्तम् इति । ङः सि धुट् (८।३।२९) इति सूत्रव्याख्यायामपि भर्तृहरिमतमित्थमुपन्यास्थत्—भर्तृहरौ तु मण्डूकप्लुतिन्यायेन ङमो ह्रस्वादित्यत्रैवानुवृत्तिः पदग्रहणस्य दर्शितेति ।

दुर्घटवृत्तिकारोऽपि नोदात्तोपदेशस्य मान्तस्यानाचमेः (७ । ३ । ३४) इतिसूत्रवृत्तौ भर्तृहरिमतमुदाहरति—यथालक्षणमप्रयुक्त इत्युपराम उद्याम इत्येव भवतीति भर्तृहरिणा भागवृत्तिकृता चोक्तमिति । मैत्रेयेण शरणदेवेन च निरुक्तं हरिमतं कुत उदहारि । न हि भाष्यटीकात उद्धारः संभवतीति मन्महे । तस्याः त्रिपदीत्वात् । महाभाष्यस्य प्रथमायाः पादत्रय्या एव सा टीकेति तस्या अन्वर्थं नाम । योऽयं भागवृत्तिकारस्य भर्तृहरेश्च संवादं विवादं वा प्रदर्शयन्साहचर्येण निर्देशः सोऽपि नाम प्रत्यनीकतां प्रतिस्पर्धितां वा तयोः प्रत्याययन् समाने विषये प्रवृत्तिं पिशुनयति । भागवृत्तिरिति ह्यष्टाध्याय्या व्याख्येति विख्यातम् । ततोऽवस्याम इह परामृष्टः समकक्ष्यतया च विवक्षितः श्रीहरिग्रन्थोऽप्यष्टाध्यायीव्याख्यानरूप एवोपपद्यत इति ।

केचित्तु भर्तृहरिणा सकलं भाष्यमभाषीति पश्यन्ति । वयन्तु सम्प्रति समुपलभ्यमानस्य प्रथमपादीयसप्तपञ्चाशत्तमसूत्रावधि वर्त्तमानस्य टीकाग्रन्थस्य परिमाणं यावदालोचयामस्तावन्नास्य पारक्यस्य दर्शनस्योपपत्तिं पश्यामः, अभ्युपगम्यापि त्रिपदीति समाख्याया हेलाराजवर्धमानप्रमुखैर्विशेषज्ञैर्वेदिताया निर्वाहं नाकलयामः ।

अपरे तु भर्तृहरिणा सकलेऽपि भाष्ये पादैस्त्रिभिरुपनिबद्धा टीकाऽऽरचीति मन्वाना नात्र कामप्यनुपपत्तिमीक्षन्ते । तदिदमापातरमणीयम् । स्यादेतत् यदि केवलेन पादशब्देन क्वचिद् ग्रन्थभागा अभिलपिताः स्युः । न चैतदस्ति । न चास्माभिरयमर्थो दृष्टचर इति नोरीकुर्मः । किं च । भर्तृहरिर्वाक्यपदीयप्रकीर्णकयोः कर्ता महाभाष्यत्रिपाद्या व्याख्याता चेति वर्धमानवचोऽप्यस्मदनुगुणम् । अत्र त्रिपादी भाष्यगता व्याख्येयोक्ता न तु व्याख्यानगतेत्यलं विभ्रमभ्रंशाय । प्रतीतायाः नीत्यादिविषयिण्याः शतकत्रय्या अपि हरिरेव कर्तेत्यभ्युपेयते । वयमपि साधकबाधकप्रमाणविरहादभ्यन्तरा लोके लोकमतमाश्रयामः । भट्टिकाव्यस्यापि रचयिता भर्तृहरिरिति तट्टीकाकृतः प्रायशः प्रतिजानते । जयमङ्गलां मुक्त्वा सर्वास्वन्यासु टीकास्वयमर्थः कण्ठेनोदितः । जयमङ्गलायां तु नैष प्रत्युदितः

केवलमेवं नैवं वेति विशिष्य नोक्तम्। अत्रापि वयं टीकाकृतामनुकूला भूयः परीक्ष्यमेतदित्येव प्रतीमः।

एवं विविधानां विषयाणां निबन्द्धाऽनेकासां विद्यानां पारदृश्वाऽयं भर्तृहरिर्ब्रह्मसूत्राण्यपि व्याकरोदिति सिद्धित्रयस्य निर्मातुर्यामुनाचार्य्यस्य वचनप्रामाण्यादवसीयते। एवं ह्याह यामुनाचार्य्यः —.........तथापि आचार्य्यटङ्क-भर्तृप्रपञ्च-भर्तृमित्र-भर्तृहरि-ब्रह्मदत्त-शङ्कर-श्रीवत्साङ्क-भास्करादिविरचितसितासित-विविधनिबन्धश्रद्धाविप्रलब्धबुद्धयो न यथान्यथा च प्रतिपद्यन्त इति तत्प्रतिपत्तये च युक्तः प्रकरणप्रक्रम इति। एष चार्थो वाक्यपदीयप्रतिपाद्यप्रतिपादनदिशा सुतरां समर्थ्यत इति प्रमाणान्तरानपेक्षी।

किमयं भर्तृहरिर्बौद्ध उत वैदिकः।

भर्तृहरिर्बुद्धमतानुगो न वैदिक इति सम्प्रति सम्प्रतिपद्यन्ते पुरावृत्तविशारदाः। इदं च तेषां मतमितिसङ्गवचनव्यपाश्रयमिति पूर्वमवोचाम। अग्राह्यतां चास्याचकथाम। यः खलु।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥१।१॥
एकमेव यदाम्नातं भिन्नशक्तिव्यपाश्रयात्।
अपृथक्त्वेपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥१।२॥
प्राप्त्युपायोनुकारश्च तस्य वेदो महर्षिभिः।
एकोप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥१।५॥

इत्यादिकारिकाणां कर्ताऽनादिनिधनलक्षणस्य शब्दमयस्याक्षरस्य सकलप्रपञ्चविवृत्तिहेतुभूतस्य ब्रह्मणः प्रतिपत्ता प्रतिपादयिता च स कथङ्कारं संभिन्नबुद्धिः परिवादकः स्यात्। यश्च तस्य ब्रह्मणः प्राप्त्युपायं महर्षिभिराम्नातं वेदमाह स वेदबाह्यो भवेदिति नावकल्पयामः। यो हि—

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते ॥१।२२॥

इत्यत्र व्याकरणागमं परब्रह्माधिगमकमौपयिकमुपैति स एष ब्रह्मणो निराकर्ताऽभूदिति नौपयिकं पश्यामः। वैदिकः स वेदार्थाविरोधिनीः स्मृतीरपि प्रमाणयतीत्यस्य वैदिकत्वेऽतिरिक्तोनुगुणो हेतुः। एवं ह्याह—

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ॥१।७॥

किञ्च। एष भगवति वेदे नितान्तं श्राद्ध आगमादृते तर्कमात्रसमाश्रयेण धर्मो न व्यवतिष्ठत इत्यातिष्ठते। तथा च प्राह—

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ॥१।३०॥ इति।

अन्यच्च। तर्कैकसमाश्रयोऽर्थावसायो न प्रकल्पते तर्काप्रतिष्ठानादिति ब्रह्मसूत्रकृन्मतमनुवदति। तर्कश्च तत्त्वमीमांसायां वेदार्थविविदिषायां वा करणभावं प्रपन्नोपि नितान्तं गुणीभूतो वेदशास्त्राविरोधी च प्रतीष्यते इति च प्रतिपद्यते। आह च—

यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥१।३४॥
वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम्।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥१।१३६॥ इति।

तदिदं सर्वं साध्वालोच्यमानमस्मत्प्रतिज्ञानमेव प्रसाधयति परपक्षं च प्रतिक्षिपतीति नार्थो भूयसा ग्रन्थेन।

अत्रार्थेऽन्यत्रापि वाक्यपदीयादस्ति मानम्। स्याद्वादरत्नाकरस्य कर्ता वादिदेवसूरिर्वाक्यपदीयतो वाक्यकदम्बकमुदाहृत्य हरिमतनिराक्रियायां प्रवर्तते बह्वीर्वाचोयुक्तीश्च प्रयुङ्क्ते। तत्र कृतकृत्यम्मन्य एवं निगमयति—

यत्तावद्बुद्धशिष्यैर्निजसमयवशान्निर्विकल्पत्वमुक्तं
प्रत्यक्षे तत्पुरैव प्रतिहतिपदवीं प्रापितं सप्रपञ्चम्।
शब्दानुस्यूतिरुक्ता मतिषु तदपरैर्यापि सापि व्यपास्ता
तस्माज्ज्ञानं समस्तु व्यवसितिसुभगं मानतासंमतं यत् ॥७।६०॥

अत्र परामृष्टं मतिषु शब्दानुस्यूतिरिति मतं

न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥१।१२४॥

इति कारिकागतम्। तदेव चात्र चिखण्डयिषितं सूरिणेति तद्ग्रन्थे स्पष्टम्। परमिदमत्रावधेयं मतमेतद् बुद्धशिष्याणां नेति, ते तु प्रागेव प्रत्यादिष्टाः। इदानीं ये निरस्यन्ते ते तदपरे तद्भिन्नाः। अतोऽनया भङ्ग्या सूरेरियं भणितिरबौद्धो हरिरित्यस्यार्थस्य प्रसाधिकेति कः प्रेक्षावान्प्रत्याचक्षीत।

वेदविदां वरो हरिः

सकलशास्त्रपारावारपारीणः प्रबुद्धो वागात्मनि ब्रह्मणि महामना महा-

महिमा तत्रभवान्भर्तृहरिर्वेदान्वयि कृत्स्नं प्रत्नं ग्रन्थरत्नं यथावदर्थतोऽग्रहीष्टेति मुक्तसंशयं समुपलभन्ते तद्ग्रन्थेषु पठितिनः। परिचिन्वन्ति चास्यासाधारणीं प्रयोगनैपुणीम्। संस्तुवन्ति च साधीयोऽस्य शिष्टविशिष्टतार्हन्तीम्। कल्पयन्ति च निर्विकल्पमस्य ऋषिकल्पताम्। अवस्यन्ति च संहितादिषु शब्दार्थसम्बन्धेषु यथायमभ्यन्तरो न तथेतरे बहव इति। इह तावद्दिङ्मात्रमेतन्निदर्शयामः—लोके तावद् उपमानोपमेययोर्लिङ्गवचनभेदो दूषणमिति नियमः प्रतिपन्नप्रायो विशिष्टे क्वचिद्विषयेऽपोद्यते। यथोक्तं दण्डिना—

न लिङ्गवचने भिन्ने न हीनाधिकतापि वा।
उपमादूषणायालं यत्रोद्वेगो न धीमताम्॥ इति।

इममेव विषयं निरूपयँल्लिङ्गवचनभेदमदोषपक्षे निक्षिपन् कृष्टिर्हरिरिमां कारिकामाह—

गवेधुके चरौ दृष्टा गोविकर्ताक्षवापयोः।
पशू रुद्र इव ह्येताविल्येकवचनश्रुतिः॥३।१२७८॥

अत्रोपमायां वचनभेदो न दोषायेत्यत्र श्रौतं व्यवहारं प्रमाणयति। रुद्र इवैतौ गोविकर्ताक्षवापौ पशू अभिमन्येते इति श्रुतिरत्रानुसन्धेया। नात्र वेदव्यवहारः प्रकृतः। केवलं भिन्नवचनयोरुपमानोपमेययोर्व्यवहृतिरदुष्टेति यल्लौकिकानां मतं तन्निरालम्बं पूर्वशिष्टानामजुष्टं वा नेति दिदर्शयिषति। वेदपारगस्य हरेरेवायं गोचरः, दण्डिप्रभृतीनां तु दवीयानयमर्थः। यत्सत्यं लोके परां प्रौढिमापन्ना अपि ते न वेदे प्रगल्भन्ते।

भाष्यटीकायामेकविंशत्युत्तरशततमे पत्रे प्रथमे पार्श्वे आत्वभूत इति पदं व्याचक्षाणो हरिराह—क्वचित्प्राप्तिवचनोऽप्यस्तीत्याह। तद्यथा—एनेन वै भारद्वाजः प्रतर्दनं दैवोदासिं समनह्यत् स्वराष्ट्रमभवत्। यं कामयेत राष्ट्रियोयं स्यादिति तमेतेन संनह्येत राष्ट्रमेव भवतीति। अत्र प्रमाणत्वेन वेदवाक्योपन्यासोऽस्य विदुषो महान्तं वेदे श्रमं शंसति। व्याख्यातारो हि प्रयोगविशेषाणां साधुत्वप्रदर्शने प्रवृत्ता वेदमुदाहरमाणा न परिदृष्टाः। श्रुतिं व्याकुर्वाणाः श्रुत्यन्तरमुपन्यस्यन्ति संवादायेत्यन्यदेतत्। लौकिकव्यवहारसौष्ठवसूचनपरे वेदवचनोदाहरणे तु हरिरेव प्रभुः।

यत्रोपमानोपमेययोरभेदस्तत्राप्यौपम्यवाचीवशब्दः प्रयुज्यते वाक्ये। अत्रार्थे वेदं प्रमाणयन्नाह—

दस्युहेन्द्र इवेत्येतदैन्द्रे मन्त्रे प्रयुज्यते।
अन्यत्र दृष्टकर्म्मेन्द्रो यथेत्यस्मिन्विवक्षिते॥३।१२५१॥ इति।

अस्यां कारिकायामिति वेदवचोऽनुसन्धीयते—इन्द्र इव ह्युपरतूयसे इन्द्र इव दस्युहा भव क्षेत्राणि सृज इति। इन्द्रदेवताकोऽयं मन्त्रः। अत्रेन्द्र एवेन्द्रेणात्मनोपमीयते। कथंचिद्भेदं कल्पयित्वा चौपम्यनिर्वाह इति हरेरभिप्रायः कारिकोत्तरार्धगतः। अत्र मन्त्रेऽनन्वयोपमालङ्कृतिरित्यालङ्कारिकाः। अनन्वयोपमाविषयं निरूपयन्तो दण्डिप्रभृतय आलङ्कारिका नैकत्रापि श्रुतीरवगाहन्ते। न हीमे क्वापि प्रकृतालङ्कारविषयभूतं मन्त्रमुपस्थाप्यात्मानं पुनाना विलोक्यन्ते। केवलमादिकवेर्भगवतो वल्मीकभवस्य मुनेः—

गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥

इति श्रीरामायणीयं श्लोकं तद्विषयत्वेन निदर्शयन्ति श्लोकान्तराणि चोदाहरन्ति। अगृहीतार्था वेदस्य ते वेदोदाहृतिपूदासत इति नायुक्तम्। परं यस्य रसनाग्रे नरीनर्ति श्रुतिस्तस्य नैष भारो हरेः। सदृशस्त्वं तवैवेति लौकिकोऽप्यर्थः समुदाहारि हरिणेति सिद्धोऽस्य प्रकर्षः सर्वतोमुखः।

त्रिपाद्यां चानेन येन महता विस्तरेणोहो न्यरूपि सोपि नामास्यालौकिकवेदसंवेदनं वेदयति। अत्र विषये वक्तव्याभावाद् हतोत्साहः कैयटो विस्तरेण तु भर्तृहरिणा प्रदर्शित ऊह इत्येवोक्त्वोपारराम।

अद्वैती हरिः

महावैयाकरणेन वेदवित्तमेनानेन हरिणा ब्रह्मसूत्राण्यपि व्याकृषतेति पूर्वमेवावोचाम। एष महानुभावो न केवलं प्रौढिवादितया वेदान्तान्व्याचष्टे किन्तर्हि तत्र श्रद्धावान् प्रवर्तते। अयं हि विवर्तवादस्य प्रवर्तयिता वाऽभूदनुवदिता वेति न शक्यमाख्यातुम्। वाक्यपदीयप्रथमकारिकयैवायं विवर्तवादं प्रास्तोष्ट—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ इति।

अत्र विषये शब्दकौस्तुभे दीक्षितः प्राह—तदेवं वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन शब्दविचाराय प्रवृत्तः सन्प्रसङ्गादद्वैत औपनिषदे ब्रह्मण्यपि व्युत्पद्यतामित्यभिप्रायेण भगवान् भर्तृहरिर्विवर्तवादादिकमपि प्रसङ्गाद् व्युदपादयत् इति।

हेलाराजोपि टीकाकृत् प्राप्तक्रमा (३।३५) इति कारिकां टीकयन्नाह—एष च सर्वत्रैवास्य ग्रन्थकारस्याभिप्रायः। पदार्थचर्चाविषये ब्रह्मदर्शननयेनैव सम्बन्धादिविचारे विनिगमनात् इति।

किं नाम सत्यत्वमित्यत्र वेदान्तिनां यदभिमतं लक्षणं तन्निर्दिशन्नाह—

यत्र द्रष्टा च दृश्यं च दर्शनं चाविकल्पितम् ।
तस्यैवार्थस्य सत्यत्वं श्रितास्त्रय्यन्तवेदिनः ॥३।६२॥ इति ।

परमार्थस्त्वयमत्रेत्याहेति हेलाराजोऽवतारयतीमां कारिकाम् ।

पराभिधेये द्रव्ये वादिनामनेकान्विकल्पान्प्रोच्य स्वस्याभिमतं बाधातीतं यल्लक्षणं निरवोचत्तदपि भूयः प्रमाणमस्यैकत्विताायाम् । एवं हि स्माह—

सत्यं वस्तु तदाकारैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥३।१०८॥
न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः । इति ।

ब्रह्मलक्षणं परमार्थसदद्वितीयं वस्तु कथं नानात्वमापद्यत इति दृष्टान्तेन निदर्शयति । तद्यथा—

आत्मा परः प्रियो द्वेष्यो वक्ता वाच्यं प्रयोजनम् ।
विरुद्धानि यथैकस्य स्वप्ने रूपाणि चेतसः ॥
अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते ।
तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते ॥३।१२३,१२४॥ इति ।

अविद्यावद्विषयाणि शास्त्राणीति य एष शङ्कराधिष्ठितानां वेदान्तिनां डिण्डिमः सोपि नापूर्वः । अत्र विषये प्राथमिकी प्रसन्नोक्तिरिह वाक्यपदीये समुपलभ्यते । एषा हि कारिका सदर्थाभिवादिनी—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते । २।२३५। इति ।

अपरापि समानार्थिकाऽनेकत्रोदाहृता लौकिकन्यायतामिवोपगता वेदान्तशास्त्रिणां चात्यन्तं विदिता कारिका समस्ति—

उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥२।२४०॥ इति ।

वाक्यपदीयमिति नाम

कियदवधेर्ग्रन्थस्येतीदानीं प्रस्तूयते विचारः । वाक्यं च पदं च वाक्यपदे ते अधिकृत्य कृतो ग्रन्थो वाक्यपदीयमिति व्युत्पत्तेर्वाक्यपदाभ्यामत्र ग्रन्थे प्रकृताभ्यां भाव्यम् । सन्ति चेह त्रीणि काण्डानि ब्रह्मवाक्यपदाख्यानि । तत्राद्यस्य स्फोटनिरूपणपरस्य स्फोटमहावाक्ययोरभेदाद्वाक्यकाण्डे द्वितीयेन्तर्भावादुक्तसंज्ञानिर्वाहः । अस्माभिरुपलब्धोपयुक्तेषु सर्वेषु वाक्यपदीयकोशेषु काण्डत्रयेणैव वाक्यपदीयपरिसमाप्तिर्दृश्यते । एतावदेव तर्हि वाक्यपदीयशरीरमिति निश्चितं भाति । हेलाराजस्तु प्रथमं काण्डद्वयं वाक्यपदीयनाम्ना परामृशति । शब्दः कारणमर्थस्य (३।१५४)—इति कारिकां व्याचक्षाणः स आह—इति निर्णीतं वाक्यपदीये । अन्यत्र च विस्तरेणागमप्रामाण्यं वाक्यपदीयेऽस्माभिः प्रथमकाण्डे शब्दप्रभायां निर्णीतमिति तत एवावधार्यमिति ब्रुवन् स्वस्य व्याख्येयात्तृतीयस्मात्काण्डात्प्रथमं काण्डद्वयं पृथगिति वाक्यपदीयसंज्ञं चेति निर्दिदिक्षति । तृतीयं काण्डं प्रकीर्णकमित्यपि कोशेषु संज्ञायते नाम । तट्टीका च हेलाराजकृता प्रकीर्णप्रकाश इति । गणरत्नमहोदधिकृद्वर्धमानोपि वाक्यपदीयप्रकीर्णकयोर्द्वैतं प्रतिपद्यते । एवं ह्याह—भर्तृहरिर्वाक्यपदीयप्रकीर्णकयोः कर्ता महाभाष्यत्रिपाद्या व्याख्याता चेति । क्वचित् कोशेषु चैतन्मतपोषकरीव पुष्पिकेयं विलोक्यते—इति भगवद्भर्तृहरिकृते वाक्यपदीये द्वितीयं काण्डम् । समाप्ता वाक्यपदीयकारिका इति । इतिसङ्गमतमप्येतत्पक्षनिक्षिप्तमिति नातितिरोहितं तद्ग्रन्थं चर्चितवताम् । तदेतद् ग्रन्थनामधेयनिरुक्त्यर्थेन नितान्तं विरुध्यतेऽपोह्यते च कोशप्रामाण्येन । यदि पदकाण्डस्य तृतीयस्य बहिष्द्वमुपेयेत वाक्यपदीयमिति नामैवार्थवत्त्वं जह्यात् । न चैतदिष्टम् । किं च । प्रकीर्णकं पदकाण्डं वाक्यपदीयतो भिन्नमभ्युपयन् हेलाराजः त्रैलोक्यगामिनी येन त्रिकाण्डी त्रिपदी कृतेति त्रिकाण्ड्यात्मकं ग्रन्थमेकत्वेन कथं निर्दिशेत् । न ह्यप्रमत्तः स्वोक्तिं व्याहन्यात् । कस्तर्ह्यभिप्रायो व्याख्यातॄणामितरेषां च तदनुगानाम् । वयं तु पश्यामो यत्र क्वचिद्भेदनिर्देशः स तृतीयकाण्डस्य प्राधान्यप्रख्यापनाय न तु तत्स्वातन्त्र्यविवक्षयेति । धर्मपालादिकृतवृत्तिसनाथं हि पदकाण्डं प्रकीर्णकमित्यपराभिधं स्वल्पेनैवानेहसा तथा प्रसिद्धिमाप यथा विद्वत्सु पृथक्त्वेन निर्देशोऽस्य पप्रथे । काण्डद्वयगताः कारिका अल्पीयस्यः पिण्डिताः ६४५ मिता भवन्ति । काण्डे तृतीये ततो द्विगुणाः । तत्रापि भूयसा ग्रन्थेन विपुला व्याख्या सुमनोमनोमोदकरीति नातिचित्रं यददः काण्डं स्वातन्त्र्यमिव भजेत् । पृथक्त्वेन च व्याख्यातृभिर्व्यवह्रियेतेति ।

त्रिपाद्याश्च वाक्यपदीयस्य च परस्परं सम्बन्धः

त्रिपादी हि वाक्यपदीयेन बहुलं संवदति समानकर्तृकत्वात् । अस्त्युभयत्रोत्कटं शैलीसाम्यं विचारसाम्यं च । तच्च विदुषां परितोषकरमितीह दिङ्मात्रमुदाहरामः ।

त्रिपाद्यां 'यथाऽम्बाम्बेति शिक्षमाणो बालोऽन्यथोच्चारयति' इति पाठ इमां वाक्यपदीयकारिकां स्मारयति—

अम्बाम्बेति यथा बालः शिक्षमाणोपभाषते । इति ।

त्रिपाद्यां हि गोशब्द इत्थं व्युत्पादितः—गच्छति गदति गर्जति वा गौरिति । इमा व्युत्पत्तयो व्युत्पत्त्यन्तरैः सहिता वाक्यपदीये प्रपञ्चिताः । तद्यथा—

कैश्चिन्निर्वचनं भिन्नं गिरतेर्गर्जतेर्गमेः ।
गवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितम् ॥ (२।१७६) इति ।

यद्दर्शनं वाक्यपदीये 'एको मन्त्रस्तथाध्यात्ममधिदैवमधिक्रतु' (२।२५५) इत्यत्र प्रत्यपीपदद्धरिः तदेव टीकायामित्थं व्याचष्ट—यथा । इदं विष्णुर्विचक्रम इत्यत्रैक एव विष्णुशब्दोऽनेकशक्तिः सन्नधिदैवतमध्यात्ममधियज्ञं चात्मनि नारायणे चषाले च स्वया शक्त्या प्रवर्तते इति ।

यः खल्वर्थः यथाप्रणिहितं चक्षुर्दर्शनायोपकल्पते (२।४०७) इत्यत्र प्रतिपिपादयिषितः स एव टीकायामित्थं विशकलितः—यथा सत्येव चक्षुषि सति च रूपे न चक्षुरप्रणिहितमनधिष्ठितं मनसा विषयालोचने समर्थं भवत्येवं शब्दो व्यवस्थितोऽर्थोऽपि प्रयोक्तुः प्रणिधानमन्तरेण प्रत्यायनेऽसमर्थ इति ।

यश्च पदकाण्डे ऽन्वयव्यतिरेकाभ्यामर्थवान् परिकल्पितः (३।७०७) इत्यस्याः कारिकायाष्टीकाकृता यद्वेत्येवमवतारितायाः प्रतिपाद्योऽर्थः स एव टीकायामित्थं विवृतः—अन्येषां दर्शनम् । शब्दस्यानेको धर्मः । यथाजित्ययं यदान्वयव्यतिरेकाभ्यामर्थवानिति समधिगम्यते तदार्थवत्त्वाद्धातुत्वं प्रतिपद्यते । अयमेव यदार्थपरित्यागे एकाचो द्वे (प्रथमस्य) इति वर्णत्वेनाश्रीयते तदा तस्यार्थपदार्थकस्यायमेकोजिति व्यतिरेकेऽस्येति संबन्धमुपनीयते इति ।

अथेदानीं वाक्यपदीयनिर्मितिष्टीकानिर्मितेः पुरस्तादभूत् परस्ताद्वेति चिन्त्यते । यथानुवाकः श्लोको वेति (१।८३) कारिकावृत्तौ भर्तृहरिः—इति संहितासूत्रभाष्यविवरणे बहुधा विचारितम् इत्याचष्टे । अत्र प्रत्यवमृष्टं भाष्यविवरणं किमीयमिति यद्यपि नावाचि तथापि तदीयमेवेदं भवितुमर्हति नान्यदीयमिति सूपपन्नं प्रतीयते । न ह्येवं परकृतिं कृतिमन्निर्देशमन्तराऽनुसन्दधीत । स्वस्याः कृतेरेवं निर्देशस्तु सुतरां श्लिष्यति । यद्येवं तर्ह्यर्थादापद्यते वाक्यपदीयस्य त्रिपाद्यपेक्षं परभवत्वम् इति विरम्यतेऽस्माभिः प्रपञ्चात् ।

वाक्यपदीयकारिकाः

अत्र वाक्यपदीये याः कारिकास्तासां भर्तृहरिः कर्तेति न वचनमपेक्षते । न हि वाक्यपदीयेऽन्यतस्तन्त्रेभ्यः समाहृताः कारिकाः । नायं संग्रहात्मको ग्रन्थः ।

तथापि सन्त्यत्र काश्चन कारिकाः परकीया इति शक्यते प्रमाणतोऽध्यवसातुम् । यथाद्यसंख्याग्रहणम् (१।८८) असतश्चान्तराले यान् (१।८६) इति कारिके संग्रहकारीये इत्यत्र वादिदेवसूरिः प्रमाणम् । शब्दस्योच्चारणेऽर्थः (२।२६६) यस्त्वन्यस्य प्रयोगेण (२।२६७) इत्यपि द्वे कारिके संग्रहकारीये इति पुण्यराजवचनप्रामाण्यादवसीयते । द्वावभ्युपायौ शब्दानाम् (२।४६६) इत्येषा कारिका भाष्यटीकायां क्वचित्सन्दृब्धा दृश्यते । वाक्यपदीयं हि टीकातोर्वाङ् निरमायीति प्रमितपूर्वोऽयमर्थोऽस्माभिः । तेनैषापि कारिका भर्तृहरेर्नेति न शक्यशङ्कम् । संग्रहकारस्यैवेयं स्यादिति नासंभवि । तत्र प्रक्रियादर्शनं तु तद्दर्शिनः समर्थयन्ते इति हरिवृत्तावस्या अवतरणमप्यत्रानुकूलम् । इदं पुण्यमिदं पापम् (१।४०) तलवद् दृश्यते व्योम (२।१४२) इति च श्लोकद्वयी भगवतो व्यासस्य । तथा हि । तलवदिति श्लोको महाभारते शान्तिपर्वणि १११ तमेध्याये पट्पष्टः । पूर्वत्र श्लोके च कौमारिलं वचः प्रमाणम् । एवं हि तत्रभवांस्तुतातित आह—

धार्मिकाधार्मिकत्वाभ्यां पीडानुग्रहकारिणौ ।
प्रसिद्धौ हि तथा चाह पाराशर्योऽत्र वस्तुनि ॥
इदं पुण्यमिदं पापमित्येतस्मिन्पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ इति । मी० श्लो० वा०

पदे न वर्णाः (१।७४) इति कारिकां ग्रन्थकृत्स्वयमेवापर आहेत्येवमवतारयति । तत्र वायोस्तावच्छब्दभावापत्तिमाचक्षते इत्येवं लब्धक्रियः प्रयत्नेन, तस्य कारणसामर्थ्यात् (१।१०९, ११०) इति कारिके अवतारिते न च व्याख्याते । केवलमित्येवमादि सर्वमनुगन्तव्यमित्युपसंहृते । अणूनां शब्दत्वापत्तिमपरे प्रतिपन्नास्त एवमाहुरिति ह्यवतरणिका अणवः सर्वशक्तित्वात्, स्वशक्तौ व्यज्यमानायामिति (१।१११, ११२) द्वयोः कारिकयोः । समानश्चात्रोपसंहारः पूर्वेण । ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति इत्युपोद्धत्य अथायमान्तरो ज्ञातेत्यादि श्लोकचतुष्टयं पठति ग्रन्थकारः । अत्रापि सैवोपसंहृतिर्या पूर्वत्र । किंचात्र 'निदर्शनमात्रं चेदम् । बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्त इति प्रतिज्ञाय तत्प्रदर्शनायां प्रवर्तते । उपलभ्यते च कियानप्यंशः समुदाहृतस्य सन्दर्भस्य वर्तमानेषु शिक्षाप्रबन्धेषु । यत इमाः कारिका न स्वकीयया वृत्त्या सनाथिताः, यतश्च सर्वत्रावतरणग्रन्थेषु आचक्षते, आहुः, वर्णयन्तीति कथनपर्यायाः प्रयुक्ताः, यतश्चेत्येवमादि सर्वमनुगन्तव्यमित्येवं च पर्यवसितास्ततो जानीमहे परकीया इमाः स्युरिति । परवचोभिरेव परमतोपन्यासोऽत्रेति प्रतीतिर्भवन्ती न वार्यते हेत्वन्तरेण ।

वाक्यपदीयग्रन्थपातः

अहो अकलनीयः कालमहिमा ! या हरिकृता भाष्यटीका कैयटादिभिः समुपजीविता दीक्षितादिभिश्च प्रमाणत्वेन परामृष्टा त्रिपादीव्याख्यानरूपा सेदानीं स्वल्पैवावशिष्यते। ग्रन्थव्यत्यासभूयिष्ठाऽनुपस्कृतमुद्रिता लुप्तसत्ताकेव च लक्ष्यत इति। अत एव पठकानां पाठकानां चात्र सम्प्रति हरिटीकाऽस्तमितेति प्रायो वादः। कालपरिवासेन ह्रसन्तीषु वेदाङ्गविद्यासु संक्षेपरुचिपूदासीनेषु संवृत्तेषु वैयाकरणेषु महाभाष्यमपि लुप्तप्रचारं ग्रन्थमात्रेऽवस्थितं चन्द्राचार्यादिभिः पुनः प्राचारि, कैव कथा तदेतरेषां टीकाग्रन्थानाम्। एवमवस्थिते नेदं विस्मयनीयं यद्वाक्यपदीयमपि तादृक्षैरपरीक्षकैरलब्धगाधमुपेक्षितमभूत्। उपेक्षाजन्याश्चात्र ग्रन्थपातव्यत्यासादयः समजनिषत। अनवसरोयं ग्रन्थव्यत्यासनिदर्शनस्य तस्य तत्र तत्र टिप्पणेपूपदर्शितत्वादिति ग्रन्थपातमिह सप्रमाणमुदाहरामः।

वाक्यानां समुदायश्च (२।७६) इति श्लोकवृत्तौ हरिराह—'तत्र द्वादश षट् चतुर्विंशतिर्वा लक्षणानीति लक्षणसमुद्देशे सापदेशं सविरोधं विस्तरेण व्याख्यास्यते' इति। अद्यावधि समुपलब्धेषु त्रिकाण्डीकोशेषु नैकत्रापि लक्षणसमुद्देशो लक्ष्यते। पुण्यराजेनापि नालक्षीत्याकूतकरम्। एवं हि स निगदति—

एतेषां वितत्य सोपपत्तिकं सनिदर्शनं स्वरूपं पदकाण्डे लक्षणसमुद्देशे विनिर्दिष्टमिति ग्रन्थकृतैव स्ववृत्तौ प्रतिपादितम्। आगमभ्रंशाल्लेखकप्रमादादिना वा लक्षणसमुद्देशश्च पदकाण्डमध्ये न प्रसिद्धः इति। इहैव च वृत्तिकृद्वचनप्रामाण्येन बाधासमुद्देशस्यास्तितामवगमयति। एष तत्रोदाहृतो वृत्तिग्रन्थः—यस्मादुक्तम्। सेयमपरिमाणविकल्पा बाधा विस्तरेण बाधासमुद्देशे समर्थयिष्यत इति। अस्मदुपलब्धो वृत्तिकोशोऽप्यत्र प्रदेशे पतितग्रन्थ इति निरुद्धो नः प्रमायां प्रसरः। उक्तो बाधासमुद्देशोऽद्यत्वे पदकाण्डे नोपलभ्यते। पुण्यराजस्त्विममुपालब्ध। यदि नोपालप्स्यत कथं नावक्ष्यत। भट्टोजिदीक्षितोपि स्वकृतौ शब्दकौस्तुभे उक्तं च हरिणा प्रकीर्णकाण्डे इत्यभिधायेमे कारिके उदाहरति—

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात्तदापादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥ (पृ० ५२७)

तन्त्रान्तरेषु श्लोकान्तराण्यपि बहूनि समुपलभ्यन्ते हरिवचनाभिमतानि। तानि च स्वाभाव्यादेव वाक्यपदीयान्तःपातीनि नार्हन्ति भवितुमित्युदास्यतेस्माभिस्तदुदाहृतेः।

वाक्यपदीयटीकाकृतः

१. वृषभः

प्रथमं तावदिह वाक्यपदीये ग्रन्थकार एव विवरणकारः। तेन हि स्वयमेव प्रथमे काण्डद्वये वृत्तिर्विवरणं वा व्यरचीत्यत्रैवोपरिष्टात्प्रमास्यते। प्रथमकाण्डस्य सवृत्तिकस्य व्याख्याता तावच्छ्रीवृषभः कश्चित्। टीकारम्भे शिष्टाचारलक्षणं मङ्गलमाचरन्नेवं स आत्मानं प्रास्तुवीत—

सर्वप्रपञ्चं विगताशेषप्रपञ्चजालममलम्।
जयति जगतां निदानं भवबन्धच्छिदि परं ब्रह्म ॥
विमलचरितस्य राज्ञो विदुषः श्रीविष्णुगुप्तदेवस्य।
भृत्येन तदनुभावाच्छ्रीदेवयशस्तनूजेन ॥
बन्धेन विनोदार्थं श्रीवृषभेण स्फुटाक्षरं नाम।
क्रियते पद्धतिरेषा वाक्यपदीयोदधेः सुगमा ॥
यद्यपि टीका बह्व्यः पूर्वाचार्यैः सुनिर्मला रचिताः।
सन्तः परिश्रमज्ञास्तथापि चैनां ग्रहीष्यन्ति ॥ इति।

अयं वृषभः श्रीदेवयशस्तनूजः श्रीविष्णुगुप्ताद्राज्ञो जीविकापन्न इत्येतावन्मात्रमवगम्यते। यः कालो विष्णुगुप्तस्य स एवास्य प्रायेण। विष्णुगुप्तस्य तावद् व्यक्तिपरिच्छेद एव नास्ति, कुतस्तत्कालादिविनिर्णयः। कुतस्तरां तदाश्रितस्येत्यलं मरुमरीचिकानुधावनेन। एषा च टीका नापूर्वा, बहवोऽत्र पूर्विण आचार्या इत्यपि व्यक्तमुच्यते। विधातुस्तस्य (१।१०) इत्यत्र च वृत्तिव्याख्यातापि कश्चित्स्मर्यते। एषाऽस्य शैली प्रायिकी यदयं पूर्वं कारिकां पदशो व्याख्याति, अन्वयादिकं चाचष्टे पश्चाद्विवरणव्याक्रियायां प्रवर्तते। महान्खल्वस्य यत्नो वाक्यपदीये। यदभाणि भोजराजेन टीकाकृतोऽधिकृत्य

दुर्बोधं यदतीव तद्धि जहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिकैः।
अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते
श्रोतॄणामिति वस्तुविप्लवकृतः सर्वेपि टीकाकृतः ॥ इति

तन्नात्र लेशतोप्यञ्चति घटाम्। अनेन विदुषा नोपेक्षितं विषमं स्थलं न च प्रपञ्चितमनपेक्षितम्। यत्सत्यं वृत्त्यर्थं यथावदुपलिप्सूनामेनेनानल्पमुपाकारीति धन्यमेनं वदामः।

२. पुण्यराजः

द्वितीयकाण्डस्य वाक्यकाण्डापरपर्यायस्य टीकाकारस्तत्रभवान् पुण्यराजः। अयं सारस्वतप्रक्रियाटीकाकारात्पुञ्जराजाद्भिन्न इति न साध्योर्थः। टीकापरिसमाप्तौ यदयं स्वविषये स्माह ततो ज्ञायते राजानकशूरवर्म्मोपाह्वः काश्मीरक एष शशाङ्कशिष्याद्वाक्यपदीयद्वितीयकाण्डमश्रौषीदिति। कोयं शशाङ्कः, कश्चैष तस्य शिष्यो यो नामेयतीं प्रथामापत, यदनभिहितनामधेयमप्येनं शैष्योपाध्यायिकैवालमभूद् व्यक्तितः परिच्छेत्तुम्। अयं शशाङ्कश्चन्द्राचार्य्यः स्यात्, तस्यैव कश्चिच्छिष्यविशेष इह परामृश्येतेति केचित्। तदपेशलम्। चन्द्राचार्यो हि न क्वाप्यन्यत्र शशाङ्कनाम्ना स्मर्य्यते, चन्द्रगोमीति तु विश्रूयते। यद्यपि नामधेयविपरिवृत्तयोऽर्थसंश्रयाः कविकल्पिता अन्यत्र दृष्टाः, यथा दशरथस्य पङ्क्तिरथ इत्युपचारः कवीनाम, तथापि एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायेन नायमर्थः प्रमाणमन्तरा सेद्धुमीष्टे। वयं तु पश्यामः इह जिज्ञापयिषितः शशाङ्कः शशाङ्कधर इति तच्छिष्यश्च सहदेव इति। एष सहदेवो महानुभावो वामनीयालङ्कारसूत्रवृत्तेः प्राचीनतमष्टीकाकृदिति विदुषां विदितः। एवं ह्यात्मानमुद्दिश्य निराह—

चतुर्दशानामपि यः प्रसिद्धो विद्यास्थितीनां परपारदृश्वा।
शशाङ्कपूर्वं धर इत्युदारं यन्नाम लोके नितरां प्रसिद्धम्॥
तदीयशिष्यः सहदेवनामा कुले प्रसूतः खलु तोमराणाम्।
व्याख्यामिमां काव्यविचारशास्त्रे व्यधत्त लघ्वीमिह वामनीये॥
काश्मीरदेशादपसर्पतो मे शब्दानुशुद्धिं त्रिमुनिं निशम्य। इति।

अत्र स्पष्टमिदमुच्यते यदयं सहदेवः काश्मीरको निखिलशास्त्रनिष्णाताच्छ्रीमतः शशाङ्कधरादधीतशास्त्रः पाणिनीये कृतश्रमश्चेति। सत्यभामा सत्या देवदत्तो देव इतिवदिहोत्तरपदलोपो द्रष्टव्यः। अपि वा विदितान्येव नाम्न एकदेशग्रहणानि रथ्यापुरुषस्यापीति नायमर्थो यत्नसाध्यः। शशाङ्कधरश्च क्षीरतरङ्गिण्यां (चतुर्थे पृष्ठे) क्षीरेणेत्थं कीर्तितः—भट्टशशाङ्कधरस्त्वत्रैवं गुरुमुष्टिं समादिक्षत्। यदाह—द्विरूपो धात्वर्थः भावः क्रिया चेति। एवं सर्वथा पुण्यराजोक्तलक्षणलक्षितः सहदेवः। तत एवानेन द्वितीयकाण्डमश्रावीति स एवास्य गुरुरिति न शङ्काकलङ्काङ्कुरोपि।

पुण्यराजटीका वृत्त्यर्थमुपजीवन्त्यपि तत्संक्षेपो नेति सुवचम्। पुण्य-

राजोऽत्र स्वतन्त्रं प्रायसःप्रायेणेत्यवितथम्। वृत्तेस्तु टीकेयं दूरेणावरेति न शक्यतेऽपह्नोतुम्। क्वचिन्नातिमात्रं मिताक्षरा संवृणोतीवार्थमित्यपि नापलाप्यम्। तथापि प्रसन्नार्थगुम्फोऽस्या एको गुणः। तेनेयं बहूपकरोति च्छात्रवृन्दस्य।

यदुक्तं भोजराजेन योगवृत्तौ—

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन।
योपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोस्मि॥

इति तत्पुण्यराजोपि श्रद्धत्ते। एवं हि स्वाभ्युपगमं सङ्केतयति—तदेवं ब्रह्मकाण्डे कायवाग्बुद्धिविषया ये मलाः समवस्थिताः (१।१४७) इत्यादिश्लोकेन भाष्यकारप्रशंसोत्कीर्ति।

३. हेलाराजः

वाक्यपदीयतृतीयकाण्डस्य व्याख्याता तत्रभवान् हेलाराजो राजते। एतत्कृता व्याख्या च प्रकीर्णप्रकाश इत्याख्यया प्रथते। कोऽयं कावस्य कृतिनौ मातरपितरौ, कश्चैष भरतभूखण्डं मण्डयामासेत्याद्याकाङ्क्षा चेच्छ्रूयताम्। टीकामुपसंहरन्नयमित्थमात्मानं न्यवीविदत्—

मुक्तापीड इति प्रसिद्धिमगमत्काश्मीरदेशे नृपः
श्रीमान्ख्यातयशा बभूव नृपतेस्तस्य प्रभावानुगः।
मन्त्री लक्ष्मण इत्युदारचरितस्तस्यान्ववाये भवो
हेलाराज इमं प्रकाशमकरोच्छ्रीभूतिराजात्मजः॥ इति।

अयं तर्हि काश्मीरक्ष्माभृतो मुक्तापीडस्य प्रधानामात्यस्य लक्ष्मणाभिधस्य महत्यन्ववाये लब्धोदयस्तत्रभवतो भूतिराजस्य तनय इति तदुक्तितात्पर्यम्। क्रियता च लक्ष्मणाद्विप्रकृष्यत इत्यत्र विषये किमपि नो कीर्तितम्। तेनैतावताऽस्य कालनिर्णयोऽशक्यक्रिय इति यत्नान्तरं क्रियते। बूह्लर्महोदयेन मार्गितासादितेषु प्राचीनपुस्तकेष्वभिनवगुप्तविनिर्मितं गीताभाष्यमप्यासीदेकतमत्। तत्राभिनवगुप्तो भूतिराजतनूजं भट्टेन्दुराजं स्वगुरुं जानीते। यदि हेलाराजजनकाद्भूतिराजादिहानुसंहितो भूतिराजोऽभिन्नस्तदा हेलाराजभट्टेन्दुराजौ सोदरौ सिध्यतः। हेलाराजस्तर्हि दशमस्य ख्रिस्तीयवर्षशतकस्यावरस्मिन्भागेऽवर्ततेति निश्चितप्रायं प्रतीयते।

राजतरङ्गिणीकारः कल्हणो महाकविः कश्मीरभूपरिवृढानां चरितावलेर्निबन्द्धारं कवयितारं हेलाराजनामानं द्विजन्मानं स्मरति। एवं हि तमुपश्लोकयति—

बद्धा द्वादशभिर्ग्रन्थसहस्रैः पार्थिवावलिः।
प्राङ् महाव्रतिना येन हेलाराजद्विजन्मना॥ इति।

अयमपि हेलाराजो वाक्यपदीयटीकाकारादभिन्नः स्यादिति बहुतरकं निश्चितं भाति । काश्मीरिकस्यान्यस्य सनाम्नोऽश्रवणात् ।

हेलाराजः प्रथमं काण्डद्वयमपि व्याचष्टेति काण्डद्वये यथावृत्ति सिद्धान्तार्थसतत्त्वत इत्यादितदुक्तेरवसीयते । प्रथमकाण्डव्याख्याया: शब्दप्रभेति समाख्याऽऽसीदित्यत्र स एव प्रमाणम् । एवं ह्याह—विस्तरेणागमप्रामाण्यं वाक्यपदीयेऽस्माभिः प्रथमकाण्डे शब्दप्रभायां निर्णीतमिति तत एवावधार्यम् इति ।

अपरे अपि द्वे कृती क्रियाविवेकवार्तिकोन्मेषौ हेलाराजीये आस्तामिति प्रकीर्णप्रकाशादवधार्यते । लक्षणा (३।५०) इति श्लोकव्याख्यायां स आह—इति क्रियाविवेके विस्तरेणास्माभिरभिहितमिति तत एवावधार्यम् इति । क्रियासमुद्देशेपि क्रियाविवेकं स्वकृतिमित्थमावेदयति यावत्सिद्धमसिद्धं वेति कारिकायाम् । क्रियाविवेके क्रियैव प्रधानभूता वाक्यार्थ इति निर्णीतम् । तत एवावधार्यमिति । भूयश्च साध्यत्वात्तत्र चाख्यातैरिति कारिकाव्याख्यायामत एव प्राधान्याद्वाक्यार्थो वैयाकरणानामिति क्रियाविवेकेस्माभिर्विवेचितम् । तत एवावधार्यमित्येवं स्वकृतिं स्मारयति । वार्तिकोन्मेषन्तु लिङ्गसमुद्देशोपान्ते स कीर्तयति । तद्यथा—सिद्धान्तस्तु यथाभाष्यं गुणावस्थारूपं लिङ्गमित्यस्माभिर्वार्तिकोन्मेषे यथागमं व्याख्यातं तत एवावधार्यम् इति ।

अपराप्यासीदस्य विदुषः कृतिरद्वैतसिद्धिनाम्नीति द्रव्यसमुद्देशे विकारापगमे इतिकारिकाव्याख्यायामेषा हेलाराजोक्तिरवसाययति—विशेषश्चानयोर्वाक्यपदीयेऽस्माभिर्व्याख्यात इति तत एवावधार्यम् । इहापि सम्बन्धसमुद्देशे वक्ष्यते । कारणान्तरव्युदासश्चाद्वैतसिद्धावभिहित इति सत्यर्थित्वे तत एवावगन्तव्य इति ।

हेलाराजस्य पदकाण्डव्याख्याने महान्नाम यत्नः, यद्यपि नापूर्वः । धर्मपालो हीदम्प्रथमतया पदकाण्डं व्याख्यदितीत्सिङ्गवचनान्निश्चीयते । स्मरति च हेलाराजः पूर्वान्व्याख्यातॄन्, निर्दिशति च तत्परिगृहीतान्पाठान्, उपन्यस्यति च तत्र तत्र तेषां मतानि । न ह्यस्य परत्वमात्रं क्षमते कृतेरस्य गुणौघमपकर्ष्टुम् । सर्वपथीनाऽस्य धिषणा । परं च प्रावीण्यं पदार्थचर्चायाम् । सर्वथा चेतश्चमत्कारिणी व्युत्पन्नानामपि विस्मयजननी प्रसन्नगम्भीराऽस्य सरस्वती । मूलमनुज्झन्ती समन्वितार्थं समर्पयन्ती यथास्थानं समासव्यासवती विषयं चालं विशदयन्ती विपश्चितोऽस्य व्याख्येयं विद्वद्गोष्ठीषु महतीं महनीयतां समासादितवती । कैयटोपि स्वं प्रदीपमनयैवार्चिषाभिज्वलयति । दीक्षितप्रभृतयः तत्तद्वैयाकरणकृतान्तनिरूपणायां प्रवृत्ता एतद्विलसितैरेव स्वोक्तीरुल्लासयन्ति । एवं परं प्रामाण्यं भजन्त्यामस्यां टीकायामपि ग्रन्थपातोजनीत्यकरुणाः खल्वीश्वराः । अनेकत्र चैष पात इति गण्ड-

स्योपरि पिटकः संवृत्तः । एवं ह्याह लिपिकरः—इतो ग्रन्थपातसन्धानाय फुल्लराजकृतिर्लिख्यते । अपरत्र च तमेवार्थमाह—इहापि पतितग्रन्था हेलाराजकृतिः फुल्लराजकृत्या सन्धीयते इति । पाठा अपि बहुलं विपर्यस्ता इति यत्नशोध्याः । भूयांश्चात्र कालो हेलाराजीयकोशशोधने नो व्यापृतानाम् । चिरं प्रयत्ता अपि वयं प्रकाशयितारं नाविदामेति सम्प्रत्युदास्महे ।

वृत्तिकारो हरिः

भगवता भर्तृहरिणा स्वाशयविशदीकरणाय स्वयमेव वाक्यपदीये कापि वृत्तिर्व्यरचीत्यत्र मम्मटादयो मानम् । काव्यप्रकाशकृन्मम्मटस्तावत्काव्यप्रकाशेऽभिधावृत्तिमातृकाटीकायां शब्दव्यापारे च उक्तं च वाक्यपदीय इत्यभिधायेमं गद्यग्रन्थं समुद्धरति—न हि गौः स्वरूपेण गौः, नाप्यगौः, गोत्वाभिसम्बन्धात्तु गौरिति । तेन च सवृत्तिकस्य ग्रन्थस्य वाक्यपदीयत्वमुररीकरोति । तच्च वृत्तेर्वाक्यपदीयस्य च समानकर्तृकत्व एव घटते । हेलाराजस्तु स्पष्टतरमिममर्थमाह—

काण्डद्वये यथावृत्ति सिद्धान्तार्थसतत्त्वतः । इति ।

अत्र यथावृत्ति इत्युक्तिर्वाक्यपदीयकाण्डद्वये वृत्तिसद्भावं व्यक्तं वेदयति । प्रामाणिकस्यैव कस्यचिदियं कृतिरित्यपि बलादनुमापयति । स च प्रामाणिकः कारिकाकार एव न ततोन्यः ।

हेलाराजः खलु संश्लेषमात्रम् इति श्लोकं व्याचक्षाणो वृत्तिग्रन्थमुदाहरति वाक्यकाण्डादनतिरिक्ततां चास्याभ्युपैति । यतश्चाह यदुक्तं वाक्यकाण्डे—'यश्च जातिसमुद्देशे प्रतिनिधिं प्रत्यपरो दर्शनभेदः' सोयमिह व्याख्यात इति । अयमभेदनिर्देशो वृत्तेर्वाक्यकाण्डस्य च समानकर्तृकत्वं घटयतीति न दुर्घटोर्थः । अन्यत्र च सम्बन्धसमुद्देशेऽसाधुरनुमानेनेति श्लोकव्याख्यायाम् अत एव हि पुराकल्पेऽनृतादिभिरिवापभ्रंशैरपि रहिता वागासीदिति वृत्तिग्रन्थमुदाहरन्ब्रह्मकाण्डपाठोऽयमिति ब्रूते । अत्रापि पूर्ववत्समानकर्तृकत्वं सिद्धं भवति ।

वृत्तिसमुद्देशेपि यो य उच्चार्यते शब्द इति श्लोकव्याख्यायां यदधिष्ठानाः श्रुतयः प्रत्याय्यमर्थमभिनिविशन्त इति ब्रह्मकाण्डेभिहितमिति हेलाराजोक्तेः सवृत्तिकस्य ब्रह्मकाण्डता तत्रभवतोऽभिमतेति गम्यते । उदाहृतो ग्रन्थश्च द्वावुपादानशब्देषु (१।४४) इत्यत्र वृत्तिग्रन्थो मनाक् परिवृत्तः । किं च । स्वा जातिः (३।६) इत्यत्र तस्माच्छब्दादर्थं प्रतिपद्यामह इति व्यवहाराद्वर्णानामर्थावसायजनकत्वानुपपत्तेः प्रक्रियाभङ्गस्य प्रथमकाण्ड एव विहितत्वादिति यः प्रक्रियाभङ्गः परामृष्टः स कारिकयाऽस्पृष्टो वृत्तावुक्तः । न चावश्यं शास्त्रान्तरे परिदृष्टा जात्यभिव्यक्तिप्रक्रिया वैयाकरणैः परिगृह्यत इति हि तत्र वृत्तिग्रन्थः ।

पुण्यराजोपि वृत्तिग्रन्थं परामृशति भर्तृहरिकृतिं च तमवैति। वाक्यकाण्डारम्भ एव स इत्थं वृत्तिमुदाहरति—यत्पुनरनेन वृत्तावुक्तम्—उदाहरणमात्रमेतत्। अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यतीति। प्रासङ्गिकमिदम् (२।७७) इत्यादिश्लोकसप्तकव्याख्यायामप्याचष्टे—एषा च टीकाकृता स्ववृत्तौ 'सा च तुल्यबलेष्वसंभवात्' इत्यादिना बहुप्रकारा दर्शिता इति।

न्यायमञ्जरीकारो जयन्तभट्टोपि सवृत्तिकं कारिकाग्रन्थं वाक्यपदीयमेककर्तृकं च प्रतिपद्यते इति गम्यते। अनादिनिधनमित्यादिकारिकां कात्स्न्येन पठित्वा 'यत्तु नित्यं वा किञ्चित्तच्छब्दतत्त्वमित्यत्र का युक्तिरिति च चोदयित्वा आह—शब्दोपग्राह्यतया च शब्दतत्त्वम् इत्येवं समाधत्ते। अत्र शब्दोपग्राह्यतयेत्यादिर्वृत्तिग्रन्थ आहेत्येवं प्रस्तुतः। कारिकाणां कर्तुरेवेयमुक्तिरित्युदाहरणदिगेव दिशति।

अस्मदुपलब्धोपयुक्तेषु प्रथमकाण्डवृत्तिकोशेषु सर्वत्र पुष्पिकेयं विलोक्यते—इति श्रीहरिवृषभमहावैयाकरणविरचिते वाक्यपदीये आगमसमुच्चयो नाम ब्रह्मकाण्डं समाप्तम् इति। अत्र ब्रह्मकाण्डवृत्तिः समाप्तिमाप्ता सवृत्तिकं वा ब्रह्मकाण्डमवसितमिति नोदीरितम्। अस्ति चात्र वृत्त्युपेतः कारिकाग्रन्थः। तेन तस्य समुदितस्य ब्रह्मकाण्डतामभ्युपेत्योक्तं ब्रह्मकाण्डं समाप्तमिति। सवृत्तिकस्य ग्रन्थस्य ब्रह्मकाण्डतायां वृत्तेः कारिकाणां च समानकर्तृकत्वमनुक्तमपि कक्षीकृतम्भवति। हरिवृषभकृतिरेषेति तु कण्ठेनोदितम्। मूलपुस्तकेषु क्वचिद् इति भगवद्भर्तृहरिकृते इति पुष्पिकायां दृश्यते। उभयथा निर्देशाद् वृषभ इति पदं पूजावचनमिति न नामधेयभेदाय कल्पते।

एतस्मिन्वृत्तिग्रन्थे नैकमपि कारिकासु पाठान्तरमुपात्तम्। तदपि नाम बलीयः प्रमाणं तस्य च कारिकाणां च समानकर्तृकतायाम्। वृत्तौ तु वृषभटीकाकारः पाठान्तराणि लक्षयति व्याख्यान्तराणि चानुसन्धत्ते। तदस्याः प्राचीनत्वे प्रकृष्टत्वे च मानम्।

किं च। तस्मादकृतकम् (१।४३) इति श्लोके इदमाचार्यैः शब्दानुशासनं प्रक्रान्तमनुगम्यते इति यो वृत्त्युपसंहारः, यश्च तत्र प्रक्रान्तं प्रकृतं तन्मयानुगम्यते इति वृषभदेवीयं, या चाग्रिमश्लोकस्य तदनुगमं कुर्वन् शब्दस्य स्वरूपमाहेत्यवतरणिका वृषभधृता तत्सर्वं समालोच्यमानं वृत्तेः कारिकाणां च समानकर्तृकत्वं सुतरां साधयति। अत्र हि वचनक्रियाया अनुगमक्रियायाश्चैकः कर्तेति व्यक्तम्। तेन य एवेदमाचार्यैः शब्दानुशासनं प्रक्रान्तमनुगम्यत इति वृत्तिग्रन्थं जग्रन्थ स एव चतुश्चत्वारिंशत्तमीं कारिकां चकारेति फलितोर्थः।

यच्च वृषभटीकाकारोऽविभागाद्विवृत्तानाम् (१।१४६) इति कारिकाटीकायां कारिकोपन्यासफलं स्वयमेव विवरणे दर्शयिष्यतीत्यगादीत्तन्नाम वृत्तिरियं भर्तृहरिकृतिरिति विनिगमयतीति कृतं विस्तरेण।

प्रथमकाण्डवृत्तिः

भगवता भर्तृहरिणा प्रथमे काण्डद्वये स्वयमेव काचिद् वृत्तिर्व्यरचीति पूर्वमवोचाम। तत्र ब्रह्मकाण्डे तावदुभयी वृत्तिरुपलभ्यते प्रचितार्था संक्षिप्तार्था चेति। अस्मदुपलब्धोपयुक्तेषु बाङ्गवृत्तिकोशेषु भूयान्ग्रन्थः, वाराणस्यां प्रकाशितायां वृत्तावल्पीयानिति विशेषः। सन्ति चात्र शब्दार्थवाक्यविभागादिकृतानि विशेषान्तराणि। इति श्रीहरिवृषभमहावैयाकरणविरचिते वाक्यपदीये आगमसमुच्चयो नाम ब्रह्मकाण्डं समाप्तमित्याकारिका पुष्पिका तूभयत्र साधारणी। अनयोः प्रचितार्थसंक्षिप्तार्थयोर्वृत्त्योः कतरा हरिकृतिरितीदानीं विचारपदवीमध्यास्ते। अस्माकं तु वाराणसेयवृत्तिर्हरिकृतवृत्तेः संक्षेपः, बाङ्गवृत्तिकोशेषूपलब्धो वृत्तिग्रन्थ एव हरेरुपज्ञेति दर्शनम्। तदिदं वैतत्येन सोपपत्तिकं प्रसाधयिष्याम इहैव। तत्सुधियः समीक्षन्ताम्। संज्ञालाघवार्थमेते वृत्ती बृहतीलघ्व्याविति व्यपदेक्ष्यामः।

सवृत्तिकस्य वाक्यपदीयस्य टीकाकृत्तत्रभवान् वृषभस्तावद्बङ्गकोशानुसारिणमेव वृत्तिग्रन्थं व्याख्येयमुपादत्ते, प्रतीकान् धृत्वैव च व्याचष्टे। संक्षिप्तार्था वृत्तिस्त्वस्यात्यन्तमविदिता। वृत्तिश्च कारिकाश्चेत्येतत्समुदितं वाक्यपदीयमिति हि तस्याभीष्टं मतमिति पूर्वमेव निरदिक्षाम। इदं चात्रापरमवधेयम्। संक्षिप्तार्थाया वृत्तेः कोशा वाराणस्यामेवोपलभ्यन्ते नेतरत्रेति वाराणसेयस्य कस्य चित्प्रज्ञस्य सा कृतिरिति न दुष्कल्पना।

हेलाराजोपि बृहतीमेव वृत्तिं वेद न लघ्वीम्। जातिसमुद्देशे स्वा जातिरित्यादिकारिकां व्याचक्षाणो यदाह तन्नित्याः शब्दार्थसम्बन्धाः (१।२३) इत्यस्य वृत्तेश्छायैव। यदा त्ववयवप्रबन्धः क्रमेणोपलब्धो भवति, अथ जातिविशेषोपाधियुक्ता व्यवहारा अवतिष्ठन्त इति वृत्तिगतं वाक्यमपि तत्राक्षरशः समुद्धरति। इदं च वाक्यं लघ्व्यां नो दृश्यते।

स्मृतयो बहुरूपाश्च (१।७) इत्यत्र लघ्व्यां वृत्तौ इत्यनेन सर्वासां स्मृतीनां वेदमूलकत्वेन प्रामाण्यं दर्शितमित्युपसंहृतिः। अत्र वृत्तिकृदेवमुपन्यासं कुर्वाणः कारिकाणां कर्तुरात्मानं भिन्नं दिदर्शयिषतीति जायते प्रत्ययः। बृहत्यां त्वन्यादृश एवोपसंहारः। तद्यथा। क्वचिच्च विषये लिङ्गानि दृष्टानि स्थालीपुलाकवच्छ्रुत्यर्थाविरोधिन्याः स्मृतेः प्रामाण्यकल्पनायालम् इति

एवञ्जातीयकोक्तिर्वृत्तेरस्या हरिकर्तृकत्वेऽविसंवादिनीति को नामापह्नुवीत ।
एवमेव आत्मभेदस्तयोः (१।४५) इत्यत्र यो बृहत्यामुपसंहारः, या च लघ्व्यामग्रि-
मश्लोकावतरणिका तावपि पूर्वामेव प्रतीतिं द्रढयतः। बृहत्यां तावदेष उपसंहारः—
शब्दाकृतिव्यक्तिभेदाभेदव्यपाश्रयो वा पूर्वेषामाचार्य्याणां दर्शनभेद इति परस्तादेत-
द्वस्तुगत एव प्रपञ्चो भविष्यति इति । इदं च कारिकाणां कर्तुरेव प्रतिज्ञानमिति
प्रव्यक्तं प्रतीयते । लघ्व्यान्तु इदमेव प्रपञ्चयति इत्यवतरणिका वृत्तिश्लोकयोर्भिन्नकर्तृ-
कतां प्रत्याययतीव । अन्यत्रापि स्वं रूपमिति कैश्चित्तु (१।६९,७०) इति श्लोकद्वये
वृत्त्युपसंहारभेदस्तमेव प्रागभिहितमर्थमवसाययति । बृहत्यां तावदेष उपसंहारः—
तदेतन्निदर्शनमात्रम् । प्रसक्तानुप्रसक्तविचारणाप्रसङ्गनिवृत्त्यर्थं तु न सर्वे स्वरूपमात्र-
भेदा उदाह्रियन्ते इति । लघ्व्यान्त्वयम्—विस्तरभयात्त्वेतत्सूत्रविषया अन्ये मतभेदा
नोदाह्रियन्त इति दिग् इति । अत्र लघ्व्यां बृहतीगतोर्थ ऋजूकृत्याल्पाक्षरैरुपन्यस्त
इति विस्पष्टम् ।

लघ्वी वृत्तिः संक्षेपमाद्रियमाणा न तथा विवृणोत्यर्थं यथा संवृणोति ।
संक्षेपाभिरुचिरेव तत्रापराध्यति । तस्यार्थवादरूपाणि (१।८) इत्यत्रैवं दर्शनवि-
कल्पा इत्युपसंहारः । तत एव खल्वेवंप्रवादेषु किं सत्यं तत्राहेति चाग्रिमश्लोकाव-
तरणिका । बृहत्यां तु सर्वस्यैतस्य स्थाने—यतश्चैते सर्वविकल्पातीत एकस्मिन्नर्थे
सर्वशक्तियोगाद्द्रष्टॄणां दर्शनविकल्पाः तत एव खलु इति सन्दृब्धम् । लघ्व्यां तत
एव खल्वित्यस्य विन्यासस्य न सुलभा सङ्गतिः । विरलश्चात्रार्थः । सोपि हेतो-
रनुपन्यसनान्न यथेष्टं स्फुटति । किं चात्राप्यवतरणिकाभिदा बृहती हरिकृतिरिति
प्रज्ञापयति ।

अन्यत्रापि बहुत्र विस्तराद्बिभ्यती बृहतीगतमर्थं संक्षिपन्ती लघ्वी वृत्तिर्विषयं
सङ्कोचयति । स्मृतयो बहुरूपाश्च (१।७) इत्यत्र का नाम बहुरूपता स्मृतीनामिति
न व्यक्तीकृतम् । लिङ्गेभ्यः प्रकल्पिताः इत्यपि न स्फोरितम् । तेन व्युत्पित्सोर्न
जातु भवतीष्टार्थापत्तिः । बृहत्यां तु सर्वमेतत्सविस्तरं गदितम् ।

क्वचिच्च लघ्वी वृत्तिर्भ्रमयति श्रोतॄन् । तत्रापि संक्षेपसमीहैव दोषाय ।
विधातुस्तस्य (१।१०) इत्यत्र लघ्व्यामेष वृत्तिग्रन्थः—तस्य वेदाख्यस्य प्रसिद्धस्य
ब्रह्मणोङ्गेभ्यो ज्यौतिषादय उपाङ्गेभ्यश्चिकित्सादयो विद्याभेदाः प्रभवन्ति इति ।
इदञ्चाकुमारं विदितं जनस्य यज्ज्यौतिषं वेदाङ्गं चिकित्सा चोपाङ्गमिति । न तु
वेदाङ्गोपाङ्गजन्ये इमे । अत्र च ज्यौतिषं वेदाङ्गादन्यत्तदुद्भवमभिहितम् ।
चिकित्सापि वेदोपाङ्गव्यतिरिक्ता रूपिता । तदिदं विपरीतम् । बृहत्यां तु नेष-
दप्यर्थविपर्ययः । एवं हि तत्र पठितम्—वेदाख्यस्य प्रसिद्धस्य ब्रह्मणोङ्गेभ्यो ज्यौति-

षादिभ्यः शकुनज्ञानादय उपाङ्गेभ्यश्च स्वप्नविपाकयोनिज्ञानादयो विद्याभेदाः प्रसिद्धा
लोके इति । अन्यत्रापि लघ्व्यां संक्षेप्तुः प्रतिफलति चेष्टा । प्राप्तरूपविभागायाः
(१।१२) इत्यत्र यत्तत्पुण्यतमं ज्योतिरित्यस्य व्याख्यायां यत्प्रमाणं ग्रन्थान्तरात्सं-
गृहीतं तद् वृत्तिग्रन्थेन संकीर्य पठितम् । तत्संक्षेप्तुः प्रतिपत्त्यसामर्थ्यम् । एवं हि
तत्र प्रमाणवाक्यमुदाहृतम्—एवं ह्याह त्रीणि ज्योतींषि त्रयः प्रकाशाः, योऽयं जात-
वेदाः यश्च पुरुषेष्वान्तरः प्रकाशो यश्च प्रकाशाप्रकाशयोः प्रकाशयिता शब्दाख्यः
प्रकाश इत्यादि । बृहत्यां तु इह त्रीणि ज्योतींषि त्रयः प्रकाशाः स्वरूपपररूपयोरव-
द्योतकाः इत्येतावान् वृत्तिसन्दर्भः । अनन्तरं च तद्यथेत्युक्त्वा योयमित्यादि प्रमाणं
पठितम् । तत्र संक्षेप्तुः सङ्कीर्णः पाठः, बृहतीकारस्यैव च शुद्ध इति सैव समर्हति
हरिकृतिर्भवितुम् ।

कार्यत्वे नित्यतायां वा (१।७१) पदभेदेपि वर्णानाम् (१।७२) इत्यनयोः
श्लोकयोरेषाऽवतरणिका लघ्व्याम्—इदानीं शब्दाभिव्यक्तिप्रक्रियां प्रतिजानीते
इति । अयञ्चास्थाने न्यासः । बृहत्यां तु इन्द्रियस्यैव संस्कारः (१।७९) इत्यत्रैष उप-
क्रमः—एतस्मिञ्श्लोके शब्दाभिव्यक्तिप्रक्रियामात्रं प्रतिज्ञायते उत्तरौ तु दृष्टान्तप्रदर्शन-
विषयाविति । एवं बहुत्र विपर्यासो लघ्व्याम् ।

तस्य प्राणे च या शक्तिः (१।११८) इत्यस्याः कारिकायाः पुनः पक्षान्तर-
माहेत्येवंरूपावतरणिका लघ्व्याम् । अत्रापि संग्रहेण वक्ष्यामीति मनीषया लघ्वी-
कारेणात्यल्पमुक्तम् प्रकृतार्थप्रतिपत्तेरप्रकल्पकम् । अस्या एव कारिकाया यो
वृत्त्युद्घातः स प्रचुरार्थः प्रक्रियमाणं चार्थं साधु समर्पयति । स च पक्षभेदा
एवैते नायमनन्तरः प्रचयधर्मा ध्वनिरिह श्लोके निर्दिश्यते । शब्दस्तु पूर्वप्रकृतः प्रवाद-
भेदैरन्वाख्यायत इत्यात्मकः ।

न सोस्ति प्रत्ययः (१।१२४) इत्यत्र लघ्व्यां का चिदेव सा ज्ञानावस्था
सविकल्पकाख्या यस्यामित्यादिरुपक्रमः पूर्ववाक्यसव्यपेक्षः संबन्धविधुर इवा-
भासते । बृहत्यान्त्वन्यथोपक्रान्तम् । एष हि तत्रातः प्राचीनो ग्रन्थः—यथास्य संहृ-
तरूपा शब्दभावना तथा ज्ञेयेष्वर्थेषूत्पन्नेनाप्यविकल्पकेन ज्ञानेन कार्यं न क्रियते ।
तद्यथा त्वरितं गच्छत तृणलोष्टादिसंस्पर्शात्सत्यपि ज्ञाने इति । इदं चानुपेक्ष्यमिति न
साध्वाचरितं लघ्वीकारेणोपेक्षमाणेन । बृहत्याः प्रत्यवरा लघ्वीति विस्पष्टम् ।

अन्यत्रापि बहुत्र संजिघृक्षाविवशेन लघ्वीकारेण शब्दार्थावुपेक्ष्याऽऽकुली-
कृतो ग्रन्थः । तद्यथा । वाग्रूपता चेदुत्क्रामेत् (१।१२५) इत्यत्र यथान्तर्धर्मिणः
प्रकाशत्वस्वरूपं चैतन्यम् । तथा प्रकाशो ज्ञानमपि सर्वं वाग्रूपानुगतम् इति
वृत्तिर्नितान्तमुज्झितार्थसम्बन्धा । अत्र प्रकाशत्वस्वरूपमिति विशेषणमपार्थकम् ।

प्रकाशो ज्ञानमिति व्याख्यापत्यनावश्यकी प्रमाशून्या च। बृहत्यान्त्वेष पाठः—यथा प्रकाशकत्वमग्नेः स्वरूपं चैतन्यं वान्तर्यामिणस्तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम् इति। स च सर्वः सुश्लिष्टोऽवदातश्च। अत्रैवान्योपि व्यतिकरो लघ्व्याम्। स्मृतिकालेपि च तादृशानामुपलब्धिबीजानामाभिमुख्ये स्मर्तव्याः श्लोकादयः कोप्यसावनुवाकः श्लोको वेति बुद्धौ विपरिवर्तत इति तत्र पाठः। बृहत्यां त्वस्य स्थाने स्मृतिकालेपि च तादृशानामुपलब्धिबीजानामाभिमुख्ये स्मर्तव्येषु श्लोकादिषु प्रकाशानुगममात्रमारूपमिव बुद्धौ विपरिवर्तते। कोप्यसावनुवाकः श्लोको वा योयं मया श्रुतिमात्रेण प्रक्रान्त इतीति सन्दर्भः। लघ्व्यां खल्विदं वचोऽत्यर्थमनन्वयं बृहत्यां तु सान्वयमर्थनिर्भरं चेति व्यतिरेकः। अत्रापि संक्षेपेच्छैव प्रयोजिका व्यतिकरस्येति व्यक्तम्। सर्वंकषा नामैषा लाघवेच्छा लघ्वीकारस्य। तन्त्रान्तरेभ्यः संगृहीतानि प्रमाणवाक्यान्यपि संक्षिपति सः, किमुत वृत्तिग्रन्थम्। द्वावुपादानशब्देषु (१।४४) इत्यत्र बृहत्यामिदं संग्रहकारीयं वचनमुदाहृतम्—वाचक उपादानस्वरूपवानव्युत्पत्तिपक्षे। व्युत्पत्तिपक्षे त्वर्थावहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्म्मणि प्रयोजकम्। उपादानो द्योतक इत्येके। सोयमिति व्यपदेशेन सम्बन्धोपयोगस्य शक्यस्यात् इतीति। लघ्व्यान्तु सकलस्यास्य स्थाने वाचक उपादानस्वरूपवान् इत्येव पठितम्। एवमेव तस्याभिधेयभावेन (१।६६) इत्यत्र शब्दस्य परिणामोयम् (१।१२१) इत्यत्र च द्रष्टव्यम्।

उपजीव्यग्रन्थनिर्देशोपि वृत्त्योर्भिन्नः। स्वभावभेदान्नित्यत्वे (१।७७) इत्यत्र बृहतीकार एवं हि संग्रहकारः पठतीति व्याहृत्य शब्दस्य ग्रहणे हेतुरित्यादि तद्वचः संगृह्णाति। द्वावुपादानशब्देषु (१।४४) इत्यत्र चैवं हि संग्रहे पठ्यत इत्युक्त्वा वाचक उपादानस्वरूपवानित्याद्यनल्पाक्षरं महार्थं च तद्वचनमुपादत्ते। लघ्वीकारस्तु पूर्वत्र किमपि नाचष्टे। यस्मात् शब्दस्य ग्रहणे हेतुरितीमं श्लोकं वाक्यपदीयकारिकामभिमन्यते। अपरत्र चोक्तं चेत्येव मितां वाचं विसृजति। तस्याभिधेयभावेन (१।६६) इत्यत्रोभयोर्वृत्त्योः संग्रहकारीयं वचनं संवादकमुपन्यस्तम्। तत्र वचनोपन्यासे त्वस्ति महदन्तरम्। किं च। बृहत्यामेवं हि संग्रह उक्तमिति तदवतरणम्। लघ्वीकारेण तु संग्रहकारस्त्विवत्येवं तदुपक्रम्य इत्याहेत्युपसंहृतम्। एतच्चान्तरं नान्तरेण हेतुं सम्भवति। अयं चात्र हेतुरुन्नेयः। एवं हि संग्रह उक्तमित्येवं यदवतारितं वचः स संग्रहकारस्य स्वकः सन्दर्भः। संग्रहकारस्त्विवत्येवं यदुपक्रान्तं तदन्यदीयं वचः संग्रहकारमतस्य संग्राहकम्। इत्थं चैष भेदः सूपपन्नो भवति। बृहती वृत्तिरेव हरिकृतिरिति चोपपादयति। यद्यपि हरिकालेपि संग्रहोऽस्तमुपागमत्तथापि व्याकृतिविद्यायाः परपारदृश्वनस्तस्य भगवतो नागो-

चरोभूदिति शक्यं श्रद्धातुम्। अर्वाञ्चो ग्रन्थकृतस्तु संग्रहवचनमुदाहर्तुं नापारयन्निति न कल्पनापोढम्। अतः शब्दस्य ग्रहणे हेतुरित्यत्रैवान्यत्रापि प्रमाणप्रस्तावकवचनानुपन्यास उक्तं चेति वा सामान्योक्तिर्लघ्वीकारस्य हरेर्दूरविप्रकृष्टस्य शोभते नाम। एवं हि संग्रहे पठ्यते इत्याद्युक्तिस्तु नार्थं कमपि प्रत्यपादयत्, संग्रहस्य चिरस्य लुप्तत्वात्। लघ्वीकारादीनां चात्यन्तमविदितत्वाच्चेत्यलं व्यासेन।

लघ्व्यां ग्रन्थान्तरप्रमाणानि तथा च श्रुतिरित्युक्त्वा प्रदेशेषु कतिपयेषु चर्चितानि बृहत्यां तु तान्येव तथा चाहुरित्युदाहृतानि। तथा हि। सत्या विशुद्धिः (१।९) इत्यत्र तदेतदेकं नैकं चेति वचनं प्राप्तरूपविभागायाः (१।१२) इत्यत्र च नामैवेदं रूपवत्त्वेनेति च लघ्व्यां श्रुतिवचनमभिमत्य पठितम्, बृहत्यान्तु सामान्यतया तथा ह्याहुरित्येवं तदुदाहृतम्। शब्दार्थयोः संवादेप्ययमुपोद्घातविसंवादः किन्निबन्धन इत्यवश्यवाच्यम्। वयन्तु पश्यामः सुदूरेण हरेर्विप्रकृष्टो लघ्वीकारो बृहतीगतमदो वचनजातं कुतस्त्यमिति पर्येषितुमपर्याप्नुवन् पुराणी भणितिरेषेति तदाद्रियमाणः तत्र श्रुतिबुद्धिं च कुर्वाणस्तच्छ्रुतित्वेन पपाठ। बृहतीकारस्तु मूलभूतवृत्तिकारो हरिः। स च तांस्तानाकरग्रन्थकर्त्तॄन् सुष्ठु वेदेति केवलं मनसैव ताननुसन्धत्ते न च नामतो निर्दिशति। श्रुतिवचनमेव लौकिकवचनत्वेन निर्दिष्टं बृहतीकारेणेति चेत्। नैतद् विचारसहम्। न हि श्रद्धावान्कश्चिद्द्विपश्चिदेवं गर्हितं समाचरेत्। अन्योपि नैवं व्यवहरेत् तथाप्रद्वेषे कारणाभावात्।

अन्यत्रापि बहुत्र लघ्वीकारस्याबोधेन विजृम्भितम्। इदं पुण्यमिदं पापम् (१।४०) इत्यत्राल्पमिति पदमपनीय तत्स्थाने सममिति पठति। श्रीमहाभारतगतोऽयं श्लोक इति कुमारिलो जयन्तभट्टश्च। उभावप्यल्पमिति विन्यासमङ्गीकुरुतः। कारिकाकोशेष्वप्येकत्रैवेत्थं पठितम्। अनाकरोऽयं पाठ आकरमविदुषा लघ्वीकारेणोपादायीति नातिचित्रम्। इदं तु विस्मयावहं यत्तत्कृतमर्थवैपरीत्यं तेन नालक्षीति।

लघ्वीकारो हि न केवलं वृत्तिं संहरति किन्तर्ह्यन्यथयत्यपि ताम्। बहुशोऽनर्थकत्वं च प्रसञ्जयति। अनादिनिधनम् (१।१) इत्याद्यायामेव कारिकायामक्षरमिति पदमित्थं व्याख्यातम्—तच्चानिमित्तत्वादक्षरम् इति। तच्चानादिनिधनमित्यनेनैव गतार्थम्। बृहत्यान्त्वेतद् व्याख्यानम्—तच्चाक्षरनिमित्तत्वादक्षरमिति। वादिदेवसूरिरपि स्याद्वादरत्नाकरे कारिकामिमां व्याचक्षाणोऽक्षरं चाकाराद्यक्षरस्य निमित्तत्वादिति वृत्त्या बहुसंवदन्त्यक्षराणि विन्यास्थत्।

लघ्वी वृत्तिर्हि नातीव शुद्धा। बहुला खल्वत्र सन्दर्भाशुद्धिः। लिपिकरप्रमादानुदर्शनं त्वनवसरग्रस्तमिति संक्षेप्तुः स्खलितानां दिगिह प्रदर्श्यते—भेदानां

बहुमार्गत्वम् (१।६) इत्यत्र एकविंशतिधा बह्वृचाम् इति पठति। अत्र बह्वृचामिति प्रामादिकम्। बह्वृचानामित्येव साधु। अनर्थकश्चायं विन्यासः। किमिदं यदेकविंशतिधेति विशेषितम्। अन्यच्च। प्रतिभामार्गा बहव इत्येवं भेदानां बहुमार्गत्वमिति मूलं विवृतम्। बृहत्यां तु तदेव प्रतिभागं बहवो मार्गा इत्येवमुद्द्योतितम्। अत्र लघ्वीपाठो मूलाननुगतो व्यर्थश्चेति जघन्येयं वृत्तिरनर्हा हरिकृतिर्भवितुम्।

बृहत्यां वृत्ताववतरणिका न सन्ति प्रायेण। यत्रापि क्वचित्सन्ति तत्राप्यस्ति स्वलक्षणम्। न ह्यासामन्त आहादिशब्दाः श्रूयन्ते। तद्यथा। शब्दः संस्कारहीनो यः (१।१४८) इत्यत्र कथम्भूताः पुनरपभ्रंशा इत्येवंरूपाऽवतरणिका। एवमेवेन्द्रियस्यैव संस्कारः (१।७९) इत्यत्रापि कथं पुनर्ध्वनिः शब्दोपलब्धिनिमित्तत्वं प्रतिपद्यते इत्यात्मिकाऽवतरणिका। परकीयं वचो व्याचक्षाणाष्टीकाकृतस्त्वाहाद्यन्तामेवावतरणिकां धरन्ते। अतस्तद्भिन्न इह विन्यासो योऽसौ कारिकाणां कर्ता स एव वृत्तेरपि प्रणेतेत्यनुमायां लिङ्गम्। लघ्व्यां वृत्तौ तु सर्वत्राहादिशब्दपर्यवसायिन्योऽवतरणिका इति वृत्तिरियं परकृतिरिति मतमुपष्टभ्नाति। किं चेमा अवतरणिकाः प्रायशो लघ्वीकारेण स्वयमुत्प्रेक्षिताः। क्वचित्तु बृहत्याः पूर्वपक्षनिबन्धेभ्य उपक्रमवाक्येभ्य उपसंहारवचनेभ्यो वा संगृहीताः। बुद्धिसौकर्यं हीदृशैरवतरणैः सम्पादितम्भवतीत्युपकृता लघ्वीकारेण पेलवधियः शास्त्रं प्रविविक्षवः। तदिदं नः प्रतिज्ञानं सनिदर्शनं सोपपत्तिकं च समर्थयामहे।

तस्याभिधेयभावेन (१।६६) इत्यादिकारिकात्रेतायां या अवतरणिका लघ्व्यां पठितास्ता बृहत्यामुपक्रमवचांस्येव मनाग्विपरिणतिभाञ्जि। सर्वोऽदृष्टफलानर्थान् (१।१४१) इत्यत्रापि स्थानव्यत्यासः सदृशश्च परिणामः। प्रागेव सत्योऽवतरणिका बृहतीकारेणार्वाचाऽन्यथयित्वा व्याख्यया सङ्कीर्य पठिता इति कः श्रद्धास्यति।

न चानित्येषु (१।९६) इत्यादिश्लोकत्रये प्रकाशकानां भेदांश्च (१।१००) इत्यत्र लघ्व्यां यो भूयानवतरणग्रन्थः स एव बृहत्यां पूर्वपक्षसन्दर्भः। समानैव चोभयत्र वर्णानुपूर्वी प्रायेण। इदमपि लघ्व्याः पश्चाद्भवत्वे मानम्।

अपरं चास्ति गमकं लघ्व्याः पाश्चात्यतायाः। लघ्वीकारो हि दुर्बोधाभिमतानि पृथक्पदान्यपि क्वचिद् व्याचष्टे, कारिकाशकलानि च पदशो व्याख्याति, सत्यामपेक्षायामन्वयप्रदर्शनपराणि वाक्यानि च योजयति, कारिकातात्पर्यार्थं च क्वचिदन्ते समासतोऽभिधत्ते। किं च बुद्धिसौकर्यापिपादयिषया प्रयुक्तः सभवान् बृहतीगतं प्रचिततरं वाक्यमपि विभज्य पठति।

पदव्याख्यानं तावद् अनुतन्त्रं वार्तिकं (१।२३), समाधानं चित्तस्यैकाग्र्यं (१।८०)सोढत्वमेकबुद्धिविषयत्वं (१।८३), कायवतां मूर्त्तानां (१।९७), सन्निपातात् प्रयत्नविशेषरूपकारणसम्बन्धात् (१।११०), प्रत्यवमर्शिनी प्रत्यवमर्शः सविकल्पज्ञानं तत्सम्पादिकेत्येवमादि (१।१२५) तत्र तत्र कृतम्। बृहत्यां तु नैतदास्थितम्। तेन लघ्व्याः परत्वमविवादं व्यवतिष्ठते। बृहत्याः परत्वे लघ्वीगतस्य पदव्याख्यानस्य परिहारे बीजाभावात्।

वाक्यानि वाक्यखण्डाश्च लघ्व्यां पदशोऽर्थापितानि। तथा हि। स्मृत्यर्थमनुगम्यन्ते (१।२६), अर्थप्रत्यायनाभेदे (१।२७), न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते (१।८३), तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः (१।९२), निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् (१।९३) इत्यत्र पदार्थप्रधाना लघ्वी वृत्तिः। अर्थप्रत्यायनाभेदे इत्येतत्तावल्लघ्व्यामेवं विवृतम्—अर्थप्रत्यायकत्वस्य तुल्यत्वेऽपि शास्त्राननुगता असाधव इत्यर्थः। बृहत्यान्तूत्तरार्धोऽयं स्पष्टत्वादस्पृष्टो व्याख्यया। न तु स ग्रन्थ इति च लघ्व्यां न तु प्रत्यावृत्त्या स ग्रन्थः श्लोकसमुदायात्मको भेदेन निरूप्यते इत्यर्थ इत्येवं व्याख्यातम्। तथैवेत्यत्रेयं लघ्वी वृत्तिः—तथैषामर्वाग्दर्शनानां प्रतिपत्तॄणां स्फोटविषयासु बुद्धिषु क्रम इत्यर्थ इति। बृहती त्वेवंविशिष्टा—तथैषामर्वाग्दर्शनानां प्रतिपत्तॄणां वाक्यस्वरूपग्रहणपूर्वकेण वाक्यार्थग्रहणेन प्रधानेन प्रयुक्तानां नियतोपाये साध्ये तस्मिन्नर्थे नियतक्रमपरिणामभागाकारप्रत्यवभासमात्रायुक्ता बुद्धयः प्रवर्तन्ते स्फोटेषु इति। निर्भागेष्वित्यत्रापि तादृशो विशेषो वृत्त्योः। लघ्वी तावद् एवं च तत्र पूर्वपूर्ववर्णाभिव्यक्तेरुपायत्ववत् निर्भागशब्दात्मग्रहणोपायो भागभेदकल्पनमित्यर्थ इत्येवंरूपा। बृहती तु निर्भागेषु वा भागभेदप्रकल्पनाकृतशक्तिविशेषपरिग्रहा बुद्धयो यथोपायत्वं प्रतिपद्यन्ते तदनन्तरश्लोकेषु वर्णितमित्याकारिका।

यत्र क्वचिद् व्यवहितविप्रकृष्टैः पदैः सम्बन्धो बालैर्दुरवधारस्तत्र कारुणिको लघ्वीकारः सुहृद् भूत्वाऽखिलां कारिकां तथा पठति यथा स्पष्टान्वया स्यात्। अध्याहितकलां (१।३), गुणः प्रकर्षहेतुर्यः (१।६५), भेदानुकारो ज्ञानस्य (१।८७) इत्यादिकारिकाणामन्वयः प्रदर्शितो लघ्व्यां न तु बृहत्याम्। छात्रहितप्रयुक्तेन लघ्वीकारेणान्वयो बृहत्यामसन्निहितो योजीति नितरां जाघटीति। संक्षिप्तां वृत्तिं प्रपञ्चयता केनापि धीमता प्रदर्शितोऽप्यन्वयः पर्यहारीति तु सुतरामसमञ्जसम्। तस्य तथाप्रवृत्तस्य लाघवं प्रत्यनादरात्।

लघ्वीकारः खलु क्वचिद् व्याख्यायामन्ते वाक्येन वाक्याभ्यां वा कारिकातात्पर्यमभिधत्ते। यथा—अनेकव्यक्त्यभिव्यङ्ग्या (१।९४), देशादिभिश्च (१।९७), न जात्वकर्तृकं (१।१३३), साधुत्वज्ञानविषया (१।१४२) इत्यत्र। शैली ह्येषाऽन्यदीयं ग्रन्थं व्याचक्षाणानां व्याख्यातॄणाम्। बृहत्यान्त्विदं पृथक् तात्पर्याभिधानं नालोक्यते। तच्च बृहतीकारो ग्रन्थकारादनन्य इति प्रत्याययति।

वाक्यभेदोपि लघ्व्यां यत्र तत्र कृतः प्रतिपत्तिसौकर्याय । तद्यथा । प्रत्येकं व्यञ्जका भिन्नाः (१।८९) इत्यत्र सामान्यमात्रया कयाचिदनुगतः प्रविभक्तकार्याणामपि शक्तीनामात्मा कुतश्चित्कार्यविशेषात्सङ्करेणैवावस्थित इति बृहतीगतमेकं वाक्यं लघ्व्यां कया चित्सामान्यमात्रयानुगतत्वात् (इति पूर्ववाक्यार्थे हेतुरपदिष्टः) । न च सामान्यमात्राणां शक्तिरूपाणामप्याश्रयभेदेन कार्यभेदेन च भेद एव । प्रविभक्तकार्याणामपि शक्तीनां कुतश्चित्कार्यविशेषात्सङ्करेणैव स्थितेः इत्येवं विभज्य पठितम् । अविकारस्य शब्दस्य (१।९५) इत्यत्रापि बृहतीगतमेकं प्रचिततरं वाक्यं लघ्व्यां विभज्य वाक्यद्वयेन पठितम् । तद्यथा । अन्ये त्वाकृतिव्यक्तिव्यवहारप्रक्रियावैधर्म्यादेकमेव शब्दतत्त्वं नित्यमलब्धपरिणामं स्वानिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिरनाश्रितं ध्वनिषु, प्रदीपादिप्रकाशन्यायेनासति वस्तुसम्प्रमोहे प्राप्तव्यञ्जकध्वनिविक्रियानुरागमुपलब्धरूपमिवाभिव्यज्यत इत्याहुरिति बृहतीग्रन्थो ऽन्ये त्वाकृतिमसहमाना एकमेव शब्दतत्त्वं नित्यं मन्यन्ते । तच्च स्वनिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिर्ध्वनिष्वनाश्रितमेव प्रकाशन्यायेन व्यञ्जकध्वनिरूपानुषक्तमेवाभिव्यज्यते । (यथा प्रकाशेन स्वानुषक्तमेव घटाद्यभिव्यज्यत इत्यर्थः) इत्येवं वाक्यखण्डाभ्यां विभक्तः । एवं यः संयोगविभागाभ्याम् (१।१०३) इत्यत्रापि तज्जातास्त्वित्यादेर्महतो बृहतीगतस्य वाक्यस्य लघ्व्यां त्रेधा विभागक्लृप्तिर्दृश्यते ।

इदमपि नाम विमृश्यं यत्रापि वृत्त्योः समानान्यक्षराणि तत्रापि लघ्वीकारो बहुषु प्रदेशेष्वित्यर्थ इति भाव इत्येवं वा व्याख्यामुपसंहरति । बृहत्यान्तु न तथेति किंहेतुकोयं विशेषः स्यादिति । वयं तु पश्यामः परकीयं वचो विशदयन्तो व्याख्यातार इदं वक्तुरभिप्रेतमिति विवक्षन्त इतिभाव इत्यादिनिवेशं कुर्वते । तदेषां शीलम् । यदि बृहती वृत्तिः पूर्वं लघ्व्येव सती पश्चात्प्रतानमापादितेति कल्प्येत तर्हि प्रतन्यमानायां लघ्व्यां पूर्वोक्तः संनिवेशः किमित्युपेक्ष्येत । प्रयोजनमनुद्दिश्य मन्दस्याप्यप्रवृत्तेः ।

अपरमप्यस्ति विचार्यम् । लघ्वी वृत्तिः कचित्प्रदेशे समानाक्षरापि सती बृहतीगतं शास्त्रे परिभाषितं दुर्गमाभिमतं पदमपनीय तत्स्थाने लौकिकैरादृतं पदान्तरं प्रयुङ्क्ते । तद्यथा । यथा प्रयोक्तुः प्राग्बुद्धिः (१।५४) इत्यत्र तस्माच्छेषिभावकाष्ठामनुभूय सर्वार्थयोनयः सर्वे शब्दाः शेषभावमर्थेषु प्रतिपद्यन्ते इति बृहद्वृत्त्युपसंहारः । लघ्व्यान्त्वेष उपसंहारः—तस्मात् प्राधान्यमनुभूय सर्वार्थयोनयः सर्वे शब्दा गुणभावं प्रपद्यन्ते इति । अत्र लघ्वीकारो बृहतीगतौ शेषशेषिशब्दावपोद्धृत्य तत्स्थाने गुणप्रधानशब्दौ प्रयुङ्क्त इति प्रतीयते । विपरीतकल्पनं तु न न्याय्यम् । शेषशेषिशब्दौ हि शास्त्रीयौ, गुणप्रधानशब्दौ तु लौकिकौ । लोकप्रसिद्धि व्यवहारस्यापेक्षमाणेन लघ्वीकारेण तौ व्यवहृताविति नायमर्थः संशयदोलामारोहति । अतोऽनिर्ज्ञात० (१।५८) इत्यत्रापि बृहत्यां विषयोपलब्धौ शेषभावमुपगच्छन्तीत्युपसंहारवाक्यस्य स्थाने लघ्व्यां तद्ग्राह्यविषयोपलब्धौ तानि विशेषणभावम्प्राप्नुवन्तीत्यर्थ इति पाठः । अत्रापि शेषशब्दो विशेषणशब्देन व्याख्यात इति नापरोक्षं प्रेक्षावताम् ।

अन्यदपि विवेच्यम् । लघ्वीकारो हि न स्वयं कचिदप्यात्मनि ग्रन्थकारत्वमध्यस्यति, न चान्यः कश्चित्तत्र तदारोपयति । न चापि तदनुमायां लिङ्गमस्ति । लघ्वी वृत्तिर्नार्हति हरिकृतिर्भवितुमिति निर्णीतोप्यर्थः स्थूणाखननन्यायेन मानान्तरेण प्रकारान्तरेण चोपोद्बलयते । लघ्वीकारस्तावद् वितर्कितः पुरा (१।४८) इत्यस्याः कारिकाया वृत्तिमारचयन्यदाह क्रमिके ध्वनौ प्रतीयमानेऽप्रसञ्जातवदुपलभ्यते । प्राप्तविवर्तेन नादात्मना तद्विवर्तानुसारेणाप्राप्तविवर्तमपि विवर्तमानमिव गृह्यत इति वार्थः इति तन्नाम तस्य च हरेश्च भेदं सम्यक् स्फोटयति । अत्र लघ्वीकारस्याविस्पष्टो ग्रन्थाशय इतीति वार्थ इति तदुक्तिरेवावगमयति । न च ग्रन्थकारः स्वके ग्रन्थे विकल्पते यावन्न विचेतीभवति । अन्यदीये तु सन्दर्भे वक्तुरभिप्रेतस्यासंविदाना विकल्पयन्त्यर्थान्व्याख्यानाभिनिवेशिन इति निरूढम् । तेन बृहत्येव कारिकाणां कर्तुः कृतिरिति सिद्धमिष्टम् ।

बृहत्येव हरेर्वृत्तिर्न लघ्वीत्युपपादितम् ।
न्यक्षेण च प्रमाणैश्च तज्जुषन्तां मनीषिणः ॥

इत्युपोद्धातः ॥

———

काश्मीरेष्वतिविख्यातं स्रोतोऽक्षय्यबलाह्वयम् ।
यस्याद्य स्यन्दमानस्य सन्ततं शतशः समाः ॥१॥
यदीयं विमलं वारि निपीयायाति कल्यताम् ।
आमयावी जनः क्षिप्रं चिरं वार्तं च जीवति ॥२॥
तत्र रम्यं नृपोद्यानं स्मरै रम्यतरं कृतम् ।
मन्दैः सुगन्धिभिश्शीतैः समीरैश्च समीरितम् ॥३॥
प्रारिप्सितस्य सिद्ध्यर्थं घर्मार्तेश्च जिहीर्षया ।
समागत्य प्रदेशं तं स्रोतःपाथःपिपासया ॥४॥
भूरन्ध्रग्रहचन्द्राब्दे निवासं तत्र कुर्वता ।
चार्वीयं चारुदेवेन भूमिका रचिता मया ॥५॥

———

अथ प्रथमकाण्डे प्रमेयसमुच्चयः ।

	पृष्ठाङ्कः
ब्रह्मणः स्वरूपनिरूपणम्	१
ब्रह्मणः प्राप्त्युपायनिर्देशः	१३
वेदस्य स्वरूपकथनं तन्माहात्म्यानुकीर्तनं च	१५
व्याकरणवर्णनम्	२२
शास्त्रव्यवस्थाकथनद्वारेण प्रकरणोपोद्घातः	२९
अभिधेयप्रदर्शनं प्रकरणप्रयोजनकथनं च	३६
साधुशब्दानां धर्माङ्गताभिधानम्	४४
शब्दानामनादित्वसाधना	४४
साधुशब्दानां धर्माङ्गतायां हेतूपन्यासः	४५
आगमादेव धर्मप्रसिद्धेः कथनम्	४६
आगमस्याव्यवच्छिन्नत्वं तर्काबाध्यत्वं च	४६
अर्थाधिगमेऽनुमानस्यासामर्थ्यवोपगम्	४७
अनुमाने व्यभिचारदर्शनात्तदनादरः	४९
प्रत्यक्षानुमानव्यतिरिक्तप्रमाणप्रतिपादनम्	५०
प्रत्यक्षानुमानागमव्यतिरिक्तप्रतिपत्तिपरिग्रहः	५१
प्रसिद्धप्रत्यक्षाद् व्यतिरिक्तस्य प्रमाणान्तरस्य कथनम्	५१
आगमस्य प्रत्यक्षवदनाशङ्कनीयताशंसनम्	५२
श्रुतिस्मृतिलक्षणस्यागमस्य हेतुवादाबाध्यत्वकथनम्	५३
शब्दस्वरूपसंशब्दनम् । तत्र तावद् एको निमित्तमपरः प्रत्यायक इति द्वैविध्यकथनं च	५५
निमित्तभावस्य व्याख्यानम्	५७
एकोपि स्फोटः संसर्गिणो नादस्य भेदरूपमुपसंगृह्णातीति सनिदर्शनमुपपादितम्	५८
अर्थाभिधानप्रकारनिरूपणा	६०
शब्दस्यार्थवत्क्रियाङ्गतानिषेधः	६३
शब्दस्य ग्राह्यग्राहकभावेन स्थितिरविरुद्धेति कथनम्	६३
उच्चार्यमाणस्य न कार्यभाक्त्वमित्यत्र हेतुदृष्टान्तोपन्यासः	६७
अभिधेयान्तरप्रविवेकेप्यभिधानस्य स्वरूपेणाप्रविवेकदर्शनम्	७०
शक्तिभेदकल्पनया स्वं रूपमिति सूत्रार्थं वर्णयित्वा जातिव्यक्तिभेदेनान्यथा व्याख्यानम्	७२
केचिदेकशब्दत्वमास्थिताः, अपरे नानात्ववादिन इति वादविकल्पः	७४
स्वरूपाभिमतस्यैकत्वस्य वर्णना	७४
एकत्वनानात्वोभयदर्शनस्य शास्त्रे व्यवहारहेतुत्वाङ्गीकारः	७६
नित्यपक्षे स्फोटस्य कालभेदाभावेऽपि ग्रहणोपाधिभेदेन वृत्तिभेदोपपत्तिः	७७
ध्वनिद्वैविध्यकथनम्, प्राकृतध्वनिकाल एव स्फोटेऽध्यारोप्यत इति प्रतिपादनं च	७८
वृत्तिभेदस्य वैकृतध्वनिजन्यत्वकथनम्	७९
ध्वनयो यथा स्फोटोपलब्धिनिमित्तत्वं प्रतिपद्यन्ते तत्र दर्शनत्रितयम्	८०
ध्वनीनामभिव्यञ्जकत्वेऽपरं दर्शनत्रयम्	८२
तत्राकारपरिग्रहक्रमवचनम्	८४
अत्यन्तविलक्षणा ध्वनय आत्मरूपनिवेशनेन स्फोटमवद्योतयन्तीत्यत्रापदेशनिर्देशः	८९
बुद्धिक्रममन्तरेण स्फोटप्रतिपत्त्यसामर्थ्ये बौद्धक्रमस्य नैयत्योक्तिः	९१
जातिरेव स्फोट इति दर्शनान्तरोपन्यासः	९३
आकाशगत एकः स्फोटवर्ण इत्येकीयं दर्शनम्	९३
ध्वनीनामभिव्यञ्जकत्वपक्षे स्फोटानित्यत्वादिदूषणपरिहारः	९४
कार्यपक्षे ध्वनिस्फोटभेदप्रदर्शनम्	९८
प्राकृतवैकृतनादयोर्विशेषाख्यानम्	९९
वायोरणूनां ज्ञानस्य च शब्दत्वापत्तिरिति दर्शनभेदकथनं शब्दनिष्पत्तिप्रक्रियावर्णनं च	१०२
शब्दनिष्पत्तावपरं दर्शनम्	१०५
शब्दमाहात्म्यवर्णनम्	१०६
भावानां भेदावबोधस्य शब्दशक्तिनिबन्धनताकथनम्	१०७
उत्पत्तावपि शब्दकारणताख्यानम्	१०८
इतिकर्तव्यतापि शब्दव्यपाश्रयेत्यभ्युपगमः	१०९
शब्दनिष्पादनेपि पूर्वशब्दभावनायाः कारणताकथनम्	११०
ज्ञानस्य शब्दानुस्यूतत्वदर्शनोपन्यासः	१११
वाक्यप्रकल्पितवस्तुविषयदर्शनान्तरानुक्रमः	११६
आगमान्तराणां विच्छेदे त्रय्येव बीजभूतावतिष्ठते, सैव च सर्वैरागमिभिः प्रमाणत्वेनोपेयेति प्रतिपादनम्	११९
मीमांसास्थापितस्य तर्कस्य प्रामाण्यम्	१२१
तर्ककृतोर्थप्रकरणादिविभागः शब्दसमय एवेति बोधनम्	१२३
व्याकरणागमस्य स्मृतिरूपत्वाभिधानम्	१२५
व्याकरणस्मृतेः सर्वशब्दनिबन्धनत्वकथनम्	१२६
अपभ्रंशस्वरूपनिरूपणम्	१३४
असाधवः साधुप्रणाडिकयार्थं प्रत्याययन्ति न तु साक्षादिति तेषां पर्यायतानभ्युपगमः	१३५
असाधूनामपि प्रसिद्धिमागतानां साक्षाद्वाचकत्वस्याङ्गीकारः कैश्चित्, तन्निरासश्च	१३६

२४

अनादिनिधनं ब्रह्म शब्दतत्त्वं[1] यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥१॥[2]

सर्व[3]परिकल्पातीततत्त्वं भेद[4]संसर्गसमतिक्रमेण समाविष्टं सर्वाभिः शक्ति-

[टीका]—द्वावुपादानशब्देषु (१।४४) इत्यतः प्रभृति प्रकरणं प्रवर्तिष्यते । तस्य त्वनाख्यातसम्बन्धाभिधेयप्रयोजनस्य प्रेक्षापूर्वकारिणामनुपादेयतैव स्यादिति ते कथयितव्याः । तत्र सम्बन्धः प्रकरणप्रयोजनयोर्हेतुहेतुमद्भावलक्षणस्तदन्तर्गतत्वान्न पृथगुक्तः । प्रकरणं हि शब्दादिपदार्थानुगमकं, तस्य तत् फलम् । मोक्षस्तु पारम्पर्येण । ताभ्यां च सहास्य हेतुहेतुमद्भाव इति । अभिधेयदर्शनाय तु अपोद्धारपदार्था ये इत्यादिकारिकाद्वयम् । स्मृत्यर्थमनुगम्यन्ते इति प्रकरणप्रयोजनम् ।

अनादिनिधनम् इति कालप्रदेशकृतपरिच्छेदाभावप्रकाशनाय । ब्रह्मेति नामकथनम् । शब्दतत्त्वमिति स्वरूपकथनम् । यदक्षरं विवर्ततेऽर्थभावेनेत्यनेन ब्रह्मणः सकाशाच्छब्दार्थयोरभेदकथनम् । प्रक्रिया जगतो यतः इति । अस्य चिद्रूपस्य विवर्तस्य प्रधानं परमाणवोऽन्यद्वा न निमित्तम्, अपि तु ब्रह्मैवेति दर्शयति ।

यद्यपि च सकृदुपात्ताऽनादिनिधनश्रुतिस्तथापि कारिकाविवरणग्रन्थादवसीयते अर्थद्वयाङ्गीकरणेन शास्त्रकृतोपात्तेति ।

तद्विवृणोति—सर्वेति । परिकल्पनं परिकल्पः । असत्यपदार्थावभासप्रत्ययः । परिः सर्वतो

१ शब्दब्रह्मतत्त्वम्—वा० दे० सू०.
२ इयं कारिका कमलशीलेन तत्त्वसंग्रहपञ्जिकायां १२८ तम कारिकाव्याख्यायां, जयन्तभट्टेन न्यायमञ्जर्यां ५३१ तमे पृष्ठे, अभयदेवसूरिणा संमतितर्कप्रकरणे षष्ठगाथाव्याख्यायां, वादिदेवसूरिणा स्याद्वादरत्नाकरे (१।७), रामकण्ठाचार्येण च स्पन्दकारिकासु (४।१८) संगृहीता व्याख्याता च कमलशीलेनोद्दिष्टपूर्वाभ्यामार्हतमतानुगाभ्याञ्च । तत्र वादिदेवसूरिरित्थं व्याचष्टे—अनादिनिधनं हि शब्दब्रह्म उत्पादविनाशाभावात् । अक्षरं चाकाराद्यक्षरस्य निमित्तत्वात् । अनेन वाचकरूपता । अर्थभावेनेत्यनेन तु वाच्यरूपता सूचिता । प्रक्रियेति भेदाः । शब्दब्रह्मेति नामसंकीर्तनमिति । संमतितर्कप्रकरणेऽप्येवम् । शान्तरक्षितस्त्वस्याः कारिकाया अर्थं स्वोपज्ञकारिकयाह—

नाशोत्पादासमालीढं ब्रह्म शब्दमयं परम् ।
यत् तस्य परिणामोयं भावग्रामः प्रतीयते ॥

३ व्यवहाराती०—घ २.
४ संसर्गयोः—घ २.

भिर्विद्याविद्याप्रविभागरूपमप्रविभागं कालभेददर्शनाभ्यासेन मूर्त्तिविभागभावनया च व्यवहारानुपातिभिर्धर्माधर्मैः[1] सर्वास्ववस्थास्व[2]नाश्रितादिनिधनं ब्रह्मेति प्रतिज्ञायते । न हि कार्यकारणात्मकस्य विभक्ताविभक्तस्यैकस्य ब्रह्मणः सर्वप्रवादे[3]ष्वपूर्वापरे प्रवृत्तिनिवृत्तिकोटी परिसंख्यायेते । न चास्योर्ध्वमधस्तिर्यग्वा मूर्त्त[4]परिवर्तप्रत्यङ्गानां क्व[5]चिदवच्छेदोऽभ्युपगम्यते । तं[6]तु भिन्नरूपाभिमतानाम[7]पि

भावे । धर्मधर्म्यादिरूपेण योऽयमभूद् भवति भविष्यतीत्यादिप्रत्ययो यश्च गवादिप्रत्ययो भेदाभेदभावादिप्रत्ययश्च, एतान्परिकल्पानतिक्रान्तं रूपमस्य । भेदसंसर्गसमतिक्रमेण इति । भेदो व्यतिरेकः । संसर्ग एकत्वम् । एतद्द्वयसमतिक्रमेण ताभिः शक्तिभिरध्यासितम् । शक्तयश्चैता यदि ब्रह्मणः सकाशात्तत्त्वान्यत्वाभ्यामनिर्वचनीयाः, न तर्हि शशविषाणवत्सन्ति । सतोऽवश्यं तत्त्वान्यत्वान्यतरपक्षानुषङ्ग इत्यत आह—विद्याविद्याप्रविभागरूपम् इति । विद्याविद्ये एव प्रविभागो विद्याविद्याप्रविभागः । प्रविभागो नानात्वम् । तद्रूपं तस्येति । विद्याविद्याशक्तिद्वयसमन्वयात्तथोच्यते ।

एतदुक्तं भवति—विद्यारूपमङ्गीकृत्योक्तं—सर्वविकल्पातीततत्त्वमिति । अविद्यानिबन्धनरूपमङ्गीकृत्योक्तं—समाविष्टं सर्वाभिः शक्तिभिरिति ।

एवं तावदविवर्तावस्थायां सर्वपरिकल्पातीतत्वमेवानादिनिधनत्वं कथितम् । विवर्तावस्थायामप्यनादिनिधनत्वं प्रतिपादयितुमाह—अथ वा सत्यमविद्यावशाद्विषयपरिच्छेदम् । ते तु विषयाः किं सत्या एवेत्याह—कालभेददर्शनाभ्यासेन इति । तत्र कालभेदो युगे भवति न भविष्यतीति । तस्य दर्शनमनुभवः । तस्याभ्यासः पुनः पुनरुत्पत्तिः । मूर्त्तिविभागभावनया इति । विभज्यत इति विभागः । मूर्त्तिश्चासौ विभागश्च मूर्त्तिविभागः पृथक्त्वम् । तस्य भावना ज्ञानाभ्यासः । एतदुक्तं भवति—अनादौ संसारे कालभेददर्शनं यदभ्यस्तं तत्संस्कारपरिपाकात्स कालोपाधिको व्यवहारः, परस्परतो विभक्तरूपाश्च गवादयो मूर्तिमन्तः पृथग्देशग्रहणासकृत्परिच्छिन्नाः । तेन देशभेदोपाधिकः, न गवादितत्त्वनिबन्धनः । तेषां ब्रह्मणः सकाशात्तत्त्वतोऽव्यतिरिक्तानां कुतो देशकालकृतो विभागः । तथा हि ब्रह्मविद आहुः—प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च इति ।

व्यवहारानुपातिभिः इति । एवं ये व्यवहारमनुपतन्ति । धर्माधर्मशब्देन विकारा गवादय उच्यन्ते । उत्पादव्ययौ वा । तैरेव यद् व्यवह्रियमाणमप्यादिनिधने नाश्रयति न प्रतिपद्यते तद् ब्रह्मेति प्रतिज्ञा । इत्थम्भूतलक्षणे वा तृतीया । अपूर्वापरे इति । कोटिर्मर्यादा । [अपूर्वा] यस्यां कार्योत्पादात्पूर्वं न किञ्चिदासीत् । अपरा निवृत्तिमर्यादा यस्याः परं नास्ति । ते प्रवृत्तिनिवृत्तिमर्यादे अपूर्वापरे न संख्यायेते ।

१ धर्मैः—ट.
२ सर्वास्ववस्थासु अनादि०—घ, ङ.
३ वादेषु पूर्वा०—घ, ङ.
४ मूर्त्ति०—ट.
५ क्वचित्कचिद—ट । क्वचित्कश्चिद—ठ.
६ तच—ट.
७ ०मतानां—ट.

विकाराणां प्रकृत्यन्वयित्वाच्छब्दोपग्राह्यतया शब्दोपग्राहितया च शब्दतत्त्वमित्यभिधीयते। स्थितिप्रवृत्तिनिवृत्तिविभागा हि शब्देनाक्रियन्ते। तच्चाक्षरनिमित्तत्वादक्षरमित्युच्यते[4]। प्रत्यक्चैतन्येऽन्तः संनिवेशितस्य परसंबोधनार्था व्यक्तिरभिष्यन्दते। एवं ह्याह—

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम्।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि संनिविष्टाम्॥१॥

विवर्ततेऽर्थभावेन। **एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः। स्वप्नविषयप्रतिभासवत्। उक्तं च**—मूर्त्तिक्रियाविवर्तौ अवि-

नन्वु सर्वपरिकल्पातीततत्त्वं तत् कथं शब्दतत्त्वमित्युच्यत इत्याह--**विकाराणां प्रकृत्यन्वयित्वात्** इति। विकारा हि प्रकृतिरूपेणान्विता दृष्टाः। यथा शकलकपालामत्रभूषणानि। रूपादयश्चैते शब्दरूपानुगता दृश्यन्त इति प्रकृतिभूते ब्रह्मणि शब्दापदेशः।

ननु च भिन्नेन्द्रियग्राह्या भिन्नरूपादयः कथमेकरूपानुगता इत्याह--**भिन्नरूपाभिमतानामपि** इति। भिन्नरूपा इत्यभिमताः। अविद्यावशादभिमानमात्रं तदित्यर्थः। **शब्दोपग्राह्यतया** इति। शब्द उपग्राह्यः स्वीकर्तव्योऽस्येति। शब्दस्वभावस्य रूपाद्यात्मना विवृत्तेः शब्दः स्वीकृतो भवतीति।

अन्ये तु व्याचक्षते--तद्ब्रह्म शब्दतत्त्वमुच्यत इत्यत्र हेतुः शब्दोपग्राह्यतयेति **शब्दभावरूपस्वीकारात्**। ननु रूपादिस्वीकारोऽप्यस्तीति चोद्ये सत्याह--**भिन्नरूपाभिमतानामपि** इति। रूपादीनां भिन्नरूपतयाभिमतानाम्। **प्रकृत्यन्वयित्वात्** इति। यतो रूपादयो विकाराः प्रकृतिरूपेणान्विताः, प्रकृतिश्चैषां ब्रह्म। तच्च वाग्रूपमिति प्रतिपादयिष्यते। तेन रूपादयः सर्व एव शब्दरूपाः। त एवोपग्राह्या अस्येति। **शब्दोपग्राहितया** इति। शब्द उपग्राही अस्येति शब्दनिबन्धना प्रतिपत्तिस्तस्येति

१ न्वया०—घ, ङ.
जयन्तभट्टो न्यायमञ्जर्यां प्रकृतां कारिकामुदाहृत्याह—यत्तु नित्यं वा किञ्चिदुच्यते तच्छब्दतत्त्वमित्यत्र का युक्तिः। आह—शब्दोपग्राह्यतया च शब्दतत्त्वमिति।
२ इति न धृतम्—घ, ङ.
जयन्तभट्टस्याप्यविदित एष पाठ इति तदुदाहरणादिशा प्रतिभाति।
३ चावतिष्ठते—ट, ठ.
४ शब्देन क्रियन्ते—घ, ङ.
५ अक्षरम् इत्यस्येदं विवरणं वादिदेवसूरिणा यथातथमितः संगृहीतम्।
६ शब्द—घ २.
७ ०भिनिष्यन्दते—ट, ठ.
८ ०मभिष्यन्द०—नागोजिः, वाराणसेयसङ्ग्रहश्च.
९ पूर्तां—नागोजिः (मञ्जूषायाम्), वाराणसेयसङ्ग्रहश्च.
१० विद्या०—का०. एवं पठ्यमानं ग्रन्थान्तर्वेदिनां दर्शनं विरुणद्धीति नावधृत्य संगृहीता।

द्याशक्तिप्रवृत्तिमात्रं, तौ[1] विद्यात्मनि[2] तत्त्वान्यत्वाभ्यामनाख्येयौ। एतद्धि[3] अविद्याया अविद्यात्वम् इति। प्रक्रिया जगतो यतः। **तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणः सर्वविकारप्रत्यस्तमये [4]संवर्तादनाकृतात्पूर्वं विकारग्रन्थिरूपत्वेनाव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते। तथा ह्युक्तम्-**

यः सर्वपरिकल्पानामाभासे[6]ऽप्यनवस्थितः।
तर्कागमानुमानेन बहुधा परिकल्पितः॥१॥

शब्दतत्त्वम्। एतदुक्तं भवति—शब्देन हि तत्परिच्छिद्यते। तस्मिंश्च तत्परिच्छेदके ज्ञाने तद्रूपं संनिविष्टमिति वस्तुनः शब्दाकारज्ञानोत्पत्तेः शब्द उपग्राही स्वीकर्ता तस्य भवति।

अन्ये तु विपरीतं पठन्ति--शब्दोपग्राहितया शब्दोपग्राह्यतया इति। तेषामुपग्राहयितुं शीलमस्येति शब्दोपग्राहि। शब्देनोपगृह्यते प्रतिपाद्यत इति शब्दोपग्राह्यं, शब्दस्वभावेनावतिष्ठत इति। **शब्दतत्त्वम्** इति। इदमस्याविपरीतं रूपमिति।

अन्तः इति। न बुद्धेर्विषयाभावगमनेन संनिवेशः, किन्तु बुद्धितत्त्वाव्यतिरेकादिति। **संनिवेशितस्य** इति। तद्धि न क्वचित् संनिविष्टं, केवलमविद्यावशात्तथोच्यते इति णिचा व्यपदिश्यते। **व्यक्तिः** इति। वर्णसङ्घातः। **अभिष्यन्दते** प्रवर्तते।

पूर्वं रूपादिषु सूक्ष्मशब्दानुगमेन ब्रह्मणि शब्दतत्त्वाभिधानम्। इह तु स्थूलवर्णाकारत्वेनाक्षरव्यपदेश इति विशेषः।

अप्रविभक्ततत्त्वाम् इति। **अर्थो** हि तस्यामवस्थायां बुद्धेरव्यतिरेकवर्ती शब्दश्च। शब्दार्थशक्तयः सर्वा एव तत्र यौगपद्येनासते। अत एवार्थादभेदात्स्वगताभेदाच्चैका। **अनभिष्यन्दमानाम्**। यदा नाभिष्यन्दते न व्यज्यते। **अन्यामिव** इति। अभिधेयात्। असत्यत्वाच्च भेदस्येवशब्दः। **तत्त्वादप्रच्युतस्य** इति। प्रायेण च पदार्थाः पटादयोऽन्यस्य कुसुम्भादे रूपमुपगृह्णन्तः स्वरूपपरित्यागेन दृष्टाः स्फटिकादयश्चोपरागरूपम्। इह तु तथा न। अन्यरूपोपग्रहेऽपि न तत्स्वरूपच्युतिरिति। कथं भिन्नानेकजातीयपदार्थरूपं प्रतिपद्यत इत्याह--**भेदानुकारेण** इति। यदि परमार्थतोऽनेकाकारताभ्युपगमः, कुतोऽविरोधः। यतस्तु भेदप्रत्यवभासयोग्यताप्रभावाद्भिन्नमिव प्रत्यवभासते न भिन्नम्, अपि तद्भेदमनुकरोतीति वेति। **स्वप्नविषयप्रतिभासवत्** इति। यथा स्वप्नावस्थायां ज्ञानक्षण एक एव भिन्नजातीयानेकपदार्थावभासी जायते। न च तस्य स्वरूपभानम्। अनुभवरूपत्वात्। उत्थितस्य च स्मरणात्।

मूर्तिक्रियाविवर्तौ इति। देशभेदावग्रहरूपेणावस्थानं मूर्तिविवर्तः। उत्पादविनाशादिक्रियोपहितरूपावस्थानं क्रियाविवर्तः। **अविद्याशक्तिप्रवृत्तिमात्रम्** इति। यावदविद्या स्वं कार्यं विपर्या-

१—१ मात्रगतौ—का०। मात्रकौ—ट.
२ ०निष्ठरूपौ—का०.
३ अतोनन्तरं तद् इत्यधिकम्—ट.
४ वर्तमानाद्—का०। संवृत्तात्—ट, ठ.
५ व्याकृतात्—का०.
६ भासो—घ. ङ। ०भासे—ट, ठ.

व्यतीतो भेदसंसर्गौ भावाभावौ क्रमाक्रमौ ।
सत्यानृते च विश्वात्मा प्रविवेकात्प्रकाशते ॥२॥
अन्तर्यामी स भूतानामाराद्दूरे च दृश्यते ।
सोत्यन्तमुक्तो मोक्षाय मुमुक्षुभिरुपास्यते ॥३॥
प्रकृतित्वमपि[1] प्राप्तान्विकारानाकरोति[2] सः ।
ऋतुर्धा[3]मेव ग्रीष्मान्ते[4] महतो मेघसंप्लवान् ॥४॥
तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते ।
[5]अङ्गाराङ्कितमुत्पाते वारिराशेरिवोदकम् ॥५॥
तस्मादाकृतिगोत्रस्थाद्[6] व्यक्ति[7]ग्रामा विकारिणः ।
मारुतादिव जायन्ते वृष्टिमन्तो बलाहकाः ॥६॥

साख्यं न जनयति तावच्छक्तिरित्युच्यते । तस्याः प्रवृत्तिर्विपर्ययः । तावत्तूपदर्शनम् । प्रक्रियेति प्रथमत उत्पत्तिः । जगत इति सकलागमोपलक्षणम् । सर्वविकारप्रत्यस्तमये इति । सर्वशब्देन महाप्रलयमाह । तत्र न का चिन्मात्राऽवशिष्यते इति । संनर्तात् इति । सकलविकारग्रामस्य तत्रैकीभावात् । अनेकस्यैकत्रोपसंहारः संवर्तः । जनपदः संवर्तत इति यथा । अनाकृताद् इति । आकरणमाकृतम् । नपुंसके भावे क्तः । परस्परविवेकेन पदार्थावधारणम् । तदा च सर्वेषामेकत्रोपसंहारात् तन्नास्ति । पूर्वं विघर्तावस्थायाम् । ग्रन्थिशब्दोन्यत्र यद्यपि विकारवचनस्तथापि विकारशब्देन सह प्रयुज्यमानोऽपेक्षितप्रवृत्तिनिमित्तो द्रष्टव्यः । ते हि बन्धहेतुत्वाद् ग्रन्थय इव विकाराः प्रतीयन्त इति ।

आभासेऽपीति गोचरे । अनवस्थितः न गोचरतां प्रतिपद्यत इति यावत् । लिङ्गमन्तरेण स्वयमुत्प्रेक्षाप्रतिभानं तर्कः । परतः श्रवणमागमः । परप्रतिपत्तिसाधनं लिङ्गतोनुमानम् । भावाभावाविति । अस्तित्वनास्तित्वे । विवृत्तसंवृत्ताकारोपहितत्वात् सतो भावरूपतां, सत्ताकारोपहितरूपनिराकरणरूपत्वादसतो ऽभावरूपताम् । अथवा दृश्यमानस्यासत्यत्वादन्यस्यानवधार्यमाणत्वेन सत्तामतिक्रान्तः, उपलभ्यमानत्वाच्चासत्ताम् । प्रकृतित्वमपि इति । य एते प्रधानपरमाणवादयोपि कारणं महदादीनां प्रकृतित्वं प्राप्ताः तानप्यसावेवाकरोति जनयति । अत एव चैते विकारशब्देनोक्ताः । न तु तैस्साङ्ख्यादिभिर्विकारत्वमिष्टं तेषाम् । ऋतुधामा इति । ऋतवो हेमन्ता-

१ प्रकृतित्वमनु—ट, ठ.
२ ०न्न्यक्करोति—घ, ङ । अत्र न्यक्करणस्याविवक्षितत्वान्नायं समञ्जसः पाठः । ०नाकरोति—च, ट, ठ.
३ ऋतुर्धामेव—घ, ङ । इदमशुद्धम् ।
४ धर्मान्ते—ट । घर्मान्ते—ठ.
५ अङ्गारकिणमु—घ. ङः । ०राङ्कित०—ट.बृहदारण्यकोपनिषद्भाष्यवार्तिके च । ०रकितमु०—ठ.
६ ०गोत्रस्था—कोशः । गोत्रस्थाद्—टीका.
७ व्यक्त—घ.

त्रयीरूपेण तज्ज्योतिः परमं परिवर्तते ।
पृथक्तीर्थप्रवादेषु दृष्टि[1]भेदनिबन्धनम् ॥७॥
शान्त[2]विद्यात्मकं[3] योंशः १ तदु[4] हैतदविद्यया ।
तया ग्रस्तमिवाजस्रं या निर्वक्तुं न शक्यते ॥८॥
सर्वतः परिवर्तानां परिमाणं न विद्यते ।
तस्यां[5] यां[6] लब्धसंस्कारां न स्वात्मन्यवतिष्ठते ॥९॥
यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
संकीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥१०॥[7]
[8]तथेदममृतं ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते ॥११॥
ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृत्तं शब्दमात्राभ्यस्तास्वेव प्रविलीयते ॥१२[9]॥१॥

दयः षट्, तेषां सारभूतं तेजो.... ऋतुधामा वर्षरात्रयः । संवत्सरो वा ऋतुः, तस्य सारभूता वर्षा[10] इति । व्याप्तिः संप्लवः । व्यापकमेघान् जनयति । तस्येति व्यपदेशिवद्भावेन पृथक्त्वापदेशः । तस्माद् इति ब्रह्मणः । आकृतिगोत्रस्थाद् इति । आकृतिः सामान्यम् । गोत्रं सादृश्यम् । तेन सामान्यसादृश्यास्थितादित्यर्थः । यथा हि जातिर्भेदेष्वनुगता तथेदमपि सर्वविकारानुगतामिति ।

ननूक्तमेतत्प्रकृतित्वमपि प्राप्तानित्यत्र । दर्शनभेदादिति के चित् । पूर्वत्र ऋतुधाम कारणमिति, इह तु मारुता इति । यद्वा पूर्वत्र विकारान्तरहेतोर्विकारजनकत्वं कथितम् । इह तु सामान्यतुल्यता कारणस्य कथितेति विशेषः ।

पृथक्तीर्थप्रवादेषु इति । य एते सांख्यादिप्रवादा एते त्रयीरूपेण विवृत्ता ब्रह्मणः प्रस्तूयन्ते । तेषां हि दृष्टिभेदानां तदेव निबन्धनम् । यथा वक्ष्यति—तस्यार्थवादरूपाणि निश्रिताः (१।८) इति । शान्तमिति सर्वप्रपञ्चविगमात् । तदु ह इति-उहौ शब्दौ निपातौ पादपूरणार्थौ । तस्याः इति । अवि-

१ दृष्ट—घ, ङ. इदमसाधु । दृष्टि—च, ट, ठ.
२ शान्त—घ, ङ. । ट इत्यत्र तु ग्रन्थपातः ।
३ ०विद्यात्मको —घ, ङ । ट, ठ इत्यत्र तु ग्रन्थपातः ।
४ तदुदैतद०—कोशः. अस्यासाधुत्वाट्टीकाकारेण एतः पाठोङ्गीकृतः ।
५ तस्यां—कोशः । तस्याः—च.
६ यो लब्धसंस्कारो—घ १, ङ । यालब्धसंस्कारात्—घ २ । या लब्धसंस्कारा-च, ट.
७ इदं स्याद्वादरत्नाकरे १।७॥ संगृहीतम् ।
८ तथैतदमृतं—ट । तथैवैतत्पृथग्—ठ.
९ अस्य श्लोकस्य टीकासन्दर्भात्प्रतीतिरियं जायते यद् इमं टीकाकृद्वृषभः कारिकायां कर्तुः कृतिं मन्यते ।
१० ऋतुधामा इति कालस्याख्या । कालसमुद्देशे रुतैर्मृगशकुन्तानाम् इत्यादिश्लोके हेलाराजेन तथैव व्याख्यातत्वात् ।

एकमेव यदाम्नातं भिन्नशक्तिव्यपाश्रयात्[1] ।
अपृथक्त्वेपि शक्तिभ्यः पृथक्त्वेनेव[2][3] वर्तते ॥२॥[4]

यावद्विकारविकारिविषयमेकत्वरूपं पृथक्त्वरूपं वा सर्वं तत्प्रकृत्येकत्वानतिक्रमेणेत्येतदाम्नातम् । तद्यथा—सलिल एवैको द्रष्टाऽद्वैत एक एवाभवत्[5] । तथा-सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[6] इति । पुनश्चाह—प्रणव एवैकस्त्रेधा[7]व्यभज्यत इति । तथा–असद्वा इदमग्र आसीत् । किं तदसदासीत् । ऋषयो वाव तेऽग्रे तद[8]सदासीत् । य ऋषयः प्राणाः[9] इति । भिन्न[10]शक्तिव्यपाश्रयात् । एकत्वस्या[11]विरोधेन शब्दतत्त्वे ब्रह्मणि समुच्चिता विरोधिन्य

योदिता, तत्र कृतसंनिधानतया, यथा बुद्बुददेशेषूदकं संनिहितमिति । का पुनस्सेत्याह—या लब्ध-संस्कारा इति । लब्धप्रबोधा । न स्वात्मनीति । यदा हि तस्याश्शक्तयो लब्धपरिपाका भवन्ति तदानेन परिकल्पितेनात्मना भासनात्स्वरूपप्रच्युतिरिव तस्या असत्यरूपेणावस्थानादिति । शब्दतत्त्वमित्यत्र हेतुमाह – ब्रह्मेदमिति । शब्दनिर्माणमिति । सर्वे रूपादयो विकाराः शब्दरूपतया निर्मीयन्तेऽनेनेति । कर्तरि बहुलवचनाल्ल्युट् । शब्दरूपतया रूपादयोऽनेन निर्मीयन्त इति तदनेन प्रकृत्यन्वय इति यदुक्तं तदाख्यातम् । शब्दशक्तिनिबन्धनमिति । शब्दस्य या शक्तिरभिधाख्या सा निबन्धनमस्य । यदुक्तं स्थितिप्रवृत्तिनिवृत्तिविभागा हीति तदाख्यातम् । अथवा ब्रह्मेदमिति विकारग्राममाह, अव्यतिरेकात् । ततः शब्दनिर्माणमिति शब्दतत्त्वनिर्माणं, तेन निर्मितत्वात् । शब्दशक्तिनिबन्धनमिति । शब्दशक्तयो यतस्तत्रासते प्रलीयन्ते वा तत्रैवेति ॥१॥

इदानीं ब्रह्मणः सर्वथा भेदरूपप्रतिषेधमाह–एकमेव इति । भिन्नशक्तिव्यपाश्रयाद् इति । शक्तयोऽत्र घटादयः पदार्थाः, योग्यता वा । ते च भिन्नरूपाः । ते च तस्यात्मभूता एवेति शक्तिव्यपाश्रयेणापि न तस्य भेदः । अथवा यद्यभिन्नं कथमयं भेदव्यवहार इति चोद्ये सत्याह —भिन्नशक्तिव्यपाश्रयादिति ।

१ भिन्नं—क १.२.३.४.५.६.७, ख १, ङ, ग १.३.४, का०. टीकाकृत्तु भिन्नशक्ती-त्यादि समस्तमेव पठति व्याख्याति च । तथैव चेष्टं कारिकायां कर्तुरिति विवरण-ग्रन्थादवसीयते ।
२ पृथक्त्वेन विवर्तते—क१ । पृथक्त्वेन च वर्तते—क ४.७.
३ ०नैव—ग १.३, घ.
४ अस्य प्रथमः पादो हेलाराजेन द्रव्यसमुद्देशे विकारापगमे इत्यादिश्लोकव्याख्यायां सं-गृहीतः ।
५ सलिलमेवाद्वैतमेकमेवाभवत्—ट, ठ ।
बृ० उ० ४।३।३२॥ तत्र मात्रया भिद्यते ग्रन्थः ।
६ छा० उ० ६।२।१॥
७ विभज्यते—ङ, ट.
८ सदसदसी—घ, ङ । सदासन्–ट. ब्राह्मण-गतः पाठस्तु धृतः । एकवचनस्य ज्याय-स्त्वात् ।
९ श० ब्रा० ६।१।१।१॥
१० भिन्नं—घ, ङ । इदमुपेक्ष्यं विवरणेन विरोधात् ।
११ ०स्य बाधेन—ट.

आत्मभूताः शक्तयः । तद्यथा भिन्नार्थप्रत्यवभासमात्रायामेकस्यामुपलब्धा[1]वर्थाकारकप्रत्यवभासमात्राः पृथिवीलोका इति । न हि ज्ञेयगतो वृक्षाद्याकारावग्रहो ज्ञानस्यैकत्वेन विरुध्यते । नास्याकारात्तदाकारस्यात्मभेदोस्ति । तेषामेकज्ञानतत्त्वा[3]नतिक्रमात् । तदेवमपृथक्त्वं पृथक्प्रत्यवभासानामपि मिथः सर्वशक्तीनाम् । अपृथक्त्वेपि शक्तिभ्यः इति । न खलु जातिव्यक्तिव्यवहारवदन्याः काश्चिच्छक्तयो ब्रह्मणो व्यतिरेकिण्यो विद्यन्ते । तत्तु[4] प्रकाशवत्प्रकाश्यावग्रहाभ्यो बहिस्तत्त्वाभ्य इवात्ममात्राभ्यस्ता[5]दात्म्येपि सति पृथक्तत्त्वमिवावसीयत इति ॥२॥

यावद्विकारविकारिविषयम् इति । विकारः कार्यं विकारि कारणम् । प्रकृत्येकत्वानतिक्रमेण इति । द्विविधमेकत्वं प्राकृतं वैकृतं च । तत्र वैकृतं यद्वपक्षे कार्यकारणगतमेकत्वसंख्यायोगेन । प्राकृतं यद् ब्रह्मविषयं भेदव्यवच्छेदमात्रं न त्वेकत्वसंख्यायोगेन ।

सलिलशब्देन ब्रह्मोच्यते । अभेदोपलक्षणार्थश्चाद्वैतशब्दः, न तु द्वित्वमेव निषिध्यते । एतदुक्तं भवति—भेदव्युदस्तेन रूपेण स्थितमिति । त्रिधेति त्रिभिः प्रकारैः ऋग्यजुःसामरूपैः । अत्राविवृत्तं ब्रह्म प्रणवशब्देनोच्यते । प्राणाः इति । सप्त प्राणा विकारभूतास्तस्य । ते चासदित्युक्ताः । यदा प्राणाः सर्वे चेतनावन्तः प्राणिनो विकारा उच्यन्ते, ते चासदिति कथयता तस्यैकत्वं प्रकृतिरूपानुषङ्गश्च विकारेषु कथितः । समुच्चिताः इति । समुच्चयेन व्यवस्थिताः । एकजातीयत्वेन ताश्शक्तयो ब्रह्मण एकत्वं न विरुन्धन्तीत्याह । विरोधिन्यः इति । विरोधिसदसत्कार्योदयानुमीयमानवैलक्षण्या विरोधिप्रत्ययानुमीयमाना नानात्वाधानाः शक्तय इति ।

कथं पुनरभिन्नस्य वस्तुनस्तद्रूपापरित्यागेन भिन्नरूपतेत्यनुमानविरोधेनागमस्याप्रामाण्य उद्भाविते ऽनैकान्तिकतामाह—भिन्नार्थप्रत्यवभासमात्रायाम् इति । भिन्नस्य विलक्षणस्यार्थस्य प्रत्यवभासमात्राः प्रत्यवभासव्यक्तयो यस्यां बुद्धौ तस्या येर्थाः तेर्थानुरूपाः प्रत्यवभासाः प्रतिबिम्बकाः । ते न बुद्धिरूपमेकत्वमतिवर्तन्ते । तां चानेकाकारतामुदाहरणेनाह—पृथिवीलोकाः इति । पृथिवीशब्देन चात्र नेयमवयविद्रव्यभूता महापृथिवी दृष्टान्तत्वेनोपात्ता, यतस्तत्परिच्छेदिकाया बुद्धेरभिन्नाकारत्वान्न प्रकृतोपयोगः । यत्तु पृथिव्यवयवेषु वृक्षादिषु लोकावयवेषु च देवदत्तादिष्वनेकाकारि ज्ञानं तदुपात्तं तद्रूपाचष्टे—न हि इति । ज्ञेयगतः इति । ज्ञेयं विषयः । तत्संबन्धित्वादेवमुच्यते । अन्यथाकारो ज्ञेयगतः, तदवग्रहो ज्ञानगत इति न स्यात्संबन्धः । ये तु ज्ञानगत इति पठन्ति तेषां सुगममेव । आत्मभेद इति स्वरूपभेदः । न खलु जातिव्यक्तिवद् इति । जातिसादृश्यं ब्रह्मणस्तेन चानुगमा-

१ मानायां०—घ, ङ. भ्रष्टः पाठः ।
२ भेदाकारा०—घ, ङ.
३ ०त्तातिक्रमात्—घ, ङ. अपपाठः । तत्त्वा-मतिक्रमात्—च, ट, ठ. तत्र ज्ञानस्य तत्त्वं वास्तवं रूपम् इति टीका ।
४ तत्तत्प्रकाश्यावग्रहेभ्यः—ङ । कोशा-न्तरे घ–संज्ञकेऽपि पाठभ्रंशः । तत्तत्प्रकाश्य-वत्प्रकाश्या०—ठ.
५ तादर्थ्येपि—घ, ङ । तादात्म्येपि—च, ट, ठ.
६ पृथक्त्वमिवा०—घ, ङ । पृथक्तत्त्वेनेवा०—ट, ठ. टीकापाठस्तूपात्तः ।

अध्याहितकला[1] यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥३॥[3]

कालाख्येन हि स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्टाः कालशक्तिवृत्तिमनुपतन्ति । ततश्च प्रतिभावं वैश्वरूप्यस्य प्रतिबन्धाभ्यनुज्ञाभ्यां शक्त्यवच्छेदेन क्रमवानिवावभासोपगमो लक्ष्यते । सर्वेषां हि विकाराणां कारणान्तरेष्वप्यपेक्षावतां प्रतिबन्धजन्मनामभ्यनुज्ञया सहकारिकारणं कालः । तस्य क्रमवद्भिर्मात्रारूपैः कर्तृशक्तिः प्रविभज्यमाना विकारमात्रागतं भेदरूपं तत्राध्यारोपयति तुलासूत्र इव संयोगिद्रव्यान्तरगुरुत्वप्रतिबन्धकाले दण्डलेखावच्छेदम् ।

द्विकाराणामपि व्यक्तितुल्यतेति । तत्र यथा तयोर्भेदस्तद्वादिह नास्तीति । कथं तर्हीत्याह—तत्तत्प्रकाशवत् । तदिति ब्रह्म । अपरस्तच्छब्दः पुनरर्थे । यथा सांख्यीयः प्रकाश एकः सर्वविषयाकारेण परिणममान एकाकारः । । न च ता वृत्तयः काश्चन व्यतिरेकिण्यः तस्माद्बहिर्भूताः, अथ भिन्ना इव ततोऽवगृह्यन्ते । एवं ब्रह्मणो विकारमात्रा इति । आरममात्राभ्य इति बुद्धिस्वरूपमाह । मात्रा इति वृत्तयः । पृथक्तत्त्वमिव इति । पृथक्तत्त्वमस्येति बहुव्रीहिः ॥२॥

अध्याहितकलाम् इति । अध्याहिता अध्यारोपिताः कला यस्याः । कला इति भेदः । जन्मादयः इति । जायते, अस्ति, विपरिणमते, विवर्धते, अपक्षीयते विनश्यतीति षडेते भावविकाराः । स्वातन्त्र्येण इति । स्वातन्त्र्यं कर्तृशक्तिः । पदार्थनिष्पादनोपसंहारयोग्या कर्तृशक्तिः । समाविष्टाः इति । तदधीनवृत्तयो वर्तन्ते । परतन्त्राः इति । कारणान्तराधीनवृत्तयः । तेन नित्यत्वात्सदा संनिधानेपि न सदा सर्वकार्यप्रसवः । कारणान्तराणां सदाऽसंनिधानात् । जन्मवत्य इत्युत्पत्तिमत्यः । तेनायमाकाशादीनां न कारणम् । प्रतिभावम् इति । यदेतदेकस्मिन्नर्थे वैश्वरूप्यं नानारूपता । यथैकस्मिन्वृक्षे किसलयादिवैचित्र्यम्, एकस्मिन्वा किसलये रक्तत्वमार्दवादिविशेषाः । प्रतिबन्धाभ्यनुज्ञाभ्याम् इति । यतः काचिच्छक्तिः प्रतिबध्नाति यथैकस्मिन्वृक्षे प्रथमतः किसलयस्याभ्यनुज्ञा पल्लवस्य प्रतिबन्धः । ततः किसलयस्य प्रतिबन्धः पल्लवस्याभ्यनुज्ञा । तत इदं वैश्वरूप्यं पदार्थानाम् ।

१ अध्याहताः—क ५, का०, ग ३.४ ।
अध्याहत—क १.२.३.४.७ ।
अध्यासित – ट.
अध्याहित—ग २, ठ.
बहुषु कोशेष्वदृष्टोप्येष पाठो नोभिरुचित इति हेलाराजेन वृषभेण च धृत इति चोपात्तः ।
२ ०कला—क ५, का०, ग ३.४, घ.
३ इदं हेलाराजेन जातिसमुद्देशे आत्मभूतः क्रम इत्यादिश्लोकव्याख्यायां, कालसमुद्देशे जलयन्त्रभ्रमावेशेत्यादिश्लोकव्याख्यायां च संगृहीतम् ।
४ जन्ममरयः—का०.
५ स्वरूपस्य—का०.
६ इति न धृतम्—घ, ङ.
७ ०रेष्वपेक्षा०—घ, ङ । रेष्वप्यपेक्षा०—टीका, ट, ठ.
८ प्रतिबद्ध०—ट.
९ ऽपि क्रमं मात्रा०—ट.
१० च्छेदकम्—ठ.

तत्रैवमभून्नाभूदित्यपूर्वापरस्य[1] भावस्य पौर्वापर्यव्यवस्थाविकल्पे सति जन्मादयो विकाराः षट् परिणामानां[3] सत्ताविकाराणां योनय[4] उपपद्यन्ते । जातिसमुद्देशे तु सत्ताविभागे न्यक्षेण भावविकारा वक्ष्यन्ते ॥३॥

एकस्य सर्वबीजस्य यस्य चेयमनेकधा ।
भोक्तृभोक्तव्यरूपेण भोग[6]रूपेण च स्थितिः ॥४॥

एकस्य हि ब्रह्मणस्तत्त्वान्यत्वाभ्यां सत्त्वासत्त्वाभ्यां चानिरुक्ता[7]विरोधिशक्त्युपग्राह्यस्यासत्यरूपप्रविभागस्य स्वप्नविज्ञानपुरुषवद्बहिस्तत्त्वाः परस्परविलक्षणा[8] भोक्तृभोक्तव्यभोग[9]ग्रन्थयो विवर्तन्ते । तस्य च[10] ग्रन्थ्यन्तररूपसमतिक्रमेण विवृत्तग्रन्थिपरिच्छेदस्येयम्[11]मनेकधा लोके व्यवहारव्यवस्था प्र[12]कल्पते ॥४॥

प्रतिबन्धजन्मनाम् इति । येषामेवानेन प्रथम उत्पत्तौ प्रतिबन्धः कृतः ते प्रतिबन्धजन्मानः । तस्येति ब्रह्मशक्तेः कालस्य । तुलासूत्र इव इति । तुलासूत्रस्थानमत्र तुलाशब्देनोक्तम् । तुलासूत्रमिति तु पाठे अवच्छिद्यते इत्यवच्छेदो दण्डलेखया विभज्यमानमिति समस्तमेतत् ।

अभूदित्यतीतः कालः । नाभूदिति तद्व्यवच्छिन्नौ भविष्यद्वर्तमानौ । सत्ताविकाराणामिति । क्रियाविशेषाणां पचादीनामिति । न्यक्षेण इति । आभिमुख्येन कार्त्स्न्येन वा वक्ष्यत इति ॥३॥

एवं सर्वतो भेदप्रतिषेधमभिधायाभिन्नस्यापि सर्वतो भेदव्यवहारहेतुतामाह—एकस्य इति । नन्वुक्तं प्रक्रिया जगतो यतः (१।१॥) इति । उच्यते—सर्वहेतुता तत्र प्रदर्शिता न तु स्थितौ सर्वभेदव्यवहारहेतुता । सा तु सनिदर्शना कथ्यते—एकस्य इति । एकस्यापि शक्त्युपग्राह्यस्येति सर्वबीजतामाचष्टे । शक्तय उपग्राह्याः स्वीकर्तव्या अस्य तदाधारत्वात् । अनिरुक्ताः इति । अनिर्वचनीयाः । अविरोधिन्यः । विरुद्धकार्यप्रसवानुमितविरोधा अप्येकस्मिन्नाधारे यौगपद्येन वृत्तेरविरोधिन्यः । एतेन यथोक्तेन प्रकारेणानिरुक्ता अविरोधिन्यः शक्तय इति सापेक्षत्वेपि गमकत्वात्समासः । स्वप्नविज्ञानपुरुषवद् इति । यथा स्वप्नविज्ञानमयः पुरुष एकत्वमजहद् भेदेनोक्तः विवृत्तेति । ग्रन्थिरेव परिच्छेदः, परिच्छिद्यते विविच्यतेऽन्य इति, सोन्यतो विलक्षणो विवृत्तोस्य ॥४॥

१ भूदित्य०—घ, ङ.
२ पूर्वापरीभावस्य—घ, ङ । पूर्वापरस्य—का० । पूर्वस्यापरस्य—च । पूर्वापरस्य भावस्य—ट, ठ.
३ परिणामाः तत्र—घ, ङ.
४ इत्यतः परम् 'इव' इत्यधिकम्—ठ.
५ इति न धृतम्—घ, ङ.
६ भोग्य—ग २ । भुजि—ग ३.४.
७ चानुरक्ता०—घ. अयमपपाठः ।
८ व्यावृत्तस्वलक्षणा—ट, ठ । ०विलक्षणा—घ, ङ, च.
९ भोक्तव्यभोग०—घ, ङ.
१० इति न धृतम्—ट.
११ स्येवेयमनेक०—घ, ङ.
१२ प्रवर्तते—घ, ङ.

प्राप्त्युपायोनुकारश्च तस्य वेदो महर्षिभिः ।
एकोप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक् ॥५॥

ममाहमित्यहङ्कारग्रन्थिसमतिक्रममात्रं ब्रह्मणः प्राप्तिः । विकाराणां प्रकृतिभावापत्तिरित्यपरे । वैकरण्यम्[1], असाधना परितृप्तिः[2], आत्मतत्त्वमात्मकामत्वमना[3]गन्तुकार्थत्वं[4], परिपूर्णशक्तित्वं, कालवृत्तीनामात्ममात्रास्वसमावेशः[5], सर्वात्मना नैरात्म्यमिति प्राप्तिविकल्पाः । प्राप्त्युपायो ब्रह्मराशिः । यथाभ्युदयस्य दानतपोब्रह्मचर्यादिः । एवं ह्याह[8]-वेदाभ्यासात्परमान्तरं शुक्रमजरं ज्योतिरस्मिन्नेवापारे तमसि वीते[10] विवर्तते इति । अनुकारः इति । यां सूक्ष्मां नित्यामतीन्द्रियां वाचमृषयः साक्षात्कृतधर्माणो मन्त्रदृशः पश्यन्ति तामसाक्षात्कृतधर्मभ्योपरेभ्यः[11] प्रवेदयिष्यमाणां[12] बिल्मं[13] समामनन्ति स्वप्नवृत्तमिव दृष्टश्रुतानुभूतमाचिख्यासन्त इत्येष पुराकल्पः । आह

एवं प्राप्यब्रह्मणः स्वरूपं प्रदर्श्य प्राप्त्युपायं कथयति-**प्राप्त्युपायः** इति । **अनुकारः** इति प्रतिच्छन्दकः । **वैकरण्यम्** इति । करणादीनां चक्षुरादीनां बुद्धीन्द्रियाणां पञ्चानां तथा पाण्यादीनां कर्मेन्द्रियाणां पञ्चानां बुद्धिमनसोश्च निवृत्तिः । यतश्चक्षुरादिनिबन्धनो रूपादिव्यवसायः तत्पूर्विकाश्च समीहा अपि वर्तन्ते, तत्पूर्वः संसारः । अतः करणनिवृत्तौ संसारनिवृत्तिः । **असाधनेति** अबहिःसाधना । बहिरनुकूलविषयसाधनापि तृप्तिरस्तीत्यवच्छेदः । **आत्मतत्त्वं** च यत उपनिषत्सु वर्ण्यते-**यथेष्टया स्त्रिया परिष्वक्तो न किञ्चन वेद[14]** इति । **आत्मकामत्वम्** इति । न शब्दादीन्कामयते । तत्रौत्सुक्यविगमात् । **अनागन्तुकार्थत्वम्** इति । आगन्तुकाय परमर्थयत इति आगन्तुकार्थः, तस्य भावः,

१ वैयधिकरण्यम्-घ १. इदमपि सूपपादम् । विगतमधिकरणं चेष्टाधिकरणं शरीरमस्य, तस्य भावः । जन्मनिरोध इति यावत् । वैकरण्यस्यासा०--ट, ठ. सौगम्याच्च टीकापाठ उपात्तः ।

२ परिवृत्तिः—घ, ङ.

३ आप्तत्व०-घ, ङ. आप्तत्वं मुक्तत्वापरपर्यायमित्यप्रमाणं वचः । अतष्टीकापाठ इहादृतः । आत्मतत्त्वम् इति न धृतम्-ट.

४ मात्मकामत्व०-घ,ङ. एवं पठ्यमानं पुनरुक्तिं प्रयोजयति । अनागन्तुकार्थत्वमित्यनेन तस्यैवार्थस्य वक्ष्यमाणत्वात् ।

५ मनुगतकार्यत्वं—घ१, ङ । मनागतकार्यत्वं—घ२. उभयः पाठोनर्थकः । मागन्तुकार्थत्वं—ट.

६ ०मान्तसमा०—घ, ङ । ०मात्स्वसमा०—च, ट.

७ समात्मना-घ १, ङ.

८ ह्याहेति—घ, ङ.

९ मन्तर्--घ. इदमान्तरमित्यनेन गतार्थमित्युपेक्ष्यम् ।

१० वाते-घ, ङ. इदमपार्थम् । धीते--च, ट । पीते-का०. व्यक्तमपपाठः, अर्थासङ्गतेः ।

११ धर्मभ्यः परे०--घ, ङ.

१२ ०माणां तां--घ, ङ. प्रथमान्तः पाठ एव साधुष्टीकानुसारी च । तामिति पुनरुक्तं पूर्वमुपात्तत्वात् । प्रवेदयिष्यमाणा--ट.

१३ विल्वं—घ, ङ.

१४ बृ० उ० ४।३।२१॥ तत्र मात्रया भिद्यते ग्रन्थः ।

खल्वपि--साक्षात्कृतधर्माण ऋषयो बभूवुस्तेपरेभ्योऽसाक्षात्कृतधर्मभ्य[1] उपदेशेन मन्त्रान्सम्प्रादुः, उपदेशाय ग्लायन्तोपरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च । बिल्मं भिल्मं[2] भासनं वा[3] इति[4] । तस्य वेदो महर्षिभिः, एकोप्यनेकवर्त्मेव । **एकोयं वेदाख्यो दर्शनात्मनि स्थितो दृश्योर्थः स महर्षिभिर्भेदेनाभेदस्य प्रतिपादयितुमशक्यत्वादभिव्यक्तिनिमित्ताल्लब्धक्रमे[5] वागात्मरूपे प्रापित एकत्वानतिक्रमेण संहितापदक्रमविभागेन प्रविभक्तमार्गोऽध्ययननिमित्त[6]मध्येतॄणां चरणसमाख्यां[7] व्यवस्थापयद्भिः[8] समाम्नातः । अपर आह—यथा वाग्देशभेदेन भिन्ना सत्यपि स्वरूपभेदे एकाभिधेयनिबन्धनत्वमनत्यतिक्रान्ता[9] । सैव च देशादिभेदप्रकल्पनव्यवस्थाहेतुः । एवं चरणभेदेप्ये[10]कार्थनिबन्धनत्वमनत्यतिक्रान्तानि[11] श्रुतिवाक्यानि । स्वरूपभेद एव चरणभेदप्रकल्पनव्यवस्थाहेतुरिति । अपरे मन्यन्ते—यथाष्टाङ्ग आयुर्वेदः पुराकल्पे[12]**

तस्य नञा प्रतिषेधः । एतदुक्तं भवति । सर्वस्य भोक्तव्यस्य प्रकृतिपुरुषान्तरज्ञानं तस्येह भुक्तत्वाच्च परमर्थयते । अस्मिन्नेवेति नान्यस्मिञ्जन्मनि । **अनुकारः** इति । वस्तुतो भेदाभावादनुकार इव वेदो ब्रह्मणः । **स्वप्नवृत्तमिव** इति । स्वप्ने हीन्द्रियव्यापारेण विना अबहिस्तत्त्वा रूपादयोऽनुभूताः, एते न तथाख्यातुं शक्या इति प्रतिच्छन्दकाः । इन्द्रियमेव तेन बाह्यादिरूपेण कथ्यते । **दृष्टश्रुतमिति** नपुंसके भावे क्तः । तेन दर्शनश्रवणाभ्यामनुभूतमर्थमाख्यातुमिच्छन्तः ।

उपदेशाय ग्लायन्तः इति । स्वयं विदितं तादृक्कथं साक्षादुपदेक्ष्याम इति खिद्यमानाः । उपदेशार्थः खेद इति तादर्थ्ये चतुर्थी । **दर्शनात्मनि** इति । यथा गौरित्येकपदपरिच्छेदिन्यामेकस्यां बुद्धौ पूर्वापरीभूतानेकवर्णाकारायामपि नानेकत्वं दृश्यस्य । एवं ब्रह्मराशिपरिच्छेदिन्यामेकस्यां बुद्धौ द्रष्टव्यम् । **अभेदस्य** इति । न हि भेदव्यवहारानुपातिनां प्रत्यस्तभेदेन व्यवहार इत्यशक्यता । ततः

१ धर्मस्य-घ, ङ. व्यक्तमपपाठः । धर्मभ्य-ट, ठ.

२ बिल्वा-घ, ङ. इति न धृतम्-ट, ठ.

३ इव--ट. इति न धृतम्--घ, ङ.

४ निरुक्ते १।२०॥ तत्र बिल्मं भिल्मं भासनमिति वा इति पाठः ।

५ निमित्तलक्षणशब्दक्रमे-————घ, ङ. काशिकः संग्रहीता 'अभिव्यक्तिलक्षणशब्दक्रमरूपं वागात्मत्वं प्रापय्य' इति पठति । मन्येऽत्र निमित्तलक्षणशब्दयोरेकतरस्योपादानेन पाठद्वैविध्यं प्रतिष्ठितं स्यात् । लिपिकरेण त्वत्र साङ्कर्यं कृतम् ।

६ निमित्ताऽध्ये०--च, ट, ठ.

७ समाख्या--घ, ङ. अतः परं 'व्यवस्थापयद्भिः' इति टीकाकर्तुः पाठः स्यात् ।

८ व्यवस्था संपादयद्भिः—घ, ङ. अत्र व्यवस्थेति प्रथमान्तमसाधु ।

९ मप्यतिक्रान्ता - घ, ङ. अपपाठः.

१० प्येकाभिधेयनि०--ङ.

११ मप्यति०--घ, ङ. अपपाठः । मव्यति०--ट ।
०क्रामति—घ. अपपाठः.

१२ पुराकल्पश्च—घ, ङ. व्यक्तमपपाठो लेखकप्रमादजः ।

एके एवं आसीत्स एव हि कलौ शक्तिवैकल्यान्नृणां प्रविभक्ताङ्गो दृश्यते । तथायम-
प्यपरिमाणमार्गशक्तिभेदो वेदो ब्रह्मराशिरिति ॥ ५ ॥

भेदानां बहुमार्गत्वं कर्म्मण्येकत्र चाङ्गता ।
शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते ॥६॥

तत्र चतुर्धा भेदे सति एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, पञ्चदशधेत्येके । नवधाथर्वणो वेदः[4] इत्येवं प्रतिभागं बहवो मार्गाः । कर्म्मण्येकत्र चाङ्गता। सर्वशाखाप्रत्ययमेकं कर्म । तद्यथा । सर्वभिषक्शाखाप्रत्ययमेकं चिकित्सितम्। शब्दानां यतशक्तित्वम्। तथार्थप्रत्यायने सामर्थ्यात्, तथाभ्युदयहेतुत्वात्। तस्य शाखासु दृश्यते इति । देवसुम्नयोर्यजुषि काठके[5], सिमस्याथर्वणेन्त उदात्तः[6] इत्येवमादि। येषां त्वयं शाखाप्रविभागो विच्छेदेन पुनः पुनर्भवतीत्यागमः, तेषां प्राक् प्रविभागादव्यभिचार एव संहृतक्रमाया वाच इत्येतद्दर्शनम् ॥६॥

किंकृतमित्याह—वागारम्भरूपत्वे इति । प्रविभक्तात्तरायां वाचि प्रापितः समारोपितः, तद्रूपतया व्यवस्थापितः । अभिव्यक्तिनिमित्तेति । तस्या वाचो नित्याया अभिन्नाया अभिव्यक्तौ यन्निमित्तं स्थानकरणाभिघातो ध्वनिर्वा ततो लब्धः क्रमो ययेति । अध्ययननिमित्तां समाख्यामिति संबन्धः । येयं चरणरूपा आख्यान्यां पृच्छ च्छन्दोग इति सा तदध्ययननिमित्ता । अन्येषां पाठोऽध्ययननिमित्तमिति । सति च प्रविभागेस्माकमियं शाखास्माकमियमिति पक्षपातादभियोगेनाधीयत इत्यध्ययननिमित्तं चरणसमाख्या । अन्यथैकतां प्रविभागं च प्रतिपादयति—यथा वाग् इति । एकार्थनिबन्धनत्वम् इति । यस्मात्तैरेव चरणैरेकं कर्म यागाख्यं कर्मराशिर्वैकः । अनुक्तमपि यत्किञ्चिदेकत्र तदपरप्रामाण्यादपरत्र क्रियते । यद्वा ज्योतिरान्तरं प्रतिपाद्यमिति । यथाष्टाङ्गः इति । शल्यचिकित्सा, शालाक्यं, कायचिकित्सा, भूतचिकित्सा, कौमारभृत्यम्, अगदतन्त्रं, वाजीकरणतन्त्रं, रसायनतन्त्रमिति । एक एव इति । एका चिकित्सा आरोग्यमुद्दिश्य प्रवृत्तत्वात् । बहूनां मार्गाणां शक्तिभेदा अस्मिन्वेदाख्ये ब्रह्मणि विद्यन्ते ॥५॥

इदानीं वेदस्य स्वरूपकथनेन माहात्म्यमाह—भेदानाम् इति । तस्येति वक्ष्यति । तस्य

१ एक एव—इति न धृतम्–घ, ङ. इदं च नोपेक्ष्यमिति वचनं नापेक्षते । अष्टाङ्गत्वं हि तस्य प्रविभक्ताङ्गत्वम् । स च प्रविभागः कलाविति ततः प्राक्तु एकत्व एवावस्थित आयुर्वेद इति विवक्षितोर्थः ।
२ काले—च. नेदं साधु । इति न धृतम्—ट, ठ.
३ इति न धृतम्—ट, ठ.
४ पा० महा० भा० १।१।१॥". वार्तिके। तत्र पञ्चदशधेत्येके इति न श्रूयते ।
५ पा० ७।४।३८॥
६ फिट्सूत्रम् ।
७ प्रयोगाद०—ट, ठ.
८ रूपारम्भम्—च१. स्फुटः पाठभ्रंशः । रूपम्—च२. इदमप्यसाधु । व्याख्यानविरोधात् ।

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ॥७॥

तत्र काश्चिच्छब्दनिबन्धनाः स्मृतयः । काश्चिददृशब्दनिबन्धनाः शिष्टेषु प्रसिद्धसमाचाराः । दृष्टप्रयोजनाश्चिकित्सितादिविषयाः । अदृष्टप्रयोजना भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यविषयास्तुल्ये विषये प्रसक्तविरोधा दृष्टप्रयोजनाभावे विकल्पिन्यः । शिष्टानां तु विप्रतिपत्तौ यत्र दृष्टं प्रयोजनमस्ति तासामप्रामाण्यम् । अविप्रतिपत्तौ तु दृष्टप्रयोजनसंभवेपि विकल्प एव । तद्यथा मण्डूकवधे प्रायश्चित्तस्य । तमेवाश्रित्य लिङ्गेभ्यः इति । श्रुत्याश्रितानि लिङ्गानि श्रुतिविहितानां स्मृतिविहितानां च कर्मणां कर्तृसामान्यं प्रवेदयन्ते । येषां हि श्रुतिविहितैर्दृष्टादृष्टप्रयोजनैः कर्मभिरधिकारः ते श्रुत्यैव स्मृतिविहितानामपि कर्मणां कर्तृत्वेनाख्यायन्ते । तद्यथा । यैंजमानोतिथय आगर्ताय महाजं वा महोक्षं वा पचेत्[9] इति ।

वेदस्य भेदाः सामवेदादयश्चत्वारः । सर्वशाखाप्रत्ययम् इति । सर्वशाखाहेतुकं कर्म निष्पाद्यते । अनुक्तानामपि तदन्यशाखोपदिष्टानां तत्र करणात् । सर्वभिषग् इति । सर्वेषां भिषजां शाखाभेदादष्टाङ्गानि तन्निमित्तमेकं चिकित्सितम् । अङ्गान्तरविहितायाश्चिकित्साय अङ्गान्तरहेतुकफले तुल्यतया समारोपात् । आरोग्यस्य वैकस्य च सर्वेषां हेतुत्वात् । यतशक्तित्वं नियतकार्योत्पादकत्वेनाह—तथार्थप्रत्यायने इति । येन रूपेण स्वरेण च युक्तो यस्यां शाखायामुक्तः स तत्रैवार्थमभिधत्ते । न शाखान्तरे । अतोर्थक्रियानियमेन शक्तिनियमः । येषां तु इति । केचिदेवं मन्यन्ते–अयं वेदो ब्रह्मणः सकाशाच्छाखादिभेदभिन्न एव विवर्तत इति । तेषामुपसंहृतक्रमा वाग्दुर्लभा । येषां तु दर्शनं ब्रह्मणः प्रथमतो वेद एकरूप एव विवर्तते । सोध्येतृणामशक्तेः प्रविभक्तः । स पुनरुपसंहृतभेदो भवतीति पुनश्च भिद्यते इति । अस्मिंश्च दर्शने पूर्वोक्तं कारिकाद्वयं भवति ॥६॥

स्मृतियोनित्वं वेदस्य दर्शयितुमाह–स्मृतयः इति । स्मरणानि तत्पूर्वका वा शब्दसन्दर्भसमाचाराः । अशब्दनिबन्धनाः इति । शब्दो निबन्धनं यासां न भवति । किं निबन्धनमित्याह–

१ प्रकाशिताः—क ५, का०.
२ ०दर्थशब्द०—घ, ङ. अत्रार्थशब्दप्रक्षेपोर्थं विघटयति ।
३ अतः परं 'स्मृतयः' इति पुनरप्युपात्तं घ--ङ--कोशयोस्तदस्माभिरुपेक्षितम् ।
४ इति न धृतम्—घ, ङ.
५ प्रसक्ते—घ, ङ । अत्र पूर्वेण सप्तम्यन्तेन प्रयोगेण प्रयुक्तो लेखक एवमलेखीदिति प्रतीमः । प्रसक्तवि०—ट.
६ एवं—घ १, ङ.
७ इत्यतः पूर्वम् 'अयम्' इत्यधिकम्—ट, ठ.
८ आगतायाजमषएढं—ट, ठ.
९ श० ब्रा० ३।४।१।२॥ तत्र राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्तदह मानुषं हविर्देवानामेवमस्मा एतदातिथ्यं करोति इति श्रूयते ।

कचिच्च विषये लिङ्गानि दृष्टानि स्थालीपुलाकवच्छ्रुत्यर्थाविरोधिन्याः स्मृतेः प्रामाण्यकल्पनायालम् ॥७॥

तस्यार्थवादरूपाणि निश्रिताः[2] स्वविकल्पजाः ।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः[3] ॥८॥

अर्थवादानर्थवादप्रकाराणि[4] श्रुतिवाक्यानि पौरुषेयाः प्रवादाः प्रायेणानुपतन्तो दृश्यन्ते । पुरुषबुद्धिविकल्पाच्च प्रवादभेदाः संभवन्ति । तद्यथा । असद्वा इदमग्र आसीत्[5] इत्यग्निचयन[6]स्थानोपस्तुत्यर्थोऽर्थवादः, तद्रूपपरिकल्पन[7]निश्रितश्चार्यमेकान्तत्वप्रवादः—असदसतो निरीहान्निरीहमपदादपदमनुपाख्यादनुपाख्येयमवस्तुकादवस्तुकं प्रसिद्धसमाचाराः इति । यद्यपि शब्दो नास्ति ते तु शिष्टास्तानर्थानाचरन्तो दृश्यन्त इति प्रसिद्धः समाचारः । चिकित्सायां रोगनिवृत्तिर्दृष्टं प्रयोजनम् । आदिशब्देन वैणवीं धारयेद्याष्टिम्[10] इत्येवमादीनां स्खलत्प्रतिष्ठादिकम् । दृष्टप्रयोजनप्रतिद्वन्द्विरूपेण चोदनाद्ध्वद्यादिकं यददृष्टार्थमेव तद् बोद्धव्यम् । न भैषज्यविपर्यादिकम् । मण्डूकवधे प्रायश्चित्तं क्षीरभोजनमासक्तघृतं वा दधि । श्रुत्याश्रितानि इति । श्रुतिपठितानि लिङ्गादीनि तेषामन्यार्थत्वेऽपि तदवगमशक्तेर्लिङ्गत्वम् । यजमानः इति । यतोऽतिथिमुद्दिश्य षण्डस्याजस्य महतो वा बलीवर्दस्य कदनं वर्णत्रयस्य वेदे पठितं स्मृतावपि वर्णत्रयस्यातिथिमुद्दिश्य तदेव पठितमिति ॥७॥

इदानीं दर्शनभेदा अपि तत एवेत्याह—अर्थवादरूपाणि इति । अर्थार्थो वादः प्रयोजनार्थः, तत्सदृशमर्थवादरूपम् । अर्थवादानर्थवादरूपाणि चेति यङ्लुग्वदेकशेषः । निश्रिताः प्रवादा इति सम्बन्धः । यदि पदवाक्याश्रिताः कथं प्रवादा इत्याह—स्वविकल्पजाः इति । न च तेषां

१ 'कल्पन' इति शब्दस्वरूपमुपेक्षते टीकाकृदिति भाति ।

२ निश्रिताः—क १,२,३,४,७, ख, ग३.४,घ, ङ, ट । निश्रित–ठ । निश्रिताः–ग १, च. अयमेव पाठः साधुः । विवरणग्रन्थसंवादात् । निश्रिता इति पाठे 'अर्थवादरूपाणि' इति निरन्वयं तिष्ठति । कर्मण्यत्र क्तः, 'प्रवादाः' इति च कर्म तेनोच्यते । न ह्ययं यत्नशतेनापि अर्थवादरूपाणि इत्यनेन सम्बन्धुं शक्यः । अस्यासाधुत्वमेवाशङ्क्य काशिकः संगृहीता कोशगतं पाठं 'निश्चित्य' इत्येवंरूपमापाद्य पठति । लिपिसारूप्यज एवात्र लिपिकराणां विभ्रम इति स्फुटम् ।

३ गताः–ग १–४, ट.

४ अर्थवादप्रकाराणि—ट, ठ.

५ श० ब्रा० ६।१।१।१॥ तै० ब्रा० ८।७॥

६ ०नोपस्थानश्रुत्यर्थो०—घ, ङ. अपपाठो लेखकप्रमादजः ।

७ कल्पित–ट, ठ.

८ ०निश्चित०—कोशः.

९ ०पदार्थाद०—घ, ङ.

१० मनु० ४।३६॥

जायते इति । अपूर्वापराभ्यां तु सत्त्वासत्त्वाभ्यामेक आत्मा[1] विभज्यते । तत्राद्वये[2] कथं हि स्यात् सोपाख्यनिरुपाख्यता[3] ईति[4] ॥ तथा । नासदासीन्नो सदासीत्[5], तम एव खल्विदमग्र आसीद्[6] इति ।

इदं फेनो[7] न कश्चिद्वा बुद्बुदो वा न कश्चन[8] ।
मायेयं[9] बतै[10] दुष्पारा विपश्चिददिति पश्यति ॥[11]
अन्धो मणिमविन्दत्तमनङ्गुलिरावयत् ।
तमग्रीवः प्रत्यमुञ्चत्तमजिह्वो[12]ऽभ्यपूजयत् ॥[13]॥

वाक्यानां सोऽर्थः । ते तु तथा तान्परिकल्प्य दर्शनभेदान्कल्पितवन्तः । स्वविकल्पसमुत्थाः प्रवादाः । विकल्पानां तु वेदवाक्यानि मूलानीत्यर्थः ।

असद्वा इदमग्र आसीदिति ब्राह्मणेऽर्थवादः । तस्य त्वर्थवादस्य रूपं परिकल्प्यान्यथार्थवत्तां कल्पयित्वायमेकान्तवाद इति कल्पितं विरचितमेव ग्रन्थं पठति असद् इत्यादि । कारणसधर्मोऽहेतो कार्यस्याचष्टे–असतः इति । सत्तानाविशनाद् ब्रह्मणः । गुणानाश्रयणादाह–अपदाद् इति । शब्दप्रवृत्तिनिबन्धनाभावादनुपाख्यादिति । अपूर्वापराभ्याम् इति । पूर्वापरयोः कोट्योरसत्त्वं मध्ये च सदिति यदि क्रमेण ततस्सत्त्वतः सद्व्यवहारः । यतस्त्वपूर्वापराभ्यां युगपद्व्यवस्थिताभ्यां सत्त्वासत्त्वाभ्यामेक आत्मा ब्रह्माख्यो विकल्प्यते सदसद्रूपेणावतिष्ठते, अतस्तदेवासत्स्वरूपमनतिक्रामत् गवादिरूपेण प्रत्यवभासमानं सद्व्यवहारनिबन्धनमिति । नासदासीद् इति । अयमपि चयनस्तुत्यर्थ एव । इदं फेनः इति । पठितन्त्रग्रन्थश्चायं यावदभ्यपूजयत् इति । दृश्यमानस्य तुच्छतामाह–फेनः इति । किं तर्हीदं–मायैषा । यतो दृश्यमानतयास्ति परमार्थतो नास्तीति ।

१ ऽपि भवति–ट, ठ.

२ तथाद्वये–ट, ठ.

३ सोपाख्यान्नि०–ट, ठ. अयमपपाठः.

४ इति न धृतम्—ट, ठ.

५ ऋग्० १०।१२९।१॥

६ मै० उ० ५।२॥ तत्र तमो वा इदमग्र आसीदेकम्–इत्येवमानुपूर्वीकः पाठः ।

७ फेनो–घ, ङ. पाठभ्रंशः ककारफकारयोः सारूप्येण व्यामोहितो लेखक एवमलेखीत् । अर्थावधारणं तु प्रायो न तस्य बुद्धेर्गोचरः । पीनो—का०, ख. अयमपपाठो विचारासहः । फेनो—ट, ठ । बुद्बुद इत्यपरस्य प्रतिषेध्यस्योक्तत्वात्फेन इत्येव समञ्जसः पाठः । टीकाकारेण च एत इत्युपादिष्महि । स्कन्दमहेश्वरकृतायां निरुक्तटीकायामप्येवम् ।

८ किंचन—कोशः । कश्चन—टीका । पुंसि प्रयोग एवोचितः ।

९ मायेषां—घ, ङ । अत्रानुस्वारोऽतिरिक्तः, टीकायामपि तथैव दृश्यते । परं टीकाग्रन्थतोऽवसीयते नायं तत्कर्तुरिष्ट इति । निरुक्तटीकायामपि मायेयम् इति पाठः ।

१० न तु—घ, ङ. अपपाठः.

११ इदं स्कन्दमहेश्वरकृतायां निरुक्तटीकायां (३।११) पठितम् । तत्र बत इत्यस्य स्थाने तव इति पाठः ।

१२ मगुद्रोभ्य०—घ, ङ । मजिह्वोभ्य०—ट, घ.

१३ तै० आ० १।११।५॥ तत्राभ्यपूजयत् इत्यस्य स्थाने 'असश्चत' इति पाठः ।

तथा आपो वा इदमग्र आसीद्[1] इति दर्शपूर्णमासविषयोऽर्थवादः । ततश्चायं प्रवादः—प्रज्ञानरूपपाकश्चासंप्रेख्यानरूपपाकश्चापां प्राणो रसः । स खल्वावर्ती चानावर्ती च इति । तदेवं[3] तदेकरूपं सर्वप्रबोधरूपं सर्वप्रभेदरूपतायां समवतिष्ठते ॥ द्वैतिनः खल्वप्याहुः—नित्याश्चानित्याश्च मात्रायेनयः, यासु रूपि चारूपि च सूक्ष्मं च स्थूलं चेदं भुवनं विषक्तम् इति ॥ तथा—

उभौ सखायौ सयुजौ सुपर्णौ समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥[7]

इन्द्रियग्रामश्चान्तर्यामी च बुद्धिश्च क्षेत्रज्ञश्चेति ॥ अथापरे–विर्वृत्ताविवृत्तं बहुधानकं चैतन्यमित्याहुः ।

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥[10] इति॥८॥

अन्धो मणिमिति । मणिव्यवधानं चक्षुष्मतश्चक्षुरादयश्च तेऽसत्या इति । **तदेवमन्ध**त्वादिभिः सत्त्वविविक्तं व्यवधानादिभिरसत्त्वविविक्तं प्रधानमिति प्रतिपादितम् । **आप एवमग्र आसी**दिति । आपो हि सर्वयोनित्वेन श्रूयन्ते । ततश्चेत्यर्थवादात् । **प्रज्ञानरूपपाकश्च** इति । तासामपां पच्यमानानामेकोंशश्चैतन्यरूपेण । प्रज्ञानरूपः पाको स्येति । असम्प्रख्यानरूपः अचैतन्यरूपः पाकोस्येति । योयं पृथिव्यादिरूपेण । **प्राणो रसः** इति । बलिष्ठः सार इति यावत् । **तदेवं तदेकरूप**मिति । अयमपि यथोक्तभेदो नास्तीत्याह–यतस्तदेव सर्वप्रबोधरूपं सर्वपदार्थपरिच्छेदाकारं यत्तत्प्रज्ञानरूपयुक्तं तदेव सर्वप्रभेदरूपतायामित्यव्यतिरिक्तैर्गवाद्याकारैः प्रत्यवभासते । यदाह–**अवतिष्ठते** इति । **सयुजौ** इति । समानयोगौ । येनैवेन्द्रियं विषयेण युज्यते बुद्धिश्च, तेनैव पुरुषान्तर्यामिणौ । युजेः सम्पदादिपाठाद् भावे क्विप् । **सखायौ** इति । समानख्यानौ । यथेन्द्रियबुद्धी अध्यवस्यतो विषयं तथा पुरुषान्तर्यामिणाविति । यतो विषयाकारेणेन्द्रियं परिणमते इन्द्रियवृत्त्या बुद्धिः, तत्प्रतिबिम्बं पुरुष उपैतीति समानख्यातियोगः । अभिचाकशीति देदीप्यते चेतयते । तौ पक्षिणावाह–**इन्द्रियग्राम**

१ श० ब्रा० १४।८।६।१॥
२ प्रत्याख्यान०—घ, ङ. अपपाठः.
३ इति न धृतं घ, ङ । टीकानुसारितया पठितम् । तदे--ट, ठ.
४ इति न धृतम् –घ१, ङ.
५ चानुचेयं—घ, ङ. इदं चिन्त्यम् । टीकायामत्र पाठो न धृतः अर्थस्तु बोधितः—'बुद्ध्यादि' इति । एतमर्थं 'चारूपि' इति पाठः सम्यगर्पयतीति स परिगृहीतः । काशिकः संग्रहीतापि चारूपीति पठति । चारूपं--ट.
६ रेकः—ट.
७ नायं ग्रन्थ ऋक्, किन्तर्ह्यृगनुकारश्श्लोकः । काशिकेन संग्रहीत्रा त्वेतदनभिरोचयमानेन यथातथमृक् पठिता ।
८ विवृत्तं सत्त्वमेव—ट, ठ.
९ बहुधा न किंचन--का०. अपपाठः.
१० यजुः ४० । ५॥

यतश्चैते सर्वविकल्पातीत एकस्मिन्नर्थे सर्वशक्तियोगाद् द्रष्टृणां दर्शनविकल्पाः, तत एव खलु—

सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्ववादाविरोधिना ॥६॥[3]

इहैवैकस्मिन्सर्वरूपे ब्रह्मणि यः परिकल्पः स विरुद्धरूपाभिमतेभ्यः परिकल्पान्तरेभ्यो न भिद्यते । अपि खलु ब्रह्मविदं आहुः—प्रदेशोपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्पश्च इति । **तथा** सर्वं दर्शनमन्यूनमविकल्पं सविकल्पमिवायमत्रान्तरः पुरुषोऽभिमन्यते इति । **अत्र प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिसर्वनामे सर्वदर्शनोदयप्रत्यस्तमययोनिः सर्वविरुद्धार्थोपग्राही सर्वथेदं ब्रह्माभ्यनुजानाति सर्वथा च प्रतिषेधति । न च प्रतिषेधाभ्यनुज्ञयोरस्य प्रवृत्तितत्त्वं विकल्पते । तथा ह्याहुः—**

इत्यादिना । क्षेत्रज्ञः यः साङ्ख्यीयः पुरुषः । तदेव विवृत्तं बुद्धीन्द्रियशब्दाभ्यामुक्तम् । अविवृत्तं क्षेत्रज्ञान्तर्यामिशब्दाभ्याम् । **बहुधानकम्** इति । धाना बीजानि । तदेवैकं सर्वबीजकम् ॥८॥

यतश्चैते इति । य एते दर्शनभेदा उपन्यस्ताः ते इति वक्ष्यति । यत एते भिन्नरूपानुपातिनोऽसत्याश्च ततः......अभिन्नत्वात्सत्यत्वाच्च विद्यैव वेद उक्ता । **तत्रेति वेदे** । यत्त्वविद्यात्मकं ब्रह्म तस्य प्राप्त्युपायमाह—**एकपदागमा** इति । एकं पदमागमो यस्याः । ततो हि पदात्सा गम्यते । तथा हि वेद उक्तम्—**ओमित्येकाक्षरमुद्गीथमुपासीत** । प्रदेशोपि इति । योयं प्रदेशस्य प्रदेशान्तरेभ्यो भेदविकल्पः, अयमस्मादन्य इति । घट इति पटविलक्षणः सन्नास्ति । **तथेति** ब्रह्मवाद एव । आन्तरः इति कर्मात्मा । [**सर्वाभ्यनुज्ञाविषयः इति**] सर्वेषां दर्शनभेदानां यदभ्यनुज्ञानं स विषयोऽस्य । येन तद्ब्रह्म आत्मानं यथा यथा दर्शनभेदाः कल्पयन्ति तथा तथायमभ्यनुजानाति । **प्रकृतिसर्वनाम** इति । प्रकृतित्वेन कल्पितानां प्रधानपरमाण्वादीनां तदभिन्नं रूपम् । यतो भिन्ना अप्यर्थाः सर्वनामार्थाभेदेन स्थिताः । यथा लिङ्गादीनि नपुंसकेऽभेदेन स्थितानीति लिङ्गसर्वनाम नपुंसकं, स्वरसर्वनामैकश्रुतिरिति । **सर्वविरुद्धेति** । प्रधानात्कार्यमव्यतिरिक्तं परमाणुभ्यो व्यतिरिक्तमिति दर्शनं विरुद्धम् । **सर्वथा** इति । यथा दर्शनभेदा ब्रह्मरूपं विकल्पयन्ति तथा प्रणवोभ्यनुजानाति, एतदप्यतः, एतदपि रूपमस्येति । यतः प्रणवो वेदस्वरूपेण विवृत्तः । वेदे च सर्वदर्शनविकल्पनिबन्धन-

१ सत्या—ग२. अत्र वर्णविपर्ययः ।
२ विरोधिनी--क५, का०. एवं विवरणग्रन्थेन संगतिर्न लक्ष्यते ।
१ अस्य प्रथमश्चरणो हेलाराजेन द्रव्यसमुद्देशे न तत्त्वातत्त्वयोरित्यादिश्लोकव्याख्यायां संगृहीतः ।
४ विदप्याह—घ, ङ । अत्रापिशब्दो द्विरुक्यत इति जघन्य एष पाठः ।
५ इति न पठितम्—ट, ठ.
६ विकल्प—घ, ङ, च.
७ नामपदं—घ.
८ सर्वदृष्टिरवि०—च.

तदेतदेकं नैकं च तथोभे[1] नाप्युभे[2] न च[3] ।

कर्मस्था[4] विषमं[5] ब्रूयुः सत्त्वस्थाः समदर्शिनः ॥[6] इति॥६॥

विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।

विद्याभेदाः प्रतीयन्ते[7] ज्ञानसंस्कार[8]हेतवः ॥१०॥

वेदो हि लोकानां प्रकृतित्वेन चोपदेष्टृरूपत्वेन[9] च विवर्तेषु[10] व्यवस्थासु च[11] विधाता । प्रणव एव वेदं इत्येके । स हि सर्वशब्दार्थप्रकृतिरिति । एतस्मिंश्च दर्शने विद्याभेदाः प्रणवात्मतया[12] वेदं[13]तत्त्वं नातिक्रामन्ति । तदाहुः—सर्वा वाचो वेदमनुप्रविष्टाः, नावेदविन्मनुते ब्रह्म किंचित् इति । तथा विधिर्विधेयस्तर्कश्च वेदः इति । प्रणवाङ्गोपाङ्गेभ्यश्च श्रुतिस्मृतित्रय्यन्तादिभ्यो[14] विद्याभेदाः प्रभवन्ति सम्यग्ज्ञानहेतवः पुरुषसंस्कारहेतवश्च । ज्ञानात्मकत्वाद्वा पुरुषस्यैव संस्कारहेतवः । वेदाख्यस्य[15]

मर्थवादाः सन्तीति । प्रवृत्तितत्त्वम् इति । विरुद्धयोः प्रक्रिययोः प्रतिपाद्यमानस्य या तात्त्विकी वृत्तिर्न तस्या भेदोऽस्ति । अत्रागममाह—तदेतदेकम् इति । न चेत्युत्तरेण संबन्धः । [कर्मस्थाः इति] कर्मणि स्थिता ये कर्मतः फलमिच्छन्ति, ज्ञानं कर्माङ्गमिति । ते भेददर्शने स्थिता विषमवादिनः । सत्त्वस्था ज्ञानस्थाः । समदर्शिनः भेददर्शनतिरस्कर्तारः । तत्र कर्मस्था विषमं ब्रूयुरित्यनुज्ञानम् ॥६॥

विधातुरिति । स्रष्टुर्व्यवस्थापयितुश्च । तस्येति वेदस्य ।

एतस्मिंश्च इति । प्रणवो वेद इति दर्शने । तथेति । विध्यादीनपरे वेदमाहुः । विधिः ब्राह्मणम् । तद्धि मन्त्रान् कर्मणि विनियुङ्क्त इति विधायकम् । विधेयो मन्त्रः । तेन विनियुज्यमान

१ तथोहे—घ, ङ. अत्र टीकायामपि पाठो भ्रष्टः । तत्र 'तथाभेद' इति पाठादस्माभिरुपात्तः पाठ एव तत्कर्तुरभिमत इति स्फुटमवगम्यते ।

२ प्युहे—घ, ङ । ०प्युभे—ट.

३ ततः—का०.

४ कर्मस्य—का०. काशिकः परिष्कर्ता यथान्यासमस्य ग्रन्थस्य श्रुतित्वं प्रतिपद्यमानोऽस्यासाधुत्वं नाशङ्कते । कमस्या—ऋ.

५ विषयं—ट, ठ.

६ अयमुत्तरार्धो महाभारते (शा० पर्व०अ० ११८, श्लो० १०) पठ्यते ।

७ प्रतीयन्ते—क४, ख१.२, घ, ख.

८ संज्ञान—क१.

९ उपादेयत्वेन—घ, ङ.

१० इति न धृतम्—घ, ङ.

११ इति न धृतम्—घ, ङ.

१२ प्रणवात्मतया—विद्याभेदाः इत्युपेक्षितम्—ङ.

१३ वेदं—घ, ङ.

१४ चेति यत्ताभ्यो,—येन्तादिभ्यो इत्येवंरूपोपपाठोऽत्र कोशेषु । टीकाग्रन्थपर्यालोचनया शोधितः ।

१५ इत्यतोऽनन्तरं 'तु' इत्यधिकम्—घ, ङ.

प्रसिद्धस्य ब्रह्मणोऽङ्गेभ्यो ज्यौतिषादिभ्यः शकुनज्ञानादय उपाङ्गेभ्यश्च स्वप्नविपाकयोनिज्ञानादयो विद्याभेदाः प्रसिद्धा लोके ॥१०॥

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।

प्रथमं छन्दसामङ्गमाहुर्[1]व्याकरणं बुधाः ॥११॥

तस्य शब्दब्रह्मणो हि यतः स्वरूपसंस्कारः साधुत्वप्रतिपत्त्यर्थः तदासन्नं साक्षादुपकारि । उपकारविशेष[2]कृता ह्यासत्तिः[3] समाख्याता । ऊह्यं[4]चाम्नायान्तरम् । इदमूह्यमिदमनूह्यमिति[5] न्यायादवस्थिते[6] सम्यग्विपरिणतौ[7] लिङ्गवचनादीनां व्याकरणं निबन्धनमिति, आम्नायान्तरप्रतिपत्तिहेतुत्वादासन्नमिति व्यपदिश्यते । तपसामुत्तमं तपः । यानि लोके तपस्त्वेनाभिख्यातानि ब्रह्मचर्याधःशयनो[8]दवासचान्द्रायणादीनि, ये च पवित्रतमाः[9] स्वाध्यायास्तेषामिदं दृष्टादृष्टविशेषफलहेतुत्वादभिख्याततमं[10] तपः । यस्याक्षरसमाम्नायस्य ज्ञानमात्रेण सर्ववेदपुण्यफलावाप्तिरागमेन स्मर्यते[11] तच्छन्दसां प्रथममङ्गं प्रधानत्वात् । एवं ह्याह—प्रधानं च[12] षट्स्वङ्गेषु व्याकरणं, प्रधाने च[12] कृतो यत्नः फलवान्भवति[13] इति ॥११॥

त्वात् । तर्क इति मीमांसा । प्रणवाङ्गोपाङ्गेभ्यः । प्रणवशब्देनोक्तो वेद उच्यते । श्रुतिरर्थवादः । त्रय्यन्ता उपनिषदः । आदिशब्दाच्छ्लोकादयः । यदुच्यते तदप्येते श्लोका इति । अपरे व्याचक्षते—प्रणवस्वरूपेभ्यः श्रुत्यादिभ्य इत्येवमेतद्वेदितव्यम् । श्रुतिः प्रणव एव । स्मृतिः का चिदङ्गं व्याकरणादिलक्षणा । का चिदुपाङ्गं चिकित्सालक्षणा । त्रय्यन्ता वेदान्ताः । सम्यग्ज्ञानहेतवः इति । अभेदज्ञानहेतवः । पुरुषसंस्कारहेतवः इति । संस्कारो धर्मस्तदभिव्यक्तिहेतवः । ज्ञानं च संस्कारश्चेति । वृत्तिव्याख्याता षष्ठीसमासमाह । ज्ञानात्मकत्वाद्वा इति । ज्ञानसंस्कार एव हि पुरुषसंस्कारः । उत्पन्नज्ञानातिशया हि संस्कृता उच्यन्त इति ॥१०॥

तदेवं वेदान्तं प्रदर्श्य तदङ्गतया व्याकरणवर्णनमारभते—साधुत्वप्रतिपत्त्यर्थः इति । न विशिष्टोत्पत्तिरत्र संस्कारः, अपि तु प्रकृतिप्रत्ययादिविभागान्वाख्यानम् । ततोऽपि साधुत्वावसाय

१ ङ्गं प्राहु—क२, का०.

२ शेषस्यासक्तिः—घ, ङ । ०शेषकृताभ्यासक्तिः—ट. टीकापाठस्तूपात्तः ।

३ इति नास्ति—घ, ङ.

४ ऊहाख्यं चा—घ, ङ । समूह्यत्वा—ट, ठ.

५ 'मिदमनूह्य' इति न धृतम्—घ, ङ.

६ अतः परम् 'तु विभागे' इत्यधिकं टीकायाम् ।

७ विपरिणत्येति—घ१, ङ.

८ शायिता—घ.

९ पवित्रा मताः—ट.

१० ख्यातं—घ, ङ । ख्याततमं—च, ट, ठ.

११ आह च भगवान्भाष्यकारः—सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः । सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति ।

१२ इत्युभयत्र न धृतम्—घ, ङ.

१३ इदं व्याकरणप्रयोजनान्वाख्याने भाष्यकृद्वचनम् ।

…दुच्चारणात् । अर्थेन च नित्यमभियोगात् । प्रतिपत्तिक्रमो ह्ययं
* श्रोतुरभिधातुर्वा न व्यवस्थितः । सर्वविशेषणविशिष्टं हि वस्तु संसर्गिणीनां मात्राणां कलापं यौगपद्येनैकस्या बुद्धेर्विषयतामापन्नमुत्तरकालमिच्छन्[2] बुद्ध्यन्तरैः[3] प्रविभजते[4] । प्रविभक्तस्यापि चानुसन्धानमन्तरेणार्थक्रियाविषया प्रतिभा नोत्पद्यत इति पुनः संसर्गरूपमेव प्रत्यवमृशति । योपि चाभिधाता श्रोता वा विभागेन मात्रासु प्रतिपत्तिं लभते तस्यापि प्रत्यासत्त्या महाविषयत्वेनाभिव्यक्तिनिमित्तोपव्यञ्जनप्रकर्षे-

(टी) कर्मणि इति वचनात् । कालस्तु प्रकृत्यर्थोपाधिरपि प्रत्ययाभिव्यङ्ग्य एव **वर्तमाने लट्** इति वचनात् । तदादेशस्तु तिबादिभिः संख्या । तन्निबन्धनाश्च प्रत्ययाः तेषामेकत्वादिनियमात् पुरुषनियमाय । उपग्रहस्तु कर्त्रभिप्रायादिः प्रकृतिप्रत्ययार्थोपाधिरादेशेभ्य एव गम्यत इति भगवान्पाणिनिः[1] । धातुरिति काशकृत्स्नानां सूत्रम् । धातुः साधने कर्मादौ वर्तते । **दिशीति** । दिक्छब्देन क्रिया कालश्चोच्यते । **पुरुषे** इति । प्रत्ययस्तादयः । **चितीति** । आख्यातपदवाच्यायाः संख्याया एतन्नाम । तच्चैतदाख्यातमिति वेदितव्यम् । प्रातिपदिकार्थमाह—**लिङ्गे** इति । लिङ्गे स्त्रीत्वादौ । **किमिति** । नामपदवाच्यायाः संख्यायाः [नाम] । **विभक्तौ** कर्मादिषु कारकेषु । एतन्नामेत्युच्यते । प्रत्ययानामव्यतिरिक्तार्थाभिधानात् । **स्वार्थमभिधाय** इति । यदत्र पूर्वकालवाचिप्रत्ययोभिदधातेरुत्पद्यमानः शब्दगतस्याभिधाख्यव्यापारस्य अर्थेन नियतां क्रमवतीं वृत्तिं श्रुत्या प्रकाशयति । प्रतिपत्तेर्यः क्रमो नियतः तस्यानुगम इति । मात्रग्रहणमभिधानक्रमनिवृत्त्यर्थम् । **वृत्तिरिति** शब्दव्यापारमभिधाख्यमाह । **सकृदुच्चारणाद्** इति । नेषां शब्दानां सत्तामात्रप्रतिबद्धोर्थेषु अभिधाख्यो व्यापारः, अपि तूच्चारणानुगृहीतः । तच्चोच्चारणमेकमेवेत्येक एव व्यापारः । एकस्मिंश्चोच्चारणे जातिप्रत्ययो, न च द्रव्यादयोप्यभिधीयन्त एव ।……एकार्थप्रतिपादनशक्तिप्रबोधे एकमुच्चारणमुपक्षीणमिति नैव प्रतिपादयेत् । **संसर्गिणीनाम्** इति । जात्यादीनाम् । **कलापम्** इति । भेदकल्पनायाम् । **उत्तरकालम्** इति । ततोनुमित्यादिबुद्धिभिर्विभागं करोति जातिरियं द्रव्यमेतदित्यादि । **इच्छन्** इति । फलमन्तरेणेच्छया विभागप्रक्लृप्तेः ।

तथापि च कृतविभागस्य असंव्यवहार्यतामाह—**प्रविभक्तस्य च** इति । न तैरसंसृष्टैर्विशिष्टा प्रतिभोपजन्यते । यतो यथार्थक्रियायाः प्रतीतिरिति ततस्तानर्थान् प्रविभक्तानपि पुनरनुसन्धत्ते । यदाह—**संसर्गरूपमेव** इति । प्रतिपत्तेरर्थप्रत्यायनकालेऽर्थक्रियाकाले च न क्रम इति कथयति । अतो नास्ति प्रतिपत्तिक्रमः । कालद्वयं शब्दस्यार्थप्रतिपत्तौ न च तत्र क्रमोस्तीति । यस्तु मध्यमावस्थायां क्रमः स न शब्दव्यापारात् । अपि तु वृत्ते शब्दव्यापारे प्रतिकल्पनातः । प्रतिपत्तौ च यो-

१ भागवान्न—घ १.
२ इच्छद्—ट.
३ पुरुषान्तरैः—घ, ङ । बुद्ध्यन्तरे—ट. बुद्ध्यन्तरैरित्येव साधु । अनुमित्यादिबुद्धिभिः, इति तदर्थ इति टीका ।
४ प्रविभज्यते—कोशः । अत्र कर्मणि लकारो दुर्लभः । लेखकेन तु 'पुरुषान्तरैः' इति प्रक्षेपप्रयोजितेनैवमलेखीति प्रतीमः । परस्तात् प्रत्यवमृशतीति कर्तृप्रयोगबलादत्रापि कर्तृप्रयोग आश्रयणीयः । किं च । अत्रापि प्रविभागक्रियायां प्रथमोपात्तस्याभिधातुः श्रोतुर्वेति पदद्वयस्य प्रथमया विपरिणतस्य कर्तृत्वम् ।
५ प्रतिपत्त्या—घ, ङ.

* वृत्तिः संभवति । सकृदुच्चारणात् । अर्थेन च नित्यमभियोगात् । प्रतिपत्तिक्रमो ह्ययं

* णोपलिप्सया, बीजवृत्तिलाभानुगुण्येन वा ग्राह्यासु मात्रास्वनियमेन[1] बुद्धिक्रमो व्यवतिष्ठते । तथा ह्याह—

> एकोयं[2] शक्तिभेदेन भावात्मा प्रविभज्यते ।
> बुद्धिवृत्त्यनुकारेण बहुधा ज्ञानवादिभिः ॥१॥

स्थितलक्षणस्तु शास्त्रे पदार्थो वाक्यार्थो वा । तथा ह्युक्तम्—न वा पदस्यार्थे प्रयोगात्[3] । यदत्राधिक्यं वाक्यार्थः सः[4] इति । संग्रहेप्युक्तम्—

> न हि किंचित्पदं नाम रूपेण नियतं क्वचित् ।
> पदानां रूपमर्थो वा वाक्यार्थादेव जायते ॥२॥

अन्वाख्येयस्य खल्वपि पदस्वरूपस्य कृतेपि रूपपरिग्रहे प्रकृतिप्रत्ययादीनां विभागे रूपपरिग्रहानियमो दृश्यते मरुत्वेन्द्राण्यैकागारिकगिरिशश्रोत्रियक्षेत्रियादिषु वाक्यावधिकेन्वाख्याने । तदुक्तम्—

(टी०)ऽसमर्थः तमभिन्नं शब्दार्थमवगन्तुं स क्रमं प्रत्यवमृशति । यथा अभिन्नपदार्थग्रहणासमर्थः प्रकृत्यर्थादिविभागेनार्थं प्रतिपद्यते तथा वाक्यार्थमपि कश्चित्पदार्थानुगमेन । तदाह—**योपि च** इति । **प्रत्यासत्त्या** इति । एते हि प्रत्यासत्त्यादयः पञ्च संसृष्टार्थसन्निधानक्रमावगतिनिमित्तमन्यत्रापीत्युपन्यस्ताः । स हि प्रतिपत्ता स्त्रार्थादिषु संसृष्टेषु यं प्रत्यासन्नं पश्यति तं प्रथमतः प्रतिपद्यते । प्रत्यासत्तिश्चोपकारभावितेत्युक्ता । जातिश्चासन्नोपकाराय । तेन जातिस्वरूपवत्तद् द्रव्यं विविक्तेन रूपेण शक्यावधारणम् । अतः प्रत्यासत्तेः प्रथमतो जातिः प्रतिपद्यते । सा च द्रव्यमन्तरेण अनभिव्यक्ता व्यवहाराक्षमा, लिङ्गादयश्चाश्रयमन्तरेण नावसीयन्त इत्येतेभ्यः प्रत्यासन्नं द्रव्यं प्रतिपद्यते । लिङ्गं तु द्रव्यान्तरानपेक्षं वस्त्वन्तरापेक्षयोः संख्याकारकयोः प्रत्यासीदति । **महाविषयत्वेन** इति । सर्वव्यक्त्यनुगतत्वाज्जातिर्महाविषया । ततश्च स्फुटतरपरिच्छेद्यतया प्रथमतः प्रतिपद्यते । सर्वलिङ्गसाधारणत्वाद् द्रव्यं महाविषयम् । लिङ्गं तु लिङ्गान्तराद् व्यावर्तते । लिङ्गसंख्ययोस्तु लिङ्गं महाविषयम् । यतो लिङ्गं सर्वां संख्यां व्याप्नोति संख्यान्तरात्तु संख्या भिद्यते । अभिव्यक्तेर्निमित्तं यदुपव्यञ्जनं तस्य प्रकर्षो भूयस्ता । यस्य भूयांस्युपव्यञ्जनानि । उपव्यञ्जनभूयस्त्वे प्रथमतः परिच्छेदः । तत्र जातयः सर्वसाधारणतयानेकव्यक्तिव्यङ्ग्यत्वात् भूय उपव्यञ्जनाः । द्रव्यं तु प्रत्येकं स्वावयवव्यङ्ग्यत्वादल्पोपव्यञ्जनम् । **उपलिप्सया** इति । यदपि प्रथमत उपलब्धुमिष्टं भवति । **बीजवृत्तिलाभानुगुण्येन वा** इति । यस्य प्रत्ययस्योत्पत्तौ यदान्तरं कारणं तद्बीजम् । तस्य वृत्तिलाभः प्रबोधलाभः । तस्यानुगुण्यं कार्योत्पादनाभिमुख्यम् । यतस्ते प्रत्ययाः पूर्वप्रत्ययाहितसंस्कारप्रबोधवशादुत्पद्यन्ते । जातिप्रत्ययो द्रव्यप्रत्ययस्य बीजवृत्तिलाभानुगुण्ये वर्तते । तन्निबन्धनत्वात्तत्प्रत्ययस्येति प्रथमतो जातौ प्रत्ययः, तदा…वासनापरिपाकपूर्वं व्यक्तिं प्रतिपद्यते ।

१ मात्रासु—घ, ङ. टीकाग्रन्थस्वारस्यं यथा स्यात्तथाऽस्माभिः पठितं तथैव च सङ्गतार्थप्रतीतिः ।
२ पि—टीका.
३ पा० म० भा० १।२।६४।।१९वा०.
४ पा० म० भा० २ । ३ ।४९।।२ वार्तिके । काशिकः परिष्कर्तृप्रवरस्तु सर्वमिमं वार्तिकभाष्यरूपं ग्रन्थं सङ्कीर्य पठति, 'न वा' इति पदे च परित्यजति । सोस्य भ्रमः ।
५ अर्थरूपं—घ, ङ, का०.
६ विभाग—घ, ङ
७ इति न धृतम्—घ,ङ. टीकाग्रन्थेपि न दृश्यते ।

* णोपलिप्सया, बीजवृत्तिलाभानुगुण्येन वा ग्राह्यासु मात्रास्वनियमेन[1] बुद्धिक्रमो

अर्थात्पदं साभिधेयं पदाद्वाक्यार्थनिर्णयः ।

पदसङ्घातजं वाक्यं वर्णसङ्घातजं पदम् ॥[1] इति ।

व्युत्पत्तौ वाक्यस्थं पदं वर्णसङ्घातजं पदमिति ।

कार्यकारणभावेन खल्वपि सम्बन्धो निदर्शितः । तद्यथा—तेपि हि तेषामुत्पत्तिप्रभृत्या विनाशाद् बुद्धीर्व्याचक्षाणाः सतो बुद्धिविषयान्प्रकाशयन्ति[2] **इति । योग्यभावेनापि सम्बन्ध उपवर्णितस्तत्र तत्र ।** अभिधानं पुनः स्वाभाविकम्[3] । समाने वर्णे शोणकर्कहेमादीनामश्वविषयत्वं गवादिषु चाप्रवृत्तिः[4] **। तथेदमुक्तम्**—समानमीहमानानामधीयानानां च के चिदर्थैर्युज्यन्ते ऽपरे नं **इत्येवमादि ।** तथाजातीयकाः खल्वप्याचार्येण स्वरितञितः पठिताः, ये उभयवन्तः, येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति । **संग्रहकारः पठति —**

शब्दार्थयोरसंभेदे व्यवहारे पृथक्क्रिया ।

यतः शब्दार्थयोस्तत्त्वमेकं तत्समवस्थितम् ॥१॥

स एव पुनराह—

सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः ।

शब्दैरेव हि शब्दानां सम्बन्धः स्यात्कृतः कथम् ॥२। २६॥

(टी०) व्यक्तिप्रत्ययो लिङ्गादीनामाश्रयपरतन्त्राणां प्रतिपत्तावनुगुणः । **अनियमेन** इति । तत्र यथा जातिर्द्रव्यमन्यतो विविक्तेन रूपेण दर्शयति व्यवहार्यतां नयति तथा लिङ्गादयो विनापि जातिं रूपेण । इयमेकस्यैतत्कर्मेति । न चानभिव्यक्ता द्रव्येणोपलभ्यत इति व्यभिचरति जातेः प्रत्यासत्तिः ।

अन्वाख्येयस्य शब्दस्य लिङ्गमाह—**रूपपरिग्रहे** इति । पदावधिकेन्वाख्याने यत्स्वरूपं तदेव प्रातिपदिकानामव्ययानाम् । दर्शनभेदाद्भेदेपि व्यवस्थितरूपत्वात्पदमेवान्वाख्येयमिति । **मरुत्त** इति । अत्र मरुतोस्य सन्तीति **तप्पर्वमरुद्भ्याम्** इति तप्प्रत्ययमेके, मरुद्भिर्दत्त इति वा ददातेर्निष्ठायामुपसंख्यानात्तत्वमाहुः । वाक्यस्यान्वाख्येयतायां **संग्रहोक्तलिङ्गमाह—अर्थात्** इति । प्रयोजनात् । **पदं साभिधेयम्** इति । पदमर्थश्च व्यवस्थाप्यते । न पुनस्तयोः सत्यत्वम् । वर्णसङ्घातजं पदम् इति दृष्टान्तः । **व्युत्पत्तौ** इति । वाक्यमयं व्युत्पाद्यमानोनेनोपायेन व्युत्पाद्यते अपोद्धारकल्पनामङ्गीकृत्य तथा दृष्टान्तोपि व्युत्पत्तिसमाश्रयेण । **ते पि हि** इति । प्राक् स्वरूपकथनायोक्तम् । सम्प्रति लिङ्गत्वेनोपन्यास इति विशेषः ॥ २६ ॥

१ अयं संग्रहग्रन्थ इत्यत्र वृषभः प्रमाणम् ।

२ पा० म० भा० ३।१।२६। १५ वार्तिके । तत्र विनाशाद्बुद्धीरिति भाष्यपाठः । स एव समीचीनः ।

३ पा० म० भा० २।२।२९।।१५ वा०.

४ अयं भाष्यतोर्थत उद्धारः । चार्थे द्वन्द्वः (२।२।२९॥) इतिसूत्रे अन्यत्रापि तद्विषयदर्शनात्, इति वार्तिकभाष्ये ह्युक्तम्—समाने रक्ते वर्णे गौर्लोहित इति भवत्यश्वः शोण इति । समाने च काले वर्णे गौः कृष्ण इति भवत्यश्वो हेम इति । समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति ।

५ पा० म० भा० २।२।२९॥

६ पा० म० भा० १।१।७२॥

७ सम्बन्धे—ट, ठ.

शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।

अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ॥ २७ ॥

यथैवान्यानि धर्मसाधनानि शिष्टोपदेशपारम्पर्येणागमाविच्छेदेनागतानि[3] अनभिशङ्कनीयानि[4] व्यवस्थितानि । यथा च प्रतिषिद्धानि हिंसानृतस्तेयादीनि[5] अशिष्टाप्रतिषिद्धानि च हिक्कितश्वसितकण्डूयितादीनि व्यवस्थितानि । तथा साध्वसाधुव्यवस्थानमप्यनवच्छिन्नपारम्पर्यमनभिशङ्कनीयं यथागमादेव सिद्धमिति ॥२७॥

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते ।

प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ॥ २८ ॥

यदि नित्यानां शब्दानामभिव्यक्तिर्जन्मादिविक्रियापत्तिर्वा सताम्, असतां वा सोपाख्यनिरुपाख्यत्वं, सर्वथैषामप्रवृत्तशब्दव्यवहारा प्रथमा कोटिर्न विद्यते ।

टी० – तत्र प्रत्ययाङ्गतायाः स्वाधारत्वाद्धर्माङ्गतां दर्शयितुमाह—शिष्टानां यदिदमविच्छिन्नपारम्पर्यं स्मरणं स आगमः । तस्मात् सिद्धास्साधवः । अतश्च तद्धर्मसाधनम् । अथ वा आगमादविच्छिन्ना ये साधवः सिद्धास्ते शिष्टेभ्यः सकाशाद्धर्मसाधनमिति सिद्धाः । न तु शिष्टग्रहणेनागमो विशेष्यते । यतोऽनादिरगृह्यमाणकारण आचारोपदेश आगम इत्यागमलक्षणम् । तेनागमाद्ये साधवः सिद्धाः ते शिष्टस्मरणाद्धर्मसाधनम् । यत एवं स्मरन्ति—**एकः शब्दः सम्यग्ज्ञातः** इत्यादि ॥२७॥

तच्चैतच्छब्दानामनादित्वे घटत इत्यनादित्वं साधयन्नाह—**प्राणिनामिव** इति । यथैव प्राणिनामनित्यत्वेपि शरीरावग्रहस्यानादित्वमिति । **सा चैषा** इति । कूटस्थनित्यताया अन्या व्यवस्थानित्यता इतिसंज्ञिता । व्यवहारनित्यतेति यावत् । कार्यपक्षमाह—**असतां वा** इति । प्रागसत्योऽनुपाख्यः कारणेभ्य उपलब्धात्मा सोपाख्यः । पुनस्ततोऽन्यतो वा लब्धविनाशो निरुपाख्य इति । **अप्रवृत्ते**ति । पक्षद्वयेपि न सा कोटिर्मर्यादास्ति यत्रायं शब्दव्यवहारो न प्रवृत्तपूर्वः । **पुरुष** इति केचित्पृथिव्यादिसङ्घातमाहुः । अपरे परमात्मानम् । स एव च कारणमिति । **क्षेत्रज्ञ** इति सांख्यीयः पुरुषः । तदौत्सुक्याद्धि प्रधानं महदाद्यात्मना परिणमत इति । **विभक्ततत्त्वान्** इति । एते हि तेभ्यः कार्येभ्यो व्यतिरिक्ता इति । कथमेकत्वमनतिक्रान्तं नानाजातीयमित्याह—संमूर्च्छितेति । संमूर्च्छितानां संभि-

१ शिष्टेभ्यश्चा°—क १. २. ३. ४. ७, ख २. १, घ, ङ.

२ गमाः—ख १. १, घ, ङ.

३ विच्छेदेन चागतानि—ठ । विच्छेदे चागतानि—ट.

४ अशङ्कनीयानि—घ, ङ.

५ अपिशिष्टा°—ट, ठ. टीकाकृत्त यथास्माभिरपाठि तथैव पठति । तथैव चार्थवत् ।

६ हसितकण्डूयिता°—ट, ठ, टीका.

७ व्यवस्थितपारम्पर्य°—ट, ठ.

८ शङ्कितं—ठ.

९ कि: शब्दस्वादि°—घ १.

१० अत्र नञं लोपयता काशिकेन संस्कर्त्रा तज्जमर्थवैपरीत्यं नादर्शि ।

११ टीकाकोशद्वयेपिविभक्तत्वात् इति पाठः । स शोधितः । अन्यथा टीकाग्रन्थेन न कश्चन संवादः ।

* न परा[1]। ये चेश्वरकालपुरुषविद्याक्षेत्रज्ञान्[2]विभक्ततत्त्वानाहुः। ये चानीश्वरकमका-
लमपुरुषमविद्यमक्षेत्रज्ञमविद्यामात्रमेव मन्यन्ते, ये चैकत्वानतिक्रमेण[3] समूर्च्छितविरु-[4]
द्धापरिणामशक्तिरूपनिर्भासपरिग्रहमपूर्वापरं[5] विश्वमाचक्षते, तेषां सर्वेषां नास्ति कश्चिदप्रवृत्तप्राणिव्यवहारः प्रथमो नाम कालाध्वा[7]। सा चेयमनादिरविच्छिन्ना प्रवृत्तिर्नित्यता[8]। तथा ह्युक्तम्—तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते[9] इति ॥ २८ ॥

नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति ।
तस्मान्निबध्यते[10] शिष्टैः[11] साधुत्वविषया[12] स्मृतिः ॥ २९ ॥

को हि शिष्टः संभिन्नबुद्धिरपि लोकं प्रत्यनभिनिविष्टो[13] दुर्ज्ञानं दुरध्येयं[14] च स्वरसंस्कारादिनियमं[15] लौकिकवैदिकानां शब्दानां प्रयोजनं व्यवस्थापयितुमुत्सहते। न चानर्थको नियमः। कृतोपि शिष्टैरपरैर्न परिगृह्यते। प्रमाणं वा विदुषां लोके[16] न स्यादिति। तस्मादनादिर्गुरुपूर्वक्रमागता शिष्टानुमानहेतुरव्यभिचारा[17] लक्षणप्रपञ्चाभ्यां पर्यायैः शब्दवती चाशब्दा[18] च स्मृतिर्निबध्यते ॥ २९ ॥

(टी०) नानां विरुद्धानामपरिणामानां शक्तिरूपनिर्भासानां परिग्रहः स्वीकारोस्येति व्याख्यातम् । तत्त्वम् इति । स एवायमिति प्रत्ययो यस्मिन्न व्यावर्तते। शब्देषु देशकालभेदेनोच्चरत्सु स एवायमिति प्रत्ययोस्ति ॥२८॥

यद्यपि शिष्टागमाविच्छेदेन साधवो व्यवस्थितास्ते तु कथं धर्मसाधनमित्याह—**निबध्यते** इति । अविच्छेदेन व्याकरणस्य स्मृत्युपनिबन्धनस्य स्थितत्वात् । अन्तर्हितामपि च तत्संस्कृतान्तः—करणास्सन्तः पुनः स्मृत्योपनिबध्नन्तीति । को हि शिष्टः प्रयोजनं व्यवस्थापयितुमुत्सहेत इति सम्बन्धः । शिष्टो हि परानुग्रहे प्रवृत्तः कथमेवं कुर्यात् । **संभिन्नबुद्धिः** इति । नास्तिकः । स हि पुण्यापुण्ययोस्तुल्यबुद्धित्वान्मिश्रितबुद्धिः । **लोकं प्रति** इति । अपि नामायं लोकः खेदायासाभ्यां युज्यत इति व्युत्थितबुद्धिरभिनिविष्टः । ये **स्वनभिनिविष्ट** इति पठन्ति तेषां सुगममेव । **दुरध्येयम्** इति ।

१ इति त्यक्तम् घ, ङ.
२ क्षेत्रज्ञाद्विभक्ततत्त्वा—घ, ङ.
३ चैककालतत्त्वानतिक्रमेण —ट, ठ.
४ संमूर्च्छित°—टीका, ठ.
५ परिमाणशक्ति°—घ, ङ, ट.
६ पूर्वमपरं—घ, ङ. कारणमा—टीका.
७ ध्वनोरियमनादि°—घ, ङ.
८ त्तिरनित्यता—कोशः .
९ सिद्धे शब्दार्थसम्बन्धे इतिवार्तिकभाष्ये।
१० तस्मान्निबद्धा—ग १. २. ३. ४ । तस्यां निबध्यते—ठ.
११ नित्या—क ५, का०, ट.
१२ सा साधु°—ग १. २. ३. ४.
१३ प्रत्यभिनिविष्टः—ठ.
१४ दुरवधेयं—घ २ । दुरध्ययनं—ट, ठ.
१५ स्वरूपसंस्कारा°—ट, ठ.
१६ लोको—ट, ठ. अपपाठः ।
१७ °भिचारेति समस्तः कोशस्थः पाठः । टीकापाठस्तूपात्तः । तथा च टीकाकृदाह—अव्यभिचारेति । लक्षणस्यान्यथा प्रणयनेपि सारभूतप्रतिपाद्यसाधुशब्दरूपाव्यभिचारात् ।
१८ चापशब्दा—घ, ङ. अयमपशब्दः ।

* न परा[1]। ये चेश्वरकालपुरुषविद्याक्षेत्रज्ञान्[2]विभक्ततत्त्वानाहुः। ये चानीश्वरकमका-

* न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्[2] ॥ ३० ॥

सर्वेपि वादिनो दूरमपि गत्वा स्वभावं न व्यतिवर्तन्ते। अदृष्टार्थानां च कर्मणां फलनियमे स्वभावसंविदागमप्रतिबद्धा[3]। को ह्यनवस्थितसाधर्म्यवैधर्म्येषु नित्यमलब्धनिश्चयेषु पुरुषतर्केषु विश्वासः। येष्वपि तर्कातीतः पृथग्विद्याचरणपरिग्रहेषु कश्चिदनुत्तरः पुरुषधर्मः श्रूयते, तेष्वपि तदर्थज्ञानमार्षमृषीणामागमिकेनैव[5] धर्मेण संस्कृतात्मनामाविर्भवतीत्याख्यायते। स्वाभाविके हि तस्मिन् प्रयत्नः फलाद्व्यतिरिच्येत स्वभावतश्च प्रत्यवायोपि तथाभूतः स प्रसज्येत ॥३०॥

धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः ।
न ताँल्लोकप्रसिद्धत्वात्कश्चित्तर्केण बाधते ॥३१॥

बहुविकल्पेष्वपि शिष्टानां चरणेषु सन्ति साधारणाः प्रसिद्धाः पुरुषहित-[7]

(टी०) उदात्तादीनां परिज्ञानेप्यशक्योच्चारणत्वात् ॥२८॥

पर्यायैरिति भेदैः । **शब्दवती च** इति । साक्षाच्छब्देनोपात्ता । यथा अग्नेर्ढक् इति । **अशब्दा** समाचारनिबन्धनादेव स्मरणात् । यथा इष्टमेवैतद्गोनर्दीयस्येति ॥२९॥

तदेवमागमात्साधुशब्दानां धर्माङ्गतामभिधाय तदन्यस्य धर्मे प्रत्युपायभावमपाकरोति—**सर्वे हि** इति । युक्तिवादिनोप्यत्यन्तमनुबध्यमानाः स्वभावमेवान्ते तथा ते वदन्ति । यतस्त्रैगुण्यवादी प्रधानस्य त्रिगुणात्मनः कारणस्याभेदे कथं कार्यभेद इति तेषामङ्गाङ्गिभावाद्भेदमाह । स एव कुत इति पृष्टः, पुरुषोपभोगनिमित्तत्वादिति । कथं पुनरचेतनं पुरुषोपभोगाय प्रवर्तत इति न स्वभावादन्यं हेतुमाह । तदेवं दृष्टेपि न युक्तिः कृतास्पदा यत्र भिन्नकार्यदर्शनाच्छक्यते शक्तिभेदानुमानम् । अदृष्टे तु दूरोत्सारितैव । यदाह—**दृष्टार्थानां च** इति । **को हि** इति । सत्तायां सर्वेषां साधर्म्यं विशेषरूपतया सर्वेषां वैधर्म्यम् । **पुरुषतर्केषु** इति । आगमसमुत्थत्वाद्वाक्यार्थतर्कादवच्छिनत्ति । **पृथग्** इत्यार्षम् । चरणं चर्या आचारः सिद्धान्तो वा तस्य परिग्रहो येषु प्रवादेषु, येषां वा कपिलादीनाम् । **अनुत्तरः** इति । सर्वपुरुषातिशायी सूक्ष्मादिविषयत्वात् । **पुरुषधर्मः** सर्वपदार्थदर्शित्वम् । **आर्षम्** इति ज्ञानविशेषस्य संज्ञा । **स्वाभाविके हि** इति । अहेतुके । **यत्न** इत्यभ्यासादिकः । निरर्थको **यत्न** इत्यधिकः प्रत्यवाययोगः ॥३०॥

आगमानां विप्रलम्भभूयिष्ठत्वात् कुतः प्रतिपत्तव्यमित्याह—**धर्मस्य चाव्यवच्छिन्नाः** इति । यत्रा-

१ हेतुकम्—क ४, का०.
२ अस्योत्तरार्धं जयन्तभट्टेन न्यायमञ्जर्यां १०७ तमे पृष्ठे यथातथमुदाहृतम् । तदेव च हेलाराजेन जातिसमुद्देशे ज्ञानमस्मद्विशिष्टानामित्यादिश्लोकव्याख्यायां संगृहीतम् ।
३ प्रतिबन्धं—कोशः . संशोध्य तु विवरयोद्धृतम् ।
४ इति परेण समस्तं पठितम्—घ, ङ.
५ ज्ञानमृषीणा०—ट, ठ.
६ इति नास्ति—घ, ङ.
७ पुरुषप्रसिद्धपुरुषगीतप्रतिपत्ति—ट, ठ.

* न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।

स्वप्ने हि बधिरादीनां शब्दादिप्रतिपादनम्, घनसंनिविष्टावयवानां च कुड्या-दीनामवयवविभागमन्तरेणान्तर्वेश्मादिषु सूक्ष्माणामर्थानां दर्शनं यत्सर्वप्रवादेषु सिद्धं, तत्र कथम्भूतानि साधनानीत्यदृष्टशक्तिमचिन्त्यां हित्वा नान्यानि साधनान्याख्यातुं शक्यन्ते ॥३६॥

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ॥

अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥[३] ३७॥

तत्रोत्पत्तिपक्षे तावत्कथमपदमवस्तु निरात्मकमदृष्टाप्रतिनियतकारणशक्ति-परिग्रहमधिगन्तुं शक्यते। पक्षान्तरे च विशिष्टव्यक्तिरूपतिरोभावाद् व्यवहारं प्रति तदविशेषं वस्तु निरुपाख्यैरेव तुल्यम्। अथ च तपसा निर्दग्धदोषा निरावरणख्यातयः शिष्टाः प्रतिबिम्बकल्पेन प्रत्यक्षमिवं स्वासु ख्यातिषु संक्रान्ताकार-परिग्रहमव्यभिचरितं सर्वं पश्यन्ति ॥३७॥

अतीन्द्रियानसंवेद्यान्पश्यन्त्यार्षेण चक्षुषा ।

ये भावान्वचनं तेषां नानुमानेन वाध्यते ॥३८॥

टी॰—प्रत्यक्षानुमानागमव्यतिरिक्तां प्रतिपत्तिमाह—**प्रत्यक्षम्** इति। पित्रादीनां कर्मजाः सिद्ध्योऽन्तर्धानादयः। न तत्र प्रत्यक्षं नाप्यनुमानं व्याप्रियते न च शब्दागमोपि ॥ ३६ ॥

इदानीं प्रसिद्धप्रत्यक्षव्यतिरेके प्रत्यक्षान्तरमाह—**आविर्भूतेति**। **उत्पत्तिपक्षे** इति। असत्कार्यपक्षे। **अपदम्** इति। अनाश्रयम्। निरुपाख्यतया न प्रतिबद्धं क्वचित् शक्तिरूपेण स्थितम्। **अवस्तु** इति। शरीराभावात्। अत एव निरात्मकं निःस्वभावम्। पूर्ववदनुमानेनावधारणमाह—**अदृष्टेति**। कारणशक्तेः कारणावस्थायाः परिग्रहः स्वीकारः कार्यदर्शनाद्यदा विधीयते ततस्ते परिगृहीता भवन्ति। तदा च कार्याभावात्तद्दर्शनाभावे कारणशक्तिरपि नावसीयत इत्यदृष्टः कारणशक्तिपरिग्रहः। अथ कार्यदर्शनाच्छेषवदनुमानेनातीतमवगम्यत इति तत्रापि स्वयमभावात्कारणशक्तिस्तस्य नास्त्येवेति सुतराम् अदृष्टश्चाप्रतिनियतश्च शक्तिपरिग्रहः। **पक्षान्तरे** इति। सत्कार्यपक्षे। **विशिष्टेति**। विशिष्टं व्यक्तिरूपं व्यवहारयोग्यं वर्तमानावस्थस्य दृष्टम्। तथास्त्यतीतानागतयोः। यत्तदस्तीत्यङ्गीक्रियते तदव्यवहार्यं न प्रत्यक्षसमधिगम्यमिति। येनास्मदादयः शशविषाणं वा अतीतानागते

१ घनेतिशब्दरूपं नास्ति—घ २, ट, ठ.

२ द्रुत°—क ५, का° । प्लवचे°—ग १. ३.४ । नुपस्कृत°—ट, ठ.

३ इदं कैयटेन पृषोदरादीनि (६।३।१०९) इति सूत्रभाष्यप्रदीपे संगृहीतम्।

४ कारक°—घ, ङ.

५ शक्ति—ट, ठ.

६ व्यवहार्यं—ठ.

७ मिवावस्थासु ख्यातिषु—ठ. एषोऽपपाठः।

८ संक्रान्ताः परि°—का॰. अनर्थकोऽपपाठः.

९ परिगृहीतम—ट, ठ.

१० इदं कैयटेन पृषोदरादीनि (६।३।१०९) इति सूत्रभाष्यप्रदीपे संगृहीतम्। गोपालिकाकारेण रामचन्द्रेण च स्फोटसिद्धावेकाविंशश्लोकव्याख्यायामुदाहृतम्। तत्र कोऽति क्र-मितुमर्हति इति पाठ उपात्तः।

* अन्तर्यामिणमणुग्राममभिजातिनिमित्तनिबन्धनमनभिव्यक्तं शब्दब्रह्म शक्त्यधिष्ठानं देवताः कर्मणामनुबन्धपरिणामशक्तिवैकल्यानि सूक्ष्ममातिवाहिकं शरीरं पृथगन्यांश्च तीर्थप्रवादेषु प्रसिद्धानर्थान्रूपादिवदिन्द्रियैरग्राह्यान् सुखादिवत्प्रत्यात्ममसंवेद्यान् ये शिष्टा व्यावहारिकादन्येन चक्षुषा मुक्तसंशयमुपलभन्ते। तेषामनुमानविषयतातीतं वचनं व्यभिचारिभिरनुमानैरपाकर्तुमशक्यम्। जात्यन्धानां हि रूपग्रहणमेवमुत्पद्यत इति सावस्था नैवाभ्युपगतपूर्वा कदाचित्, तस्यां कथमनुमानं प्रवर्तेत ॥३८॥

यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते ।

स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥३९॥

सन्ति प्रतिचरणं प्रतिपुरुषं चाप्ताः। येषां वचनमविचारितं स्वमिव दर्शन-

(टी॰) न प्रत्यक्षयन्ति। ख्यातिर्बुद्धिः। **प्रतिबिम्बकल्पेन** इति। तेऽतीतादयो वहिः सन्तोपि प्रतिविम्वरूपेण तेषां वुद्धिषु प्रत्यवभासेरन्। परिगृह्यत इति परिग्रहः। सङ्क्रान्त आकारपरिग्रहोऽस्येति ॥ ३७ ॥

येप्येते तर्कप्रतिसरणास्तेपि स्वस्मिन्सिद्धान्ते कांश्चित्पदार्थान् तर्कवहिष्कृतानागमादेव इच्छन्तीति सर्वैरेवागमस्य प्रामाण्यमङ्गीकृतमिति अपौरुषेयादागमात्किमिति धर्माङ्गत्वं न सिध्यतीत्याह—**अतीन्द्रियान्** इति। अनागमगम्यानाह—**अन्तर्यामिणम्** इति। व्याख्यातोन्तर्यामी। **अणुग्रामम्** इति। चतुर्विधाः परमाणवः। तान् विशिनष्टि—**अभिजातिः** सर्गस्तस्य निमित्तं प्रेरितं कर्म, तस्य निवन्धनं परमाणवः। तत्र समक्रियासमवायात्। यतस्सर्गे चतुर्विधाः परमाणवोऽदृष्टप्रेरिताः संयोगसचिवा द्व्यणुकादिक्रमेण शरीरेन्द्रियपृथिव्यादिकार्यमारभन्ते। **अनभिव्यक्तम्** इति। अविवृत्तम्। **देवताः** इति। मूर्त्ताश्चामूर्त्ताश्च या उद्दिश्यन्ते। **अनुबन्धः** कृतानां कर्मणां फलप्रदः संस्कारः। प्रध्वंसित्वात्तु स्वरूपेणानवस्थानमिति **परिणामः** तस्यैवानुवन्धस्य सहायान्तरप्रतिवोधितशक्तेः फलदानाभिमुख्यम्। कार्यान्तरोपजननं प्रत्यसामर्थ्यं कर्मणः **शक्तिवैकल्यम्**। **सूक्ष्मम्** इति। दिव्यम्। **आतिवाहिकम्** इति। इह मृतस्य देशान्तरे शरीरान्तरग्रहणाय यदन्तराभवं शरीरं तद्देशमतिवाहयतीत्यातिवाहिकम्। **पृथग्** इति। ऋद्धिप्रातिहार्यादि। **इन्द्रियै** रूपेन्द्रियैः। **व्यभिचारिभिः** इति। अनुमानस्वरूपकथनं, यतः सर्वमेवानुमानं व्यभिचारीति, न तु विशेषणम्, अव्यभिचारिणोऽनुमानस्याभावात्। **साऽवस्था** इति। रूपानुभवावस्था ॥ ३८ ॥

तत्रैतत्स्यात्। यद्यपि तेषां वचनमनुमानेन न वाध्यते। ये तु तद्वचनात्प्रवर्तन्ते तेषां

१ भिज्ञानिमित्तनिषेधनम°—घ १, ङ। भिजातिनिबन्धनम°—घ २। भिजातिनिमित्तनिबन्धन°—ट, ठ.

२ रर्थान् ग्रा°—घ, ङ

३ प्रत्याख्यं—घ, ङ. टीकानुसारेण तु पठितम्.

४ 'अनुमानैः शिष्टा एव व्यवहारे' इति कोशस्थः कोष्ठके निक्षिप्तः पाठः।

५ मानैः स्वीकर्तुं°—घ, ङ.

६ रूपादिग्रहण°—घ, ङ.

७ नाभिशङ्कते—क १.२.३.४.५.७. ख १.२, घ, ङ.

* अन्तर्यामिण - - -

रूपपरिग्रहकृताद् बुद्ध्यवच्छेदान्नानात्वकल्पना । शब्दाकृतिव्यक्तिभेदाभेदव्यपाश्रयो वा पूर्वेषामाचार्याणां दर्शनभेद इति परस्तादेतद्वस्तुगत एव प्रपञ्चो भविष्यति ॥४६॥

अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥४७॥

एकत्वपक्षे नानात्वपक्षे वा बीजसत्तावस्थस्याविवृत्तस्य ज्योतिषो यथोत्सरेण प्रकाशात्मनाऽभिप्रज्वलितस्य स्वपररूपप्रतिपत्तिकारणत्वं प्रागसंवेद्यं पश्चादुपजायमानं दृश्यते । तथैव शब्दभेदभावनानुगते बुद्धितत्त्वे योऽयं शब्दः प्राप्तपरिपाके स्वबीजे लब्धाभिमुख्यः स्थानकरणाद्यनुगृहीतो विवर्तते स व्यञ्जकध्वनिभेदानुपातेन व्यवच्छिद्यमानोद्देशः पौर्वापर्यवानुपलभ्यमानः स्वरूपपररूपयोः प्रकाशको भवति ॥४७॥

वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः ।
करणेभ्यो विवृत्तेन ध्वनिना सोऽनुगृह्यते ॥४८॥

(टी०) पूर्वे स्मर्तारः । आत्मभेदस्य इति । आत्मभेदशब्दात्प्रथमाद्द्वितीययोः साधुत्वमाह । येषां दर्शनमन्यद्व्रियते वा कारणात्कार्यमिति तेषां निमित्तप्रतिपादकयोर्व्यक्त एव भेदः । शक्तिप्रविभागेति । शक्तेः प्रविभागो रूपभेदः, तस्य परिग्रहः स्वीकारः, तत्कृताद्बुद्ध्यवच्छेदात् । अवच्छिद्यमाना बुद्धिर्बुद्ध्यवच्छेदः । शब्दाकृतिव्यक्ती इति । तत्र केषां चिच्छब्दाकृतिर्निमित्तं, शब्दव्यक्तिर्वाचिका । अपरेषामेतदेव विपरीतम् । तयोश्च के चिद्भेदमभेदं चापरे प्रतिपन्नाः ॥४६॥

तत्रैको निमित्तमिति यदुक्तं तद्व्याचष्टे—एकत्वपक्षे इति । भौतिकत्वे तेजोभूयिष्ठत्वात्काष्ठमेव ज्योतिरात्मना परिणमत इति । बीजसत्तावस्थस्य इति । बीजात्मना या सत्ता तया अवस्थितस्य ज्योतिषः । बीजभावेनावस्थितस्येति यावत् । सत्कार्यवादी तदानुपलम्भाद् बीजभावेनैवावस्थितमिच्छति । असत्कार्यवाद्यपि ज्योतिष उत्पादनशक्तिं तत्रेच्छत्येवेति । प्राग् इति । बीजावस्थायाम् । पश्चाद् इति । विवृत्तिकाले । शब्दभेदेति । भिद्यन्त इति भेदाः । भिन्नानां शब्दानां यानि बीजानि तदनुगतं बुद्धितत्त्वम् । व्यवच्छिद्यमानेति । व्यवच्छिद्यमानाः परस्परतो व्यावृत्ताकारा उद्देशाः प्रदेशा अस्येति । अपरे तु समस्तमेव पठन्ति । व्यवच्छिद्यमाना ये उद्देशाः तेषां यत्पौर्वापर्यं तद्वानिति ॥४७॥

१ शब्दबुद्ध्यवच्छेदा°—घ, ङ.
२ व्यक्तीति न धृतं कोशे ।
३ यथान्तरेण—घ, ङ.
४ स्वरूपप्रति°—घ, ङ, का० । पररूपप्रति०—ट. टीकापाठस्तूपात्तः ।
५ °भेदबीजानु°—टीकापाठः । दृश्यशब्दभेदभावनानु°—ट, ठ.
६ व्यवच्छिन्नो°—घ २.
७ देशपौर्वापर्य°—घ, २.
८ कारणेभ्यो—क ५, ख, का०. इदमसाधु ।
९ निवृत्तेन—क १.२. ३.४.७, ख २. ३.
१० सोऽनुगम्यते—ग २.

इह शब्दार्थयोः सोऽयमिति सम्बन्धानुगमे क्रियमाणे यच्छब्दरूपमर्थे समारोपयितुमिष्यते, यस्मिंश्चार्थरूपमुपयोगेनानुप्रवेशं लभते, तत् पूर्वं बुद्धिनिरूपणया कृतसंस्पर्शमभिधेयात्मनि प्राप्यमाणं यथाभिप्रायं रूपविपर्यासेनैव रूपान्तरोपग्राहि स्वरूपं निवेशयति । करणेभ्यो विवृत्तेन इति । अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिं विक्रियाधर्माणमनु विक्रियते । तच्च सूक्ष्मे व्यापिनि ध्वनौ करणव्यापारेण प्रचीयमाने स्थूलेनाभ्रसङ्घातवदुपलभ्येने नादात्मना प्राप्तविवर्तेन तद्विवर्तानुकारेणात्यन्तमविवर्तमानं विवर्तमानमिव गृह्यते ॥४८॥

नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च सः ।
अक्रमः क्रमरूपेण भेदवानिव जायते ॥४९॥

टी०—कथमस्य बुद्धाववस्थानं कथं वा कार्यकारणभाव इत्याह—वितर्कितः इति । विशिष्टेन रूपेण निरूपितोऽन्यव्यावृत्तेन । पुरा इति प्रागुच्चारणात् । करणेभ्यः इति स्थानकरणजेन ध्वनिना नादेन अनुगृह्यते अभिव्यज्यते ।

सम्बन्धानुगमे इति । सम्बन्धव्युत्पादने क्रियमाणे न पुनर्निष्पाद्ये सम्बन्धे, स्थितत्वात् । उपयोगेन इति । व्यापारेण स्वरूपसमारोपणाख्येन । आवेशम् इति । अनुप्रवेशम् । पूर्वत्र शब्दाध्यारोपोऽर्थे । सम्प्रत्यर्थरूपाध्यारोपः शब्द इति । तद् इति । शब्दरूपम् । पूर्वत्र हि पक्षद्वयेऽपि यच्छब्देन शब्दोऽभिहितः । कीदृश इत्याह—बुद्धिनिरूपणया इति । बुद्ध्यादिनिरूप्यमाणस्तद्विषयाभावापत्तेः स्पृष्ट इत्युच्यते । एवमसौ शब्दो वितर्कितो बुद्ध्येत्युच्यते । रूपविपर्यासवशेन इति । शब्दरूपमपहायार्थरूपापत्तेः । न तु परमार्थतः स्वरूपभानमादर्शस्येव मुखरूपप्रतिपत्ताविति इवशब्दोपादानम् । सूक्ष्मे इति । परमाणुकल्पत्वान्नादभागानाम् । व्यापिनि इति । तेषां नादभागानां सकलव्योमव्यापित्वात् ॥४८॥

१ शब्दार्थभेदेषु न—ट, ठ.
२ योगेषु—घ २ । योगे—घ १, ट.
३ व्यावेशं—ट, टीका .
४ रूपतया—घ, ङ. अपपाठः । प्ररूपणया—ट, ठ.
५ ०पर्यासवशेनेव—टीकापाठः. ०पर्यासेनैव—कोशः ।
६ ०पग्रहं—टीकापाठः.
७ ऽपि—घ, ङ । व्यापि—ट. टीकाकृत्पाठ इहोपात्तः ।
८ व्ययेन—घ, ङ । व्यापारप्रचयेन—ट.
९ प्रलीयमाने—ट, ठ.
१० लब्धेन—घ, ङ.
१२ जातत्वान् न —क५, ग१.२.३.४,का०,ट,ठ.
१३नापरश्च —क५, का०, ठ.
१४ सक्रमः—क १.२, ख २. ३. काशिकः संस्कर्ता 'अक्रमः' इत्युपाददानोऽपि नैतदभिरोचयति । यतः स 'सक्रमः' इति पाठान्तरं युक्तमिति निगदति । यद्येवं सक्रम इत्येव किमिति नोपादत्ते । न हीश्वर आज्ञापयति सम्मतेऽपि पाठे द्वेष्य इव वर्तितव्यमिति । तस्य युक्तत्वे चास्याभिमानोऽपि न युक्त इति पश्यामः ।
१५ गृह्यते—क५, का०.
१६ इदं हेलाराजेन कालसमुद्देशे अभिव्यक्तिनिमित्तस्येत्यादिश्लोकव्याख्यायां यथातथ*

क्रमवता हि व्यापारेणोपसंह्रियमाणप्रचयरूपो नादः सप्रतिबन्धाभ्यनुज्ञया वृत्त्या स्फोटमवद्योतयति। स तदानीमेकोपि विभक्तोद्देशावच्छेद इव प्रत्यवभासते। तस्य तु क्रमयौगपद्ये नित्यत्वैकत्वाभ्यां विरोधान्न[2] विद्येते। तेनासावेकत्वमनतिक्रामन्संसर्गिणो नादस्य भेदरूपमुपसंगृह्णाति। संसर्गिधर्मं[3] एवायमित्थम्भूतः। तथा ह्यत्यन्तमभिन्नात्मा भिन्नरूपावयवोऽवयवी नानादेशस्थिताधारो वैचित्र्येणोपलभ्यते ॥४९॥

प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात्।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥५०॥

तत्त्वपक्षे ऽन्यत्वपक्षे वा चन्द्रादिप्रतिबिम्बं यत्राधारे संसृष्टमिवोपलभ्यते न हि तत्तथा। तत्तु निष्क्रियमपि तोयतरङ्गादिक्रियाधर्मोपग्रहेणैव तोयादीनां भिन्नां प्रवृत्तिमनुपतत्येव। प्राकृतस्य वैकृतस्य च नादस्य ह्रस्वदीर्घप्लुतेषु द्रुतमध्यमविलम्बितासु च वृत्तिषु तावानेव स्फोटो विचित्रां वृत्तिमनुविधत्ते ॥ ५० ॥

टी०—कथमेकान्तेनात्र तद्रूपमुपलभ्यत इति स्पष्टयन्नाह—**नादस्य क्रमजन्मत्वाद्** इति। ध्वनेर्व्यञ्जकस्य क्रमोत्पत्त्या। स्फोटः क्रमरूपेण तदा हि भेदवानिव जायते। स तु स्वतोऽक्रम एव। यतो न पूर्वः न परश्च सः।

नादस्यैव कुतः क्रम इत्याह—**क्रमवतो हि** इति। यतस्तस्य कारणभूताः स्थानकरणाभिघाताः क्रमवन्तः, तत्प्रतिबन्धजन्मा नादोपि क्रमवान्। यदाह—**उपसंह्रियमाणप्रचयरूपः** इति। **स्फोटमवद्योतयति** इति। योयमुत्पद्यते भागो ध्वनेः स तस्य स्फोटस्य'''भागमिव अभिव्यक्तमभ्यनुजानाति। तदन्यभागानामभिव्यक्तिं प्रतिबध्नातीव ततः क्रमवानवभासते। **तदानीम्** इति। अभिव्यक्तिकाले। **विभक्तोद्देशेति**। अवच्छेदः परस्परव्यावृत्तता। ते [उद्देशाः] क्वचिदविभागेनाप्यवतिष्ठन्त इति विभक्तग्रहणम्। उद्देशरूपा येऽवच्छेदास्ते विभक्ताः परस्परव्यावृत्ताकारेण अस्येति। **तेन** इति। यतः क्रमयौगपद्ये न स्तः। **तथा हि** इति। प्रतीतं कथयति। **अत्यन्तम्** इति। न तस्यावयविन एकत्वाद्भेदोस्ति। अथवावयवेषु देशभेदेनावतिष्ठमानेषु असावपि तथैव प्रत्यवभासते। यदाह—**नानादेशेति**। नानादेशेषु स्थिता आधारा अवयवाख्या अस्येति। **वैचित्र्येण** इति। **यथा** तन्तुषु नीलादिगुणयुक्तेष्ववयवेषु समवायान्नीलादीनामविचित्रोप्यवयवी सम्बन्धिवशात्तथावभासते। येषां तु गुणाश्च गुणान्तरमारभन्ते तेषामपि तद्गुणान्तरं विचित्रं, तद्वशाद्द्रव्यमपि तथावभासत इति दृष्टान्तः ॥४९॥

निदर्शनान्तरमप्याह—**प्रतिबिम्बम्** इति। **अन्यत्र** इति तोये। **स्फोटनादयोः** इति। **तथा** स्फोटोऽतथाभूतो नादप्रवृत्तिं भेदवतीमनुगच्छतीति।

तत्त्वपक्षे इति। चन्द्रादिबिम्बसंनिधाने तच्छायोपरक्तास्तोयावयवाः परितः परितः प्रतिबिम्बन्तीत्येके। **अन्यत्वे** इति। बिम्बं तोये हेतुरन्यदेव तोयात्प्रतिबिम्बमित्यपरे। तथा चक्षूरश्मयो भास्वरद्रव्यप्रतिहताः स्वमेव मुखमीक्षन्त इति नानार्थपक्षः। **न हि तत्तथा** इति। प्रति-

1 इति न धृतं कोशे।
2 विरोधो न विद्यते—घ, ङ। विरोधिनि विद्यते—ट, ठ.
3 संसर्गिभेदधर्म—घ, ङ। संसर्गधर्म—ट, ठ.

---

* अत्र विरोधीत्याधिकमनपेक्षितमित्युपेक्षितम्।
* 10 क्रियाभूता ग २, च, ठ. 11 लभते—क ३.४.७

प्रवृत्तिमनुपतत्येव। प्राकृतस्य वैकृतस्य च नादस्य ह्रस्वदीर्घप्लुतेषु द्रुतमध्यमविलम्बितासु च वृत्तिषु तावानेव स्फोटो विचित्रां वृत्तिमनुविधत्ते ॥ ५० ॥

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते ॥५१॥

यथा ज्ञानं ज्ञेयपरतन्त्रं ज्ञेयरूपप्रत्यवभासत्वादनिर्देश्यस्वरूपमपि ज्ञानान्तरस्येव भिन्नं[2] स्वस्यैवात्मनः स्वरूपमात्रं दर्शयति। तथा ह्यतीतमनुपलब्धमप्यन्येन ज्ञानेन स्मृतिविषयत्वं[4] प्रतिपाद्यते। तद्वदयमर्थं शेषभावमापद्यमानः शब्दोऽभिधेयतन्त्रस्तद्रूपोपग्राही शेषिणीमिव स्वरूपमात्रां प्रत्यवभासयति। सा तु संनिहितप्रत्यवभासापि[5] लोके भुज्यादिक्रियासम्बन्धविरोधान्नाश्रीयते। व्याकरणे त्वर्थस्य कार्यविरोधित्वात्[6]तस्याश्चाभिधेयरूपेण व्यवस्थानादविरुद्धः कार्ययोगः[7] ॥५१॥

आण्डभावमिवापन्नो[8] यः क्रतुः शब्दसंज्ञकः।
वृत्तिस्तस्य क्रियारूपां भागशो भजते क्रमम् ॥५२॥

(टी०) बिम्बं चलं दृश्यते, न तु तच्चलम्। अत्रोदके यत्तच्छायोपरक्ततोयावयवपक्षे तोयावयविनि सा क्रियोत्पन्ना, अवयवास्तु तद्वशात्क्रियावन्तोऽवभासन्ते। यदि त्ववयवेषु क्रिया स्यात्, तदुत्पत्ताववयवविभागपूर्वकोऽवयविविनाशः स्यात्। अन्यत्वपक्षेपि वायुना तस्य सम्बन्धान्नास्ति क्रियोत्पत्तिरिति निष्क्रियम्। वायुसंयुक्तोदकयोगात् क्रिया भविष्यतीत्येतद्वैशेषिकदर्शने स्यात्। न च तद्दर्शने प्रतिबिम्बमर्थान्तरम्। यद्वा स्वयमक्रियमावेशात्क्रियावदिति नैव प्रस्तुतव्यालोपः ॥५०॥

इदानीमर्थाभिधानप्रकारमाह—**अनिर्देश्यस्वरूपमपि** इति। न तज्ज्ञेयाकारापोद्धारे स्वेन रूपेण ज्ञातुं शक्यते। **ज्ञानान्तरस्येव** इति। यथा ज्ञानान्तरेण ज्ञाने परिच्छिद्यमाने स्पष्टपरिच्छेद्यता ज्ञानस्य तथा रूपादिविषयापरिच्छेदिन्यपि ज्ञाने ज्ञानरूपस्य। **तथा हि** इति। उक्तं द्रढयति। **अनुपलब्धम्** इति। यद्रूपादिविषयं ज्ञानं ज्ञानान्तराननुभूतं तत्र स्मृतिर्न स्यात्। सा च दृष्टा। तस्मात् स्मर्यमाणत्वादनुभूयते ज्ञानस्वरूपमिति। **शेषिणीमिव** इति। प्रधानभूतामिव प्रकाश्यतयार्थवत्प्रानप्राधान्याम्। अर्थादिद्योतनार्थं तु तस्यानुवादादिवशब्दोपादानम्। **प्रत्यवभासयति** इति। ग्राहयति। **सा तु** इति। एतदाह। प्रकाशमानापि सार्थक्रियाविरोधाल्लोके नाश्रीयते। **व्याकरणे तु** इति। न हि शक्यतेऽर्थान्तरः प्रयत्नः कर्तुमिति विरोधः। **तस्याश्च** इति। स्वरूपमात्रायाः ॥५१॥

1 तथा हि—ठ.
2 भिन्नस्य—ट, ठ.
3 हि इत्येतन्न धृतं कोशे। टीकाग्रन्थप्रामाण्यात्तूपन्यस्तम्।
4 श्रुति°—ठ.
5 सहिते प्रत्यवभासेपि—घ, ङ.
6 विरोधिकार्य°—घ, ङ.
7 कार्ययोगः—ठ.
8 अण्ड°—क १.२.३.४.५.६.७, ख, ग १.२.३.४, घ, ङ। आण्ड°—टीकाकृत्पाठः। ठ—कोशेप्येवम्। आदर्शान्तरेषु सर्वेष्वदृष्टोऽप्ययं पाठो विवक्षितमर्थमर्पयतीति परिगृहीतः।
9 क्रम°—क १.

* ५ पदादिवत्तद्धर्ममुपगृह्य — ठ.   * ८ यथैव — ग १·२·४

सर्वविभागोद्ग्राहप्रतिसंहारेण बाह्यो व्यावहारिकः शब्दोन्तःकरणे मयूराण्डरसवत्पूर्वविभागोद्ग्राहभावनामात्रामव्यतिक्रामन्प्रतिलीयते । यथा चैकस्य शब्दस्य प्रतिलयस्तथा दाशतयादीनामपि । स त्वेवं प्रतिलीनः प्रत्यस्तमितभागः प्राप्तविवक्षाप्रतिबोधायामन्तःशब्दवृत्तौ वाक्यपदविवर्तधर्ममुद्गृह्य प्रत्येकमवयवोद्ग्राहेण क्रमशक्तिं परिगृह्णाति । सा चास्योदयप्रत्यस्तमयनिर्भासमात्रा क्रियारूपेणावसीयते ॥५२॥

यथैकबुद्धिविषया मूर्तिराक्रियते पटे ।
मूर्त्यन्तरस्य त्रितयमेवं शब्देपि दृश्यते ॥५३॥

यथा सावयवा पुरुषादिमूर्तिराचिकीर्षिता क्रमोपलब्धावप्येकबुद्धिनिब-

टी०—यदुपन्यस्तं क्रमवान्निमित्तम्, अक्रमः प्रतिपादकः, तथैतदेव विपरीतमिति दर्शनद्वयं तदुदाहरणदर्शनेन स्पष्टीकरोति—आण्डभावम् इति । अण्डे भवो रसः तद्भावम् । क्रतुरिति । शास्त्रान्तरे बुद्धिरुक्ता । साप्यर्था······वग्रहात्, शब्दोपि अर्थान्नातिक्रामतीति क्रतुः । वृत्तिः इति । आविर्भावतिरोभावौ । क्रियाभूता इति । भूतशब्द इवार्थे ।

बाह्यः इति । श्रोत्रानुपाती । व्यावहारिकः इति । येनार्थप्रतिपादनम् । सोन्तःकरणे बुद्धौ प्रलीयत इति सम्बन्धः । कथमित्याह—सर्वविभागेति । विभज्यन्त इति विभागा अवयवाः, तेषामुद्ग्राहः स्वीकारः, तस्य प्रतिसंहारस्तिरोभावः । एतदाह । उपसंहृतावयवरूपो बुद्धौ शब्दः प्रलीयत इति । पूर्वविभागेति । पूर्वे ये विभागोद्ग्राहाः तेषां भावनामात्रामव्यतिक्रामन् अपरित्यजन् । यद्यपि व्यक्तिरूपोपसंहारः, शक्त्यनुपङ्गस्तु विद्यते । मयूराण्डरसवद् इति । यथा मयूरादीनामण्डेषु रस उत्पत्स्यमानाङ्गप्रत्यङ्गचन्द्रकादीनां रूपोपसंहारेण तदुत्पादनविभक्तशक्तिमात्रतामपरित्यजन् प्रलीयते तथान्तःकरण उत्पत्स्यमानाः शब्दा इति । प्राप्तविवक्षेति । विवक्षाकृतप्रबोधः कार्यनिष्पादनाभिमुख्यं संप्राप्तो यया सा प्राप्तविवक्षाप्रबोधा । क्रमशक्तिम् । क्रमाख्यां शक्तिम् । यतस्तेवयवाः क्रमेणावभासमुपगच्छन्ति । तेषामवयवानां यः क्रमेणोदयप्रत्यस्तमयप्रत्यवभासः सैवास्य क्रिया । न ततो व्यतिरिक्ता क्रियास्तीति ॥५२॥

तदेवं प्रथमतः क्रमवान्, ततोऽक्रमः, पुनश्च क्रमवानिति प्रदर्श्य दृष्टान्तान्तरेण कथयति—यथैकेति । आक्रियते । आकारवती क्रियते । क्व । पटे । कस्य मूर्तिरित्याह—मूर्त्यन्तरस्य इति । एवं शब्देपि इति । प्रथमतः श्रवणे क्रमवान् । ततोल्पभूतः क्रमः । ततः परप्रतिपादनाय क्रमवानिति ।

१ अण्डभागोद्ग्राह—ठ.
२ इति न धृतं—घ, ङ.
३ दाशत्र्यादी—ठ.
४ प्रतिलीन—ठ.
६ दूग्राहे—ठ
७ प्रतिगच्छति—घ, ङ.
परिगृह्णाति—ठ । प्रतिगृह्णाति—टीका. वाराणसेयसंग्रहश्च ।

* ३ भावनया विवर्तते — ङ.
४ माभिपद्यमानः — घ, ङ ।
* ७ भ्यां साधु — घ, ङ. संशोध्य विन्यस्तम् ।

न्धनत्वं प्राप्ता पटकुड्यादिषु क्रमेणाक्रियते तथा व्यावहारिकोऽपि क्रमग्राह्यः शब्दः प्रतिसंहृतक्रम एकबुद्धिनिबन्धनो भूत्वा निरवयवक्रमं बुद्धिरूपं तस्यामात्मप्रत्ययवभासमात्रायां पृथग्भूतायामिव प्रत्यस्य तद्भावमिवोपनीय करणवृत्तिक्रमध्वनिधर्मप्रतिपत्त्या पुनरपि व्यवहारमवतरति । तथा चासौ तिसृभिरवस्थाभिरविच्छेदेनावर्तमानो ग्राह्यग्राहकभावं नातिवर्तते ॥५३॥

यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते ।
व्यवसायो ग्रहीतृणामेवं तेष्वेव जायते ॥५४॥

यथैव प्रयोक्ता शब्दविशेषविषयं प्रयत्नमभिपद्यमानः प्रतिशब्दं परितः परिच्छिन्नाञ्शब्दात्मनः संस्पृशन्निव मनः प्रणिधत्ते । तथैव प्रतिपत्तापि शब्दरूपपरिच्छेदाधीनमर्थग्रहणं मन्यमानस्तं तं शब्दं सर्वैः सम्बन्धिभिर्विशेषणैराश्रितसंसर्गानुग्रहं निर्धारयति । अर्थप्रतिपत्तिभावनाभ्यासात्तु सा शब्दरूपपरिच्छेदा-

टी०—सावयवा इति । सहावयवैः सर्वैरिति यावत् । एकबुद्धिनिबन्धनत्वम् इति । एकस्या बुद्धेर्निबन्धनत्वं विषयत्वम् । निबध्यते नह्यत इति निबन्धनं विषयः । क्रमेणोपलभ्य पुनरेकधिया सङ्कलय्य परिच्छिनत्ति । एकस्यां वा बुद्धौ निबध्यत इत्येकबुद्धिनिबन्धनः । प्रत्यस्य इति । विभागेनैव तत्रानुप्रवेश इति कथयति । तं प्रत्यासमाह—तद्भावम् इति । तदनुप्रवेशाद्बुद्धिरूपतामुपनीय । बुद्धिरेव सा तथेति इव शब्दः । करणवृत्तीति । करणानां वृत्तिः स्थानकरणाभिघातः । तत्समुत्थोयं क्रमः । स च ध्वनिधर्मः । प्रतिपत्तिः स्वीकारः । तिसृभिः इति प्रथमतः क्रमरूपता, ततः प्रतिलयः, ततः क्रम इति । आवर्तमानः इति । श्रोतृवक्तृपरम्परया ॥५३॥

तदिदानीं स्वरूपग्राहकत्वं पुनः साधयन्नाह—यथा इति । परितः इति । शब्दान्तरविविक्तेन रूपेण परिच्छिन्नरूपान् । संस्पृशन्निव इति । तदा बुद्धेरव्यतिरेकाच्छब्दस्येव शब्दोपादानम् । संस्पर्शो हि विषयभावगमनम् । यदा परितः परिच्छिन्नानिति बुद्धेर्विभक्तान् संस्पृशन्निवेत्यर्थः, तदा वाक्यार्थ उपमीयते । यतो न तत्र शब्दः, कुतः परिच्छेदः संस्पर्शो वेति । विशेषणैः इति । स्वसमवेताभिर्जातिभिर्यः संसर्गः तत्कृतोनुग्रहोन्यतो व्यवच्छेदः, स आश्रितो येन । संसर्ग एवानुग्रहः, स आश्रितो येनेति [वा] । यदि शब्दो विशिष्टं स्वरूपं प्रतिपाद्यार्थं प्रत्याययति कस्मान्न पुनः पृथक्त्वेन प्रथमतो निमित्तीक्रियत इत्याह—अर्थप्रतिपत्तिः इति । अर्थप्रतिपत्तिरर्थावबोधः । ततो भावना क्रियानुष्ठानम् । तस्या अभ्यासः पुनः पुनरासेवा । तस्य परिच्छेदोभ्यासः । तस्य शब्देपि भावात्सोपि

१ बन्धनो—घ २ । बन्धन—घ १ ङ ।
बन्धनत्वम—ठ.
२ 'प्राप्ता' इत्यादि °निबन्धन इत्यभिव्याप्य वर्तमानो ग्रन्थस्त्यक्तः—घ ङ—कोशयोर्दृष्टिदोषसौलभ्यान्मानुषाणाम् ।
* ३ भावनया विवर्तते—ठ.
मारभमाणः—टीकापाठः । — not necessarily
मारप्स्यमाणं—ठ.
५ न्ना शब्दानाक्रन्दात्मन इत्याकारकः कोशे पाठभ्रंशः स टीकाग्रन्थावष्टम्भेन शोधितः ।
६ एतत्त्वं—घ, ङ । एतं तु प्रकारशब्दं—ठ.
* ७ भ्यां साधु—घ ङ. संशोध्य विन्यस्तम् ।

* ३ शेषत्वं प्रतीयते — ठ.

वस्थां न चित्रीक्रियते । तस्माच्छेषिभावकाष्ठामनुभूय सर्वार्थयोनयः सर्वे शब्दाः शेषभावमर्थेषु प्रतिपद्यन्ते ॥५४॥

अर्थोपसर्जनीभूतानभिधेयेषु केषु चित् ।
चरितार्थान्परार्थत्वान्न लोकः प्रतिपद्यते ॥५५॥

यथैवायं शुक्ल इति सगुणे गुणिनि प्रतीयमाने क्रियाविशेषविषयमुपलक्षणत्वमपि गुणस्य क्वचिदेवान्यत्र शिष्टत्वात्प्रतीयते । तथा यो गोशब्दः सोयं पिण्ड इत्यभिसम्बन्धे सति क्रियायोगविवक्षायामर्थस्योपलक्षणे चरितार्थे शब्दं शेषतां प्रतिपन्नमभिधेयमिव क्रियासाधनभावेन (न) लौकिकाः प्रतिपद्यन्ते ॥५५॥

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥५६॥

घटादयो हि ग्राह्यत्वेनैव व्यवस्थिताः इति घटादीनां ग्रहणकाले नैव काञ्चिदुपलब्धिसहकारित्वेनेन्द्रियस्य विषयस्य वा स्वल्पामप्यनुग्रहमात्रां कुर्वन्ति ।

(टी०) तेनाभ्यस्त एव । **न चित्रीक्रियते** इति । निमित्तीक्रियते । यतः प्रत्यवमर्शप्रत्ययोऽयं तत्र निमित्तीकरणम् । स त्वर्थक्रियाभ्यासात् व्याक्षिप्तः परिच्छिन्दन्निव प्रत्यवमृशति । **सर्वार्थयोनयः** इति । सर्वार्थप्रत्यायनहेतवः ॥५४॥

कथं पुनस्तस्यार्थवत्क्रियाङ्गता नास्तीत्याह—**अर्थोपसर्जनीभूतान्** इति । **न लोकः प्रतिपद्यते** इत्यनेन सम्बन्धः । अर्थस्य प्रधानतया स्वरूपस्य चोपलक्षणभावेन । अत्र हेतुः—**परार्थत्वात्** इति । तदेव कुत इत्याह—चरितार्थत्वादन्यप्रतिपादने उपयुक्तत्वात्परार्थतया । न लोकः क्रियाङ्गतया प्रतिपद्यते । अन्ये तु **अर्थोपसर्जनीभूतान्** इति पठन्ति ।

अयं शुक्लः इति । शुक्लशब्दो हि द्वयं प्रतिपादयति गुणं गुणिनं च । यदाह—**सगुणे** इति । तत्र गुणिवच्छब्देन गुणस्य प्रतीतौ गुणस्य क्रियासम्बन्धो गुणिलक्षणतयैव प्रतीयते । यदाह—**उपलक्षणत्वम्** इति । अपिशब्दात्कचित्क्रियाङ्गतापि साक्षात्पारम्पर्येण वा । **अन्यत्र शिष्टत्वात्** इति । दर्शने गुणस्य शिष्टत्वात् । इह तु शुक्लमानयेति क्रियासम्बन्धोपीत्यपिशब्दार्थः । **क्रियाविशेषेति** । यद्यपि द्रव्यमेवोपलक्ष्यते गुणेन तथापि तत्क्रियाङ्गभावार्थैवेति क्रियैवोपलक्षणविषयत्वेनोपात्ता । **अन्यत्र** इति । गुणादन्यस्मिन्द्रव्ये । **अन्यत्राशिष्टत्वात्** इति पाठे तद्गुणावच्छिन्नाद् द्रव्यादन्यत्राविहितत्वात्क्रियाया इति । **अभिधेयमिव** इति । यथा पिण्डं कर्मतां प्रतिपद्यते नैवं शब्द इति । पूर्वत्र शब्दस्य विरोधात्क्रियाङ्गता प्रतिषिद्धा, सम्प्रति अर्थोपलक्षणे चरितार्थत्वादिति विशेषः ॥५५॥

टी० —यद्यपि शब्दो ग्राह्यग्राहकभावेन स्थितः तथापि तेजोवदेकत्र द्वयं न विरुध्य त इति कथयिष्यन्प्रक्रमते—**ग्राह्यत्वेन** इति । **घटादीनामेव** [इति] । स्वात्मनामेव । **इन्द्रियस्य** इति । अञ्जनेनेव । **विषयस्य** इति । उदकसेकेनेव । स्वात्मनि वृत्तिविरोधात् न विषयानुग्रहः । न चापीन्द्रिय-

१ स्थानं—घ २.
* २ विक्रियते—घ १, ङ.
४ ग्रहणत्वं—क१.३.७, ग२.३.४.
५ ताः ते—ठ.

* ८ शेषभावं° — ठ. * लेखकेनेति स्फुटम् ।

तथा ग्राह्यत्वमप्रतिपद्यमानान्येव सर्वेन्द्रियाणि ग्राह्यस्य विषयस्य ग्रहणनिमित्तत्वाय कल्पन्ते । तेजस्तु तमोरूपविरोधिना रूपभेदेन युक्तमवधार्यमाणस्वरूपमनुग्राहकत्वेनोपलब्धौ कारणभावं प्रतिपद्यते । शब्दोपि भावान्तरविरोधिना शब्दान्तरविरोधिना च स्वरूपेणावध्रियमाणभेदः परिगृहीतविशेषशब्दस्वरूपः प्रत्याय्यमर्थं प्रकाशयति । ते चास्य प्रतिपाद्यप्रतिपादकशक्ती नित्यमात्मभूते पृथक्त्वेनेव प्रत्यवभासेते ॥५६॥

यतश्चैतदेवं तस्मात्—

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते ।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः ॥५७॥

यदि ग्राह्यत्वेन शेषिभावमप्रतिपन्नाः शब्दाः शेषत्वमर्थेषु प्रतिपद्येरन्, ते सत्तासम्बन्धमात्रेणोपलब्धा अनुपलब्धाश्च विषयत्वमनपेक्षमाणाः स्वं स्वमर्थं प्रत्याययेयुः,न तु प्रत्याययन्ति । तस्मादङ्गभूत एषामर्थेषु गुणभावापत्तौ प्राधान्यमात्रारूपेण संस्पर्श इति ॥५७॥

अतोऽनिर्ज्ञातरूपत्वात्किमाहेत्यभिधीयते ।
नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ॥५८॥

शब्दस्वरूपसम्प्रत्ययाधीनमेवार्थप्रत्यायनं मन्यमाना लौकिकाः प्रयुक्तेष्वपि शब्देष्वप्रतीतस्वरूपेषु शब्दस्वरूपविशेषप्रतिपत्त्यर्थं किं भवानाहेत्याहुः । इन्द्रियाणि तु शेषिभावमात्रासंस्पर्शेनासंसृष्टान्यपरिच्छिन्नस्वलक्षणानि विषयोपलब्धौ शेषभावमुपगच्छन्ति ॥५८॥

(टी०) स्य कृतविशेषादर्शनात् । सहकारित्वेनापि नास्ति ग्राहकत्वमिति कथयति । यद्यपि कर्मणः कारकत्वात् क्रियायामुपयोगस्तथापि ग्राह्यतयैव कारकत्वं न ग्राहकत्वेन, लोकप्रतीत्यभावात् । न लोकः क्रियायाः कर्मकृतमुपकारं प्रतिपद्यत इति । **परिगृहीतेति** । यद्यप्यवध्रियमाणभेद इत्युक्तोयमर्थः तथापि स्वरूपमात्रकथनं तत्र । इदं तु परिगृहीतविशिष्टस्वरूपविशिष्टः सन्प्रकाशयतीति प्रत्यायनाङ्गभूतं पुनरुपात्तम् ॥५६॥

यतश्च इति । यस्माद् ग्राह्यग्राहकशक्ती तस्य तस्मात् । विषयत्वमिति । ज्ञानविषयताम् ।

१ ग्राह्यस्य—ठ.
२ नुनिष्पादकत्वे°—घ२.
३ इति न धृतम्—घ१, ङ.
४ वध्रियमाणो भेदः—घ, ङ. स्फुटः पाठभ्रंशः
५ प्रतीयते—क ५, का०.
६ शब्दानाम°—क२, ख२.३.
७ इदं व्यक्तिविवेके १०१ तमे पार्श्वे संगृहीतम् ।
८ इति न धृतं कोशे, अपेक्ष्यते च । अन्यथा चकारः किं समुच्चिनुयात् ।
१० मात्र—घ, ङ. मात्र—टीका.
११ स्वता—क १. ३. ४. ७, ख.
१२ इत्येतावान्ग्रन्थो वक्ष्यमाणकारिकाव्याख्यायां प्रक्षिप्तो लेखकेन । in which ms.?
१३ शेषमु०—घ, ङ. भावशब्दोत्रोपेक्षितो लेखकेनेति स्फुटम् ।

* ४ इत्यतः पूर्वं 'ततः' इत्यधिकम्—घ, ङ.

भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ ।
भेदकार्येषु हेतुत्वमविरोधेन गच्छतः ॥५९॥

यथैव व्यपदेशिवद्भावविषयेष्वर्थात्मसु निमित्तभेदाद्बुद्धिप्रकल्पनया व्यवस्थापितभेदेषु लोके शास्त्रे[2] च मुख्यभेदविषयाणि सर्वाणि कार्याणि क्रियन्ते । तथा शब्देष्वपि बुद्ध्या परिगृहीतग्राह्यग्राहकशक्त्यपोद्धारेषु मुख्यार्थविषयाणि इव शास्त्रे संज्ञासंज्ञिसम्बन्धादीनि भेदकार्याणि विधीयन्ते ॥५९॥

वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः ।
आदैच्प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः ॥६०॥

इह हि भिन्नरूपसंज्ञाप्रतिपाद्येषु इको यणचि इत्यादिषु नोच्चार्यमाण इक्छब्दः स्थानी, नापि यणशब्द आदेशः, तत्प्रत्यायितानां तु रूपान्तरयुक्तानां संज्ञानां स्थान्यादेशभावः शास्त्रेऽन्वाख्यायते । तुल्यरूपसंज्ञेष्वपि संज्ञिषु तादृशी सम्बन्धप्रतिपत्तिरिति सिद्धमेतत् ।

अत्र वृद्ध्यादयः शब्दाः स्वरूपाधिष्ठानाः स्वेनार्थेनार्थवन्तः स्वरूपेण शब्दा-

टी॰—**उपलब्धाश्च** इति । उपलब्धानुपलब्धव्यवस्थायां सत्ताया अविशेषादनुपलब्धेपि प्रत्याययेयुः । **अङ्गभूत:** इति । निमित्तभूतः ॥५७॥

यतश्च गृहीतानामङ्गभावोर्थप्रत्यायने, **अतः** इत्यस्माद्धेतोः । **नेन्द्रियाणाम्** इति । ये त्वङ्गीकृताः अङ्गतां यान्ति न तेषु ग्रहणं प्रति यत्नः । **अप्रतीतेति** । अव्यक्तस्वरूपगृहीतेषु न त्वेकान्ततोऽपरिच्छिन्नेषु प्रश्नसंभवः ॥५८॥

पृथक्त्वेनेव प्रत्यवभासेते इत्यतः प्रभृति शक्त्योर्भेदकथनस्य प्रक्रान्तत्वात्फलं कथयति—**भेदेन** इति । **भेदेनावगृहीतौ** परिच्छिन्नौ । **शब्दधर्मौ** इति । ग्राह्यग्राहकत्वे । **भेदकार्येषु** इति । भेदनिमित्तेषु संज्ञासंज्ञिसम्बन्धादिषु ।

व्यपदेशिवद्भावेति । व्यपदेशिवद्भावस्य विषयो यो योर्थात्मा । यथा सुवर्णस्याङ्गुलीयकमित्याद्यस्य शब्दस्य योर्थः । **निमित्तभेदाद्** इति । संनिवेशविशेषोऽङ्गुलीयकशब्दस्य निमित्तं, सुवर्णशब्दस्य जातिः । अतो यद्यपि वस्त्वेकं, निमित्तं तु भिद्यते । तद्भेदाच्च बुद्धयस्तन्निबन्धना भेदमवकल्पयन्ति, न वस्तुतः । यदाह—**बुद्धिप्रकल्पनया** इति । तस्य बुद्धिप्रकल्पितभेदमङ्गीकृत्य लोके सुवर्णस्याङ्गुलीयकमिति षष्ठी भेदनिबन्धना ॥ ५९ ॥

इको यणचीत्यत्र इगित्यपि संज्ञा इकारादीनां चतुर्णां यणित्यपि यकारादीनां चतुर्णामादिरन्त्येन सहेतयनेन विहितेति संज्ञिभ्यः संज्ञे भिन्नरूपे । तत्र यथा इगिति यणिति च

१ भेदेनोपगृ°—ग२, ठ.
२ शास्त्रेषु—च, ठ.
३ इति न धृतं—घ, ङ । अपेक्ष्यते च ।
५ °धिष्ठानाः स्वेनार्थेना°—टीकापाठः ।
°धिष्ठानास्तेनार्थेना°—ठ.
६ स्वेन रूपेण—टीकापाठः.

*

* ५ भेदेन संज्ञासंज्ञिनावुपादीयेते—ठ. * १२ तत्—ठ.
६ न चाग्नि°—घ, ङ.

न्तरस्वरूपाण्युपजिघृक्षन्तः स्वरानुनासिक्यभिन्नैराकारादिभिरादैच्छब्दादिभिः प्रत्यायितैः सम्बन्धं येन प्रकारेण प्रतिपद्यन्ते, तेनैव प्रकारेण दुरवधारत्वेपि भेदस्य ॥६०॥

अग्निशब्दस्तथैवायमग्निशब्दनिबन्धनः ।
अग्निश्रुत्यैति सम्बन्धमग्निशब्दाभिधेयया ॥६१॥

स्वं रूपं शब्दस्य इति संज्ञासंज्ञिनौ भेदेनोपादीयेते[5] । तत्र द्वौ शब्दौ श्रूयमाणौ प्रतिपादकौ, प्रतीयमानावपि द्वावेव सम्बन्धभाजौ कार्यिणौ । तस्मादग्निशब्दो येनार्थभूतेनाभिन्नरूपेणाग्निशब्देनार्थवान् तमग्निशब्दान्तराभिधेयस्य तुल्यश्रुतेरग्निशब्दस्य संज्ञाभावं प्रतिपादयतीति ॥६१॥

यो यं उच्चार्यते शब्दो नियतं न स कार्यभाक् ।
अन्यप्रत्यायने शक्तिर्न तस्य प्रतिबध्यते ॥६२॥

प्रतिज्ञातस्यार्थस्योत्तरस्मिञ्श्लोके हेतुं वक्ष्यति ।

प्रत्यायको हि परार्थम् उच्चारितो यदर्थमुच्चारितः तं[2] कार्येषु नियुङ्क्ते तत्र

(टी॰) संज्ञे संज्ञ्युपलक्षणे चरितार्थे न कार्यभाजौ अपि तु तत्प्रतिपादिताः संज्ञिनः । **तुल्यरूपसंज्ञिषु** इति । स्वं रूपं शब्दस्येत्यत्र अग्नेरग्निस्संज्ञेति । नोच्चार्यमाणयोः संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः, अपि तु तत्प्रत्यायितयोः । एवं वक्ष्यमाणोपयोगिना श्लोकानुपात्तेन निदर्शनेन भेदमाख्याय श्लोकमनुसरति—**तत्र** इति । **शब्दान्तरस्वरूपाणि** इति । यतः संज्ञाः संज्ञिरूपमुपाददते तदनुप्रवेशात्संज्ञिरूपस्य । ततश्च वृद्धिशब्देन प्रत्यायितो [यो] वृद्धिशब्दः स संज्ञा । आदैच्छब्देनापि ये प्रत्यायितास्ते संज्ञिन इति । **दुरवधारत्वेपि** इति । ग्राह्यग्राहकशब्दभेदोपहितो भेदस्सन्नपि सारूप्यादविभावित इति ॥ ६० ॥

अग्निशब्देति । अग्निशब्दोभिधेयो यस्याः सा अग्निशब्दाभिधेया । तत्र **शब्दस्य** इति । सर्वे शब्दा उपतिष्ठन्ते, अग्निरुदश्विदित्यादयः, तेषां यदात्मीयं रूपं तत्संज्ञा । ततश्चेदं संज्ञासंज्ञिवाक्यं कल्प्यते—अग्नेरग्निरुदश्वित उदश्वित्संज्ञा भवतीति । **श्रूयमाणौ** इति । यावेताग्निशब्दावग्निशब्दस्य संज्ञेत्युच्चार्येते तौ । **प्रतीयमानौ** इति । यौ ताभ्यामुपस्थाप्येते । **प्रतिपादयति** गमयति ॥ ६१ ॥

तदेवं संज्ञासंज्ञिसम्बन्धं शक्तिभेदप्रकल्पितशब्दभेदनिबन्धनमभिधाय......तत्प्रसङ्गेन विशिष्टविषयतां तस्य सम्बन्धस्य दर्शयितुं वक्ष्यमाणस्यार्थस्य दृष्टान्तेनोपक्रमते **वृद्ध्यादयः** इति ।

१ च्छब्दादिप्रत्यायितैः—घ, ङ.
२ तदर्थेयम°—क १.२, ख.
३ धेययोः—क. १.२.३.४.५.७, ख, घ, ङ.
४ स्वरूपं—कोशस्थः पाठष्टीकाप्रामाण्याच्छोधितः ।
७ ऽयम्—क २. ४, ख, घ, ङ.
८ नियतस्—ग १. ३. ४.
९ स न—ग १.३.४. । न च—क, घ, ङ.
१० अर्थप्र॰—क २, ख. अपपाठः.
११ °मुच्चरति—घ२, ठ.

* *

* ५ इति न धृतम्— घ, ङ.   १०. तत्तुल्य – घ, ङ. एष प्रमादः |

प्रकल्पते । न च गुणसामान्यं श्वेतसमवायि श्वैत्यमेकत्वाद्भेदहेतुः संभवतीति संसर्गिधर्मान्तराश्रयोऽवान्तरस्यैकस्यापि भेदः परिकल्प्यते । संविज्ञानपदान्तराभावाद्वा भावप्रत्ययैरनिर्देश्याः तुल्यश्रुत्युपगृहीताः शौक्ल्यवदेव रूपाश्रिता विशेषाः प्रकृष्टव्यपदेशहेतवो विज्ञायन्ते । यावच्चेदं तदिति व्यपदेश्यस्य प्राधान्येनाश्रितस्य प्रकृष्टव्यपदेशः क्रियते तावदविच्छिन्नोऽयं निमित्तान्तरपरिकल्पनाधर्मप्रसङ्ग इति ॥६५॥

एवं च कृत्वोच्चार्यमाणस्य—

तस्याभिधेयभावेन यः शब्दः समवस्थितः ।
तस्याप्युच्चारणे रूपमन्यत्तस्माद्विविच्यते ॥६६॥

हेतुदृष्टान्ताभ्यां व्यतिरेकव्यवस्थानिदर्शनं कृत्वा यथाप्रकृतं स्वरूपमेव पुनरनुसंह्रियते । तस्याभिधेयभूतस्य यदा यदा निदर्शनार्थमुच्चारणं प्रक्रम्यते तदा तदा सर्वस्यैवोच्चार्यमाणस्यैवंधर्मत्वात्तस्यापि निबन्धनभूतं रूपान्तरमन्यद्विविच्यते । केचिदाहुरभिधानमावर्तते, तदेव त्वभिधेयत्वान्न प्रत्याय्यते । एवं हि संग्रह उक्तम्—न हि स्वरूपं शब्दानां गोपिण्डादिवत्करणे संनिविशते । तत्तु नित्यमभिधेय-
(टी०) भावप्रत्ययाः स्मर्यन्ते न प्रकर्षहेतौ । श्रुत्युपगृहीताः इति । सामान्यरूपेण भास्वरादीनां शुक्लशब्देनाभिधानमाह । शुक्लविशेषा हि भास्वरादयस्ते तुल्यतया शुक्लश्रुत्या गृहीताः क्रोडीकृता अनियतसंनिधय आक्षिप्यन्ते । यावच्च इति । तेपि भास्वरादयो द्रव्यतामापन्ना यदा प्रकृष्टा विवक्ष्यन्ते रूपस्य भास्वरतरमिति । तावद् इति । तस्यापरो धर्मः, तस्याप्यन्य इत्यनवस्था ॥६५॥

तस्य इति । उच्चार्यमाणस्य । अभिधेयभावेन इति । प्रत्याय्यत्वेन । हेतुदृष्टान्ताभ्याम् इति । नायमपूर्वः पक्षः । परतन्त्रत्वादिति हेतुः । सामान्यमाश्रितं (१ । ६३ ॥) गुणः प्रकर्षहेतुर्यः (१ । ६४ ॥) इति श्लोकद्वयेन दृष्टान्तः । तस्येत्यनेनोपसंहारः । केचिदाहुः इति । प्रत्याय्यमानस्योच्चारणमेव नास्तीत्याह—आवर्तते इति । कीदृशोसौ प्रत्याय्य इति प्रत्याय्यघटादयः पृष्टाः प्रत्यायकेन शब्दान्तरेण कथ्यन्ते । तथासावपि प्रत्याय्यते । न चान्यस्तस्य वाचक इति स एव चावर्तते । अत एव चानुकरणशब्दात्संज्ञाशब्दस्य विशेषः स्पष्टो भवति । उच्चार्यमाणेऽभिधेयमनुकरणम् । संज्ञायास्तु प्रत्याय्यमेवाभिधेयं नोच्चार्यमाणमिति । तदेव तु इति । नाभिधेयमभिधेयात्मतां विहायाभिधायकं भवति । अभिधानसंनिवेशे इति । यत्तदाभिधायकं तत् कारणं

१ एष सन्दर्भः 'यो य उच्चार्यते शब्दः' इति श्लोकं प्रकृतेन सम्बध्नाति । तत्र उच्चार्यमाणस्येतीदं शब्द इति पदं विशिनष्टि । तदत्र षष्ठ्या विपरिणामनीयम् ।
२ व्यतिरेकशब्दो न पठितः—ठ.
३ पुनरत्र सं०—घ२.
४ प्रकल्प्यते—घ, ङ.
५ इति न धृतम्—घ, ङ.
६ °उच्चारणस्यैवं—ठ.
७ निबन्धन—घ,ङ. निबन्धनरूपं—ठ. टीका त्वनुसृता ।
८ न्यत्प्रतिपिपत्स्यते —ठ.
९ भेदवत्त्वमभि°—घ, ङ. इदमपभ्रष्टम् । टीकानुसारितया तु पाठितम् ।
*१० तत्तुल्य—घ, ङ. एष प्रमादः ।

* वाराणसेयसंग्रहगतः पाठः समीचीन इति स परिगृहीतः | * टीकाकृद्वृषभस्तु पठतीति प्रतिभाति |

९ संज्ञा° – कोशः. इदमशुद्ध– मिति शोधितम्

मेवाभिधानसंनिवेशे सति तुल्यरूपत्वादसंनिविष्टमपि समुच्चार्यमाणत्वेनावसीयते इति ॥६६॥

प्राक्संज्ञिनाभिसम्बन्धात्संज्ञा रूपपदार्थिका ।
षष्ठ्याश्च प्रथमायाश्च निमित्तत्वाय कल्पते ॥६७॥

अभिधेयान्तरप्रविवेकेऽप्यभिधानस्य स्वरूपेणाप्रविवेकं दर्शयति । स्वरूपाधिष्ठानं चोपसर्जनीभूतस्वरूपार्थः शब्दोऽर्थान्तरे वर्तते । यावत्संज्ञिना तु संज्ञा न सम्बद्धा तावन्न संज्ञिपदार्थिकेत्यर्थान्तराभावे तस्याः प्रातिपदिकसंज्ञाभावाद्विभक्तियोगो न स्यात् । वाचकानां च व्यतिरेकहेतुत्वात् संबन्धिनि शब्दान्तरे प्रातिपदिकार्थव्यतिरेको न प्रकल्पते ॥६७॥

तत्रार्थवत्त्वात्प्रथमा संज्ञाशब्दाद्विधीयते ।
अस्येति व्यतिरेकश्च तदर्थादेव जायते ॥६८॥

स्वरूपाध्यारोपचिकीर्षायां बाह्येष्वर्थात्मसु शब्दार्थानां स्वरूपेणाधिष्ठानभूतेनार्थवत्त्वात्प्रथमा विधीयते । सोयमिति च संज्ञिना शक्त्यवच्छेदलक्षणः सम्बन्धो नियम्यते । तद्यथा गौर्वाहीकः, सिंहो माणवक इति । प्रातिपदिकार्थव्यतिरेकः षष्ठीप्रवृत्तिहेतुः स्वरूपाभिधेयेनार्थवता तद्वतां संज्ञाशब्देन योगात्संज्ञि-
(टी०) सन्निविशते, स्वरूपं त्वसंनिविष्टमपि सारूप्यात्तथावसीयत इति ॥६६॥

भेदकार्येषु हेतुत्वमविरोधेन गच्छतः (१ । ५८) इत्युक्तम् । तद्दर्शयन्नाह—प्राक्संज्ञिना इति । रूपपदार्थिका इति । यावत्स्वरूपमेव प्रकाशयति । षष्ठ्याश्च इति । कार्यमाचष्टे ।

अभिधेयेति । स्वरूपादन्यो बाह्यो देवदत्तादिरभिधेयान्तरं तस्य प्रविवेकः तेन शून्यता । यद्वैकपिण्डत्यागेन पिण्डान्तरेऽपि प्रवृत्तेः प्रविवेकः, स्वरूपेण त्वशून्यता । स्वरूपाधिष्ठानं च इति । स्वरूपमधिष्ठानं प्रत्याय्यमस्येति । उपसर्जनीभूतेति । उपसर्जनीकृत्य स्वरूपं तदुपलक्षितमेव बाह्यार्थमाह यतः स्वरूपमभिधायैव बाह्यार्थे वर्तते । केवलं गुणता स्वरूपस्येति ॥६७॥

अनयोर्विभक्त्योर्विषयमाह—तत्रार्थवत्त्वाद् इति । वृद्धिरिति संज्ञाशब्दात्प्रथमा । आदैचामिति व्यतिरेकः ।

स्वरूपाध्यारोपेति । अयं देवदत्त इति शब्दरूपं यदा तस्मिन् संज्ञिनि निवेशयितुमिच्छति । बाह्येषु इति । स्वरूपव्यतिरेकेषु । शक्त्यवच्छेदलक्षणः इति । स पुरुषस्तां शक्तिं तद्विषयतया नियच्छति । प्रत्ययार्थप्रतिपादिका न वक्तृयोऽसङ्कीर्णाः शक्तयः । तत्र पुरुषस्तदन्याः

१ संज्ञिताभि°—का०. अपपाठः ।
२ ह्यभिधानस्य—ठ.
३ स्वरूपार्थ—घ, ङ.
४ शब्दान्तरे—घ, ङ.
५ इति न धृतम्—ठ.
६ इत्यत आरभ्य प्रातिपदिकार्थेति यावल्लिपिकरेणोपेक्षितं कृमिवेधाद्वा गलितम् —ठ.
७ यस्येति—विवरणकोशः.
८ इति न धृतम्—ठ.
* वाराणसेयसंग्रहगतः पाठः समीचीन इति   *टीकाकृद्वृषभस्तु पठतीति प्रतिभाति ।

*३ संसृष्टा — क १.२.४.५.७, च.
४ सूत्र — ग १.३.४

* ८ स्वकृत° — कोशः. टीका त्वनुसृता ।
९ एतावद्धि — घ २, ठ.

शब्दानामुपजायते । एवं ह्याह—

अर्थवता व्यपदेशः सोयं तस्येति वा यतो भवति ।
नानर्थकेन तस्मान्नित्यः शब्दार्थसम्बन्धः ॥ इति ॥६८॥

स्वं रूपमिति कैश्चित्तु व्यक्तिस्संज्ञोपदिश्यते ।
जातेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते ॥६९॥
संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रे ग्राह्यामथापरे ।
जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते ॥७०॥

इह केचिद् वृत्तिकाराः **पठन्ति**—स्वं रूपं शब्दस्य ग्राहकं भवति द्योतकं प्रत्यायकमिति । **अपरे तु** स्वं रूपं शब्दस्य ग्राह्यं द्योत्यं प्रत्याय्यमिति । **तदनेन श्लोकद्वयेनोपन्यस्तम् । जातावपि द्वयी प्रतिपत्तिराचार्याणाम् । केचिदाहुः—प्रतिनियतस्वरूपभेदा व्यक्तयः । न ह्यसंवेद्यमव्यपदेश्यमविद्यमानं वा व्यक्तीनां स्वरूपम् । व्यक्तिरेव हि गौर्नाकृतिः । गुण एव हि नीलो, न गुणसामान्यं नीलत्वं नीलम् इति । आकृतेस्त्वकृतसमवायानामपि स एवायमिति बुद्ध्यनुवृत्तौ भेदवत्स्वर्थेषु निमित्तत्वम् । एतद्धि तस्याः सत्तायामनुमानम् ।**

(टी०) शक्तीरवच्छिद्यैकां शक्तिं व्यवहार्यतां नयतीति नियमः । अर्थान्तरप्रतिपादनशक्तिं वाऽपास्य तद्विपर्ययेव शक्तिः प्रबोध्यत इति । नियमश्चार्थान्तरेभ्यो व्यावर्तनात् । **गौर्वाहीक** इति । शक्त्यवच्छेद उदाहरणम् । तत्र यथा वाहीकशब्देन शक्त्यवच्छेदे जात्यादिनिवृत्त्या विशिष्टार्थाभिधायित्वं गोशब्दस्य, तथा पुरुषेण संज्ञाशब्दानां शक्त्यवच्छेद इति ।

स्वरूपाभिधेयेन इति । स्वरूपमभिधेयं यस्य तेन संज्ञाशब्देन योगात् । व्यतिरेक उपजायत इति सम्बन्धः । **तद्वता** इति । यतोस्माद्व्युत्पत्तिकालेऽयं देवदत्तोऽस्य वा देवदत्त इति व्यपदेशो नानर्थको भवति । न च तदान्योर्थः । तस्मात्स्वरूपमर्थः । स च सदासंनिहितत्वान्नित्यः ॥६८॥

एवं शक्तिभेदकल्पनया सूत्रार्थं वर्णयित्वा जातिव्यक्तिभेदेनान्यथा व्याचष्टे—**स्वं रूपम्** इति । व्यक्तिः संज्ञा । कस्य संज्ञिन इत्याह—**जातेः** । तेन शब्दशब्देन जातिरुपात्ता । ननु च जातिः प्रदेशेषु प्रतिपादिताप्यसमर्था कार्याणि प्रतिपत्तुमित्याह—**कार्याणि** इति । संसृष्टा व्यक्त्युपगृहीता जातिः कार्याणि प्रतिपद्यते । **जातिप्रत्यायिता** इति । अग्निशब्दे या जातिः सा संज्ञा, व्यक्तिस्तु संज्ञिनीति ।

इह केचिद् इति । प्रथमश्लोके स्वरूपमिति व्यक्तिः, सा च संज्ञा । शब्दस्येति जातेः । ततश्चायं वृत्तिग्रन्थः—स्वं रूपं शब्दस्य ग्राहकमिति ।

१ व्यक्तेस्—क १.२.३.४.५.७, ख. अयमपपाठः । व्यक्तिसं०—ठ.
२ व्यक्तेः—क २, ग २, ठ । व्यक्तौ—का०. उभयोपपाठः ।
३ संसृष्टा—क १.२.४.५.७, च.
५ व्यवतिष्ठते—ठ.
६ इति न धृतम्—घ, ङ.
७ इति न धृतम्—घ, ङ.
८ स्वकृत°—कोशः. टीका त्वनुसृता ।

* २ 'निमित्तान्' इति न धृतं — घ, ङ.
३ प्रत्यया ए° — घ, ङ.

* ५ प्राणिनि — च.

अन्ये तु मन्यन्ते—जातौ प्रतिलब्धस्वरूपाः शब्दास्तद्रूपतयैव व्यक्तिमव्यपदेश्यस्वरूपां प्रत्याययन्ति । सर्वत्रैव हि निमित्तान्निमित्तवत्यर्थे निमित्तस्वरूपः प्रत्यय उत्पद्यते । तत्र हि भेदेन दृष्टाभिधानान्यदृष्टाभिधानानि च निमित्तानि शब्दप्रत्यययावेकदेशसारूप्येणात्यन्तसारूप्येण च प्रवर्तयन्ति ।

तथा च स्वं रूपमिति जातिरेव कैश्चित्प्रतिज्ञायते । शब्दस्येति तु शब्दशब्देन व्यक्तिर्व्यपदिश्यते । केषां चित्तु विपर्ययेणायं व्यपदेशः । तत्र जातेर्व्यक्तिस्संज्ञा व्यक्तेर्वा जातिः । सा च प्रदेशेषूच्चरिता व्यक्तिं कार्ययोगेन प्रत्याययति ।

टी०—प्रथमं पक्षमाश्रित्याह—**प्रतिनियते**ति । प्रतिनियतः स्वरूपभेद आसामिति । यथा जातयः स्वत एव जात्यन्तरेभ्यो व्यावृत्ताः तथा गोव्यक्तयः कर्कादिव्यक्तिभ्यः प्रतिनियतभेदाः । तेन विनैव जातिं गोशब्दः तासु, न कर्कादिव्यक्तिषु । तत्रैतत्स्यात् । वस्तुमात्रतया सम्प्रमुग्धत्वान्न जात्युपरागमन्तरेण गवादिभेदोवसीयत इत्याह—**न ह्यसंवेद्यम्** इति । **व्यक्तिरेव हि** इति । न गोत्वयोगाद्गोव्यक्तिर्गौः, किन्तु स्वत एव । द्रव्यं निरूप्य गुणमाह—**गुण एव** इति । न नीलो गुणो नीलत्वयोगात् तथा । **आकृतेस्तु** इति । स एवायमिति योयं भिन्नास्वभिन्नप्रत्ययः स एव तस्याः सत्त्वे प्रमाणम् । तत्रैतत्स्यात् । विनापि जातिसमवायादेकशब्दारोपणेन प्रत्ययानुवृत्तिः, यथा प्रत्ययो द्रव्यगुणकर्मस्वित्याह—**अकृतसमवायानाम्** इति । **अव्यपदेश्ये**ति । स्वरूपं व्यक्तीनां व्यपदेष्टुमशक्यम् । तस्य व्यपदेश्यत्वे जातियोगकल्पनावैयर्थ्यम् । तत्रैतत्स्यात् । यद्यव्यपदेश्यं स्वरूपं व्यक्तीनां, ताश्च जातेर्व्यावृत्तिस्वभावा एवेति कथं जात्यभिधानपूर्वकं तासामभिधानमित्याह—**सर्वत्रैव** इति । **दृष्टाभिधानानि** इति । दृष्टमभिधानं येषां निमित्तानां यथा गोत्वादीनि । गोशब्दादयो हि तेषामभिधाः । **अदृष्टाभिधानानि** इति । उत्पलगन्धादीनि । न ह्युत्पलगन्धशब्दस्तदाह । सम्बन्धावच्छिन्नसम्बन्ध्यभिधानात् । **एकदेशसारूप्येण** इति । प्राणीति शब्दप्रयोगो वाक्कायव्यापारमात्रदर्शनात्प्रवर्तते । **अत्यन्तसारूप्येण** । यथा गौरिति शब्दप्रत्ययौ भूयोवयवसंनिवेशतुल्यत्वेन । तत्र दृष्टाभिधानेषु त्रयमनुवर्तते—जातिः शब्दः प्रत्यय इति । अदृष्टाभिधानेषु द्वयं जातिर्बुद्धिश्चेति ।

तदेवं जातिव्यक्त्योर्व्यतिरेकं प्रतिपाद्य स्वंरूपमित्येतन्निबन्धनं संज्ञासंज्ञिभेदमन्यथा व्युत्पादयति—**जातिरेव** इति । यदि तर्हि जातिव्यक्त्योः परस्पराविनाभावेन वृत्तिः किंकृतः पक्षभेद इत्याह—**तात्पर्येण तु** इति । जातौ विवक्षितायां नान्तरीयका व्यक्तिरित्युच्यते जातिः प्रधानमिति । व्यक्तौ विवक्षितायां जातिर्नान्तरीयका व्यक्तिः प्रधानमिति । ननु सर्वत्र क्रियैकविषयैव पक्षद्वयेपीत्याह—**प्रतिज्ञाभेदमात्रम्** इति । न वस्तुभेद इति । यद्यपि जातिव्यक्तिसंसर्गे तत्कार्यं क्रियते, किन्तु जातिः संस्कर्तुमिष्टा, नान्तरीयको व्यक्तिसंस्कारः । व्यक्तिर्वा संस्कर्तुमिष्टा तद्द्वारको जातिसंस्कार इत्युभयमुभयत्र संस्क्रियते ।

रूपमात्रम् इति श्रुतिमात्रम् । यदेतत्स्वं रूपमित्युपात्तं तत्संज्ञा । तच्चैकदेशः । कस्येत्याह—

१ प्रतिबद्धस्वरूपाः—ठ.
२ 'निमित्तान्' इति न धृतं—घ, ङ.
४ स्वरूपम् इत्येवं समस्तं पठितं मूलकोशेषु ।
५ प्राणिनि—च

* ५ विच्छेदे° - घ, ङ.

सा च जातिरसंसृष्टा व्यक्त्या नोच्चरति । व्यक्तिरप्यसंसृष्टा जात्या प्रयोगविषयं नावतरति । तात्पर्येण तु विवक्षा भिद्यते । किञ्चिदत्र प्रधानं किञ्चिन्नान्तरीयकमिति । तच्च प्रतिज्ञाभेदमात्रम् । जातिः शास्त्रे कार्ययोगिनी संचिकीर्षिता, व्यक्तिः शास्त्रे कार्ययोगिनी संचिकीर्षितेति ।

स्वं रूपं शब्दस्येत्यत्र बहुविकल्पो वैयाकरणाधिकरणेष्वागमः । तद्यथा । रूपमात्रमेकदेशोऽर्थवतो[1] रूपार्थसमुदायस्य सामान्यविशेषा[2]दिशक्तियुक्तस्य शब्दस्य शब्दत्वेनाश्रितस्य संज्ञा । रूपवान्वा संसर्गिणीभिः शक्तिभिर्भिन्नः[3] सार्थकः समुदायः श्रुतिमात्रस्य ग्राहकः । मात्राकलापो हि शब्दः । तदेकदेशाः स्वरूपादयो मात्राः । मात्राभिश्च मात्रावतामप्यस्ति भेदव्यपदेशे[4]व्यवहारः । वार्क्षी शाखेति यथा ।

अपर आह । यद्यपि वस्तु न भिन्नं, शब्दार्थस्तु भिन्नः । शब्दो ह्येकवस्तुविषयाणामपि शक्तीनामवच्छेदे[5]नोपग्रहे वर्तते[6] । तद्यथा । अयं दण्ड इति प्रत्यक्षरूपतया तदेव वस्तु सर्वनाम्नाभिधीयते नोपलभ्यमानेनापि दण्डजातियोगेन । दण्डजातियोगाभिधाने हि तस्यासामर्थ्यं सर्वनाम्नः । दण्डशब्दस्य च विशिष्टजातीयार्थाभिधायिनः, प्रत्यक्षत्वेपि सति, तस्य वस्तुनः प्रत्यक्षरूपतया प्रत्यायने प्रतिबध्यते शक्तिः । तथा स्वं रूपमित्यनेनाग्न्यादिश्रुतयः सत्यपि शब्दजातियोगेग्न्यादिरूपतयैव प्रत्याय्यन्ते, शब्दजातियोगित्वेन । शब्दशब्देन तु शब्दजातियोगित्वमेवाख्यायते, नाग्न्यादिश्रुतियोगः । तत्र शब्दान्तरार्थः शब्दान्तरार्थस्य प्रसिद्धभेदस्य संज्ञात्वेनोपादीयमानस्य संज्ञिभावं प्रतिपद्यत इति तदेतन्निदर्शनमात्रम् । प्रसक्ता-

(टी०) रूपार्थसमुदायस्य इति । शब्दत्वेन इति । स्वं रूपं शब्दस्येत्यनेन शब्दशब्देन । एतदाह । अग्निशब्दस्य सामान्यविशेषादिशक्तिरूपार्थवत एकदेशो रूपमात्रं संज्ञा । ततश्चायं पक्षः स्वं रूपं ग्राहकमिति । रूपवान्वा इति । य एव पूर्वत्र समुदायः संज्ञी सोत्र संज्ञा तस्यैकदेशो रूपमिति रूपवान् समुदायः । वार्क्षी शाखा इति । यथा शाखासमुदायमात्रं वृक्षः, तस्यैकदेशः शाखा । यद्यप्यवयवेभ्योऽव्यतिरिक्तोवयवी समुदायः तत्र भेदतिरोधायक इति भेदसमाश्रयेण व्यपदेशः । न ह्यन्यत्वे गोर्वृक्षस्यावयवः । भिन्न इति विशिष्टः । कस्य संज्ञेत्याह—श्रुतिमात्रस्य इति । स्वरूपस्यैकदेशस्य । ग्राहक इति संज्ञा । तदेवं पक्षद्वयेपि समुदायैकदेशभेदात्संज्ञासंज्ञिभेद इति व्युत्पादयति । शब्दो हि इति । एकस्मिन्नपि वस्तुनि निमित्तभेदान्नानाशब्दप्रवृत्तिः । अवच्छेदेन इति । व्यावृत्तेन रूपेण । यदाह—शक्तीनाम् इति । नोपलभ्यमानेन इति । परिच्छिद्यमानोपि जातिसम्बन्धो न

१ वत् तद्रूपार्थ—घ, ङ.
२ विरोधादि—घ १, ङ.
३ इति त्यक्तम्—घ, ङ.
४ °देशः—घ, ङ. अपपाठः.
६ वगते—घ. १ ङ । गते—घ २.
७ इति नोपात्तम्—घ, ङ.
८ श्रुत्या—टीकापाठः । — not necessarily
९ इति न धृतम्—घ, ङ.

* ३ त्यन्तमेकत्वम् - घ, ङ. त्यन्तमेव मुख्यमेकत्वम् - ठ. टीकानुसारेण तु पठितम् ।
* ७ पदे - का०, अपपाठः.
८ व्युपपद्यते - ग १.२.४.

नुप्रसक्ताविचारणाप्रसङ्गनिवृत्त्यर्थन्तु न सर्व स्वंरूपसूत्रमतभेदा उदाह्रियन्ते ॥७०॥

कार्यत्वे नित्यतायां वा केचिदेकत्ववादिनः ।
कार्यत्वे नित्यतायां वा केचिन्नानात्ववादिनः ॥७१॥

येषामेकशब्दत्वं तेषामयं जातिव्यक्तिव्यवहारो न सम्भवतीति जात्युपन्यासादनन्तरमिदमुपन्यस्तम् । तत्र नित्यतायामत्यन्तमुख्यमेकत्वम्[3] । कार्यत्वे तु सकृदुच्चरितस्य वर्णस्य पदस्य वा पुनरुच्चारणे स एवायमित्यव्यभिचारिप्रत्ययाभेद उत्पद्यमान एकत्वं प्रकल्पयति । एकत्वदर्शनं चाश्रित्योक्तम्—एकत्वादकारस्य सिद्धम् इति । उपलब्धिव्यवधानन्तु कालशब्दाभ्यां न वर्णरूपव्यवधानम् । देशपृथक्त्वदर्शनं च सत्ताकृतिजलबिम्बदर्शनवत् । अनेकत्वपक्षेपि कार्येष्वपि शब्देष्ववश्यं पुनरुच्चारणे व्यवहारार्थमौपचारिकमेकत्वमाश्रयणीयम् । भिन्नार्थानां तु पदानां भिन्नपदस्थानां च वर्णानामत्यन्तनानात्वं नित्यपक्षे कार्यपक्षे वा नानात्ववादिभिरभ्युपगम्यते ॥७१॥

पदभेदेपि वर्णानामेकत्वं न निवर्तते ।
वाक्येषु पदमेकञ्च भिन्नेष्वप्युपलभ्यते ॥७२॥

(टी०) कारणमिति । तस्यासामर्थ्यम् । यतो नायंशब्दश्रवणाज्जातिसमवेता प्रतीतिः । तत्परित्यागेन चान्यत्रापि प्रयोगात् । न हि स तस्यार्थो यो येन विनापि भवति ॥७०॥

कार्यत्वे इति । उत्पाद्यत्वे । प्रक्रान्तत्वाच्छब्दस्येति सम्बन्धनीयम् । एकत्ववादिनः इति अर्थभेदेप्येकगोशब्द इति दर्शनम् । नानात्ववादिनः इति । भिन्नेष्वर्थेषु भिन्नाः शब्दा इत्यपरे । प्रक्रान्तां कारिकां सम्बन्धयति—येषामेक एव गोशब्दो न बहवः तेषां जातिमन्तरेण स्वयमेकप्रत्ययप्रवृत्तेर्नात्र जातिपरिकल्पना । ततश्च जातिभेदनिबन्धनः संज्ञासंज्ञिसम्बन्धो नास्तीति ।

अत्यन्तमुख्यम् इति । मुख्यमनुपचरितम् । तदपि क चित् कारणभेदादवसिते भेदेप्यभिन्नप्रत्ययवृत्तेर्निर्व्यभिचारितया प्रकल्पितमेकत्वं मुख्यकल्पमेव । यथा कार्यपक्षेनन्तरं वक्ष्यतीत्यत्यन्तग्रहणं सर्वथा भेदाभावात् । उपलब्धीति । उपलब्धिर्व्यवधीयते कालशब्दाभ्यां न वर्णः । संनिहिताभिव्यक्तिनिमित्तो ऽकार उपलभ्यते । विनष्टे व्यक्तिनिमित्ते नोपलभ्यते । सत्ताकृतीति । यथा भिन्नदेशेष्वपि द्रव्यादिषु युगपदुपलभ्यमाना सत्ता नैकत्वं जहाति । व्यवहारार्थम् इति । योयं शाब्दो व्यवहारो नासावेकत्वं विना घटते । भेदे ह्येकेनोच्चारिते गोशब्दे कृतसमयस्तदन्योच्चारिते न प्रतिपद्येतार्थमकृतसङ्केतत्वात्तस्येति । भिन्नार्थानाम् इति । नवस्वर्थेषु नवशो गोशब्दाः । गोपिण्डेषु तु सर्वेष्वेक एव तथा गवादिषु प्रत्येकम् ॥७१॥

१ प्रसक्तमवि°—कोशः. अत्र मकाराकारौ प्रक्षिप्तौ लेखकेनेत्युपेक्ष्यौ ।
२ स्वरूपमात्रभेदा—घ, ङ.
४ अ इ उण् इतिसूत्रे वार्तिकम् ।
५ कृदिति—घ, ङ. लेखकप्रमादजोपपाठः
६ भेदेन—घ २.

* ४ तद् — क २.३.४.५.७, का०.

अर्कः, अश्वः, अर्थ इति भिन्नेष्वप्येतेषु पदेषु कालशब्दान्तराभ्यां व्यवहितोपलब्धिरभिव्यक्तिनिमित्तासंनिधानात्तिरोभूतरूपो, निमित्तभेदाद्भिन्नेषु प्रयोक्तृषु देशपृथक्त्वे भेदरूपेण प्रत्यवभासमान एक एवायमकारश्छायादर्शजलादिप्रतिबिम्बभेदकल्पेन लोके प्रयुज्यते। वाक्येषु च प्रविवेकि निर्ज्ञातार्थभेदं वा यावत् तुल्यरूपं पदं गौरक्ष इति सर्वं तदेकम्। नामाख्यातभेदेपि चैकमेवाक्षयश्व इत्येवम्प्रकारम् पदम् ॥७२॥

न वर्णव्यतिरेकेण पदमन्यच्च विद्यते।

वाक्यं वर्णपदाभ्यां च व्यतिरिक्तं न किञ्चन ॥७३॥

न हि क्रमजन्मभिरुच्चरितप्रध्वंसिभिरयुगपत्कालैः सावयवैर्वर्णैः शब्दान्तरारम्भः सम्भवतीति वर्णमात्रमेव पदम्। तेषामपि सावयवत्वात्क्रमप्रवृत्तावयवानामा व्यवहारविच्छेदात्तुरीयतुरीयकं किमप्यव्यपदेश्यं रूपं व्यवहारातीतमस्तीति न वर्णपदे विद्येते। वर्णपदाभावे कुतो वाक्यस्य व्यतिरेकः। तथा चोक्तम्।

टी०—एकत्वमेवाभिमतं वर्णयन्नाह—**पदभेदेपि** इति। **निमित्तभेदाद्** इति। स्थानकरणाभिघाताद् ध्वनयोभिव्यक्तिनिमित्तम्। **देशपृथक्त्वे** इति। यदा बहवः प्रयोक्तारः युगपद्देशपरिग्रहेण स्थितास्तदायमेकोपि **भेदरूपेण** इति देशभेदेन प्रत्यवभासते। **छायेति**। न हि छाया नाम किंचिद्वस्त्वन्तरं स एव लेकः पुरुषो भिन्नदिक्स्थः प्रदीपभेदाद्भिन्न इव दृश्यते। यथा च पदभेदे वर्णानामेकत्वं तथा वाक्यभेदेपि पदानामित्याह—**वाक्येषु च** इति। **प्रविवेकि** इति। अपोद्धारे यान्येतानि वाक्ये पदानि विविच्यन्ते। **निर्ज्ञातार्थभेदम्** इति। यथा गोशब्दो नवस्वर्थेषु भिन्नार्थः। यथा स एव गोशब्दो भूयः सास्नादिमति। तस्य तूपादानं सकलगोशब्दोपग्रहाय। **तुल्यरूपम्** इति। श्रुत्यभेदः कारणमेकत्वे। तथाक्षशब्दोपीति विभीतकादिषु भिन्नार्थो विभीतक एव भूयः। भिन्नार्थनामपदानामपि कया चिन्मात्रयाऽर्थसामान्यं न पुनर्नामाख्यातयोः। तत्रात्यन्तविलक्षणोर्थः। **आक्ष** इति। अक्षतेरशेर्वा अप्रत्ययेन शपि लुकि च कृते सिपि रूपम्। अदेर्वा लुङि घस्लृभावे कर्मण्युत्तमैकवचने मन्त्रत्वाच्च्लेर्लुकि। **अश्वः** इति श्वयतेर्लुङि मध्यमपुरुषैकवचनेन। अगम इत्यर्थः ॥७२॥

यदि तु वर्णा एव पदं पदानि च वाक्यं तत एकत्वमिति प्रदर्शयति—**न वर्णव्यतिरेकेण** इति। **तेषामपि** इति। वर्णानाम्। **सावयवत्वात्** इति। शक्यन्ते ते बुद्ध्या प्रविवेक्तुम्। **आ व्यवहारविच्छेदात्** इति। तावद्बुद्ध्या प्रविभागो यावदपकर्षपर्यन्त इति। तत्र तु व्यवहारविच्छेदः। इदं नामैतदवयवस्य भाग इति। **तुरीयतुरीयेति**। तुरीयतुरीयमिति चतुर्थस्य चतुर्थो भागः

१ पृथक्त्वे—घ, ङ.

२ °श्व—घ, ङ.

३ इत्येवं प्रकारपदं—घ, ङ.

४ तद—क.२.३.४.५.७, का०.

५ मन्यत्र—ख, घ, ङ। मन्यन्न. क ३. ४. ५. ७, का०.

६ तुरीयेति शब्दो न धृतः—घ, ङ.

* इवेति पाठः सुगमः। यथा न वर्णेष्वव— ९ तत्रैतेषां—क.१.२.३.४.५.७, ख, ग.

श्नित्यत्वमेवं संप्राप्नोति' इति। समुदायाभावादुपगृहीतार्थे उपगृहीतो वा न कश्चिच्छब्दो विद्यत इति ॥७३॥

अपर आह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥७४॥

वर्णप्रतिपत्तिनिर्भासाभ्यो बह्वीभ्यः प्रतिपत्तिभ्यः समुदायविषयस्य प्रयत्नस्य भेदात्सत्यपि पदाभिव्यक्तिविषयस्य ध्वनेर्भेदे सादृश्यानुगमाद्वर्णविभागप्रतिपत्त्युपाया पदे प्रतिपत्तिरुत्पद्यते। तत्त्वक्रममपूर्वापरमेकमेव नित्यमभेद्यं वर्णतुरीयोपपादित इवैकात्मा। वर्णानां त्वव्यपदेश्यानि व्यवहारातीतानि भिन्नरूपाभिमतान्यकारादीनां तुरीयाणि प्रतिपादकानि कल्पितानि। तेन तेषां सुज्ञानतरमेकत्वं प्रसिद्धं शास्त्रव्यवहारे। वाक्यस्य चैकानेकपदस्वरूपस्यार्थे प्रयोगाद्वाक्यप्रतिपत्त्युपायभूता पदे प्रतिपत्तिरुत्पद्यते। अतत्त्वभूतास्तस्मिन्नेव वाक्यात्मनि वर्णपदरूपनिर्भासाः क्रमवत्यो बुद्धय उत्पद्यन्ते। तस्मादेवंभूताद्वाक्यादभेद्यान्निर्भागाच्छब्दात्मनो वर्णानां पदानां चात्यन्तमविवेक इति ॥७४॥

भिन्नं दर्शनमाश्रित्य व्यवहारोनुगम्यते।

तत्र यन्मुख्यमेकेषां तत्रान्येषां विपर्ययः ॥७५॥

(टी०) षोडशी कला... ...। अपकर्षवाचिनो वा तुरीयशब्दात् प्रकारे गुणवचनस्य इति द्विरुक्तम्। **उपगृहीतेति**। परितः परिच्छिन्नरूपः। **उपकृतार्थः** इति। अर्थेषु कृतावधिः ॥७३॥

नानात्वदर्शनमधिकृत्याह—**पदे न वर्णाः** इति। कथं भागभेदरूपानुपातिनी बुद्धिरित्याह—**वर्णप्रतिपत्तिनिर्भासाभ्यः** इति। प्रतिपत्तिशब्देन वर्णाख्ये विषये ज्ञानस्य व्यापार उच्यते। तस्मिंश्च यत्तस्य कर्तृत्वं तद्धि निर्भासशब्देनोच्यते निर्भासत इति। तेन वर्णप्रतिपादनाख्ये व्यापारे ये निर्भासाः प्रतिपत्तय इति। यद्वा परमार्थवर्णपरिच्छेदवन्निर्भासनं यासामिति। वर्णविवक्षानिष्पादितध्वन्यभिव्यक्तवर्णविषया बुद्धिरन्या। तदविवक्षानिष्पादितध्वन्यभिव्यक्तात्पदादपोद्धारपरिकल्पनापोद्धृतवर्णविषयाऽन्या। सा च दृश्या तद्वन्निर्भासत इति युज्यतेन्यपदार्थः। अथवा वर्णा एव प्रतिपत्तयः। प्रतिपद्यन्त इति। तन्निर्भासाभ्यः तदाकाराभ्य इति। **वर्णविभागेति**। वर्णात्मका ये प्रविभागाः तेषु प्रतिपत्तिः। एतदाह। यो यदुपायगतो भेदः तमुपेये निवेश्य पदमेव भेदवत्प्रयवास्तथेत्यर्थः।

१ भाष्यग्रन्थः.

२ °दुपकृतार्थं—टीकापाठः.

३ इव—का०.

४ इदं स्याद्वादरत्नाकरे ६४८ तमे पृष्ठे संगृहीत वैयाकरणभूषणे च षट्षष्टितमी कारिकेत्युपात्तम्। तत्र कोण्डभट्ट आह—

५ विभाग इति न पठितम्—घ, ङ.

६ तत्तु खण्डक्रमपू०—घ, ङ. टीकासंवादीकृतः।

७ वाक्यभेदाद्या—कोशस्थो भ्रष्टः पाठः।

८ इत्यारभ्यातत्त्वभूता इति यावद् ग्रन्थो गलितः ठ-पुस्तके।

* दकास्तालवादयस्तेषां प्रतिध्वनि भिन्ना एव   * र्णपरिमाणसंस्थानभेदोपप्लव-मिवादर्शयन्ति ॥

आचार्या हि परस्मिन्नक्रमेन्तःसंनिवेशिनि शब्दतत्त्वे प्रत्यधिकरणमागमभेदपरिग्रहेण भिन्नानि दर्शनानि श्रिताः शास्त्रव्यवहारमनुगच्छन्ति । तद्यथा । श्रुत्यभेदादनेकार्थत्वेप्येकशब्दत्वम्, अर्थभेदादेकश्रुतित्वेप्यनेकशब्दत्वमिति । तत्र चैकेषामौपचारिको भेदो मुख्यमेकत्वम् । अन्येषान्तु पृथक्त्वं मुख्यं व्यावहारिकमेकत्वमिति । तथा ह्युक्तम्—एकश्च शब्दो बह्वर्थोऽत्ताः पादा माषाः इति । तथा ग्रामशब्दोऽयं बह्वर्थं इत्युक्त्वा भेदेनोपसंहारं करोति—तद्यः सारण्यके ससीमके सस्थण्डिलके वर्तते तस्येदं ग्रहणम्[3] इति ॥७५॥

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥७६॥

इह नित्यत्वादात्मतत्त्वस्य स्फोटानां स्थितौ नास्ति कालपरिमाणवृत्तेः

(टी०) तियन्ति । तात्त्विकं तु तस्य रूपमाह—**अक्रमम्** इति । **अर्थे** इति । लोके प्रवृत्तिनिवृत्तिलक्षणव्यवहारख्यापनाय वाक्यमेव प्रयुज्यते । **तस्मिन्नेव** इति । उच्चार्यमाणे । **अभेद्याद्** इति । अभिधेयनिबन्धनभेदाभावात् ॥[5] ७४॥

द्वे अपि एकत्वनानात्वदर्शने आश्रित्य शास्त्रे व्यवह्रियत इत्याह—**भिन्नम्** इति । कथं भिन्ने परस्परविरोधिनी दर्शने एकत्रेत्याह—**तत्र** इति । एकत्वे मुख्ये नानात्वमुपचरितं नानात्वे एकत्वमिति । आचार्या भिन्नानि दर्शनान्याश्रित्य व्यवहारमनुगच्छन्ति इति सम्बन्धः । तत्र कः पन्था न शक्य आस्थातुमिति संव्यवहारार्थं सर्वाणि दर्शनान्याश्रिताः । **परस्मिन्** इति । योसौ बुद्ध्यव्यतिरिक्तपरशब्दः तस्यैव परमार्थतः शब्दत्वं, तदनुकारात्तु बाह्यस्य शब्दत्वम् । **प्रत्यधिकरणम्** इति । प्रतिसिद्धान्तम् । **अर्थभेदाद्** इति । अभेदलक्षणे सम्बन्धे न सर्वार्थरूपता युगपत्संभवतीति एकार्थोपग्रह एव तत्र तस्य तस्यार्थाकारस्य स्वीकारादन्यत्वम् । योग्यतालक्षणे ह्येकैकार्थप्रतिपादनेन कार्येण शक्यमवसातुमेकैव तस्य शक्तिरिति ॥७५॥

स्वरूपप्रत्ययप्रतिपादनप्रसङ्गेनानुषङ्गिकं समाप्य सामान्येन यदुक्तं नित्याः शब्दार्थसम्बन्धाः (१।२३॥) इति तत्र नित्यस्य कालभेदाभावः, प्रसङ्गेन तदुपदर्शनार्थमाह—**स्फोटस्य** इति । **ग्रहणो-**

१ श्रुतित्वमिति—घ, ङ.
२ पा० म० भा० १।२।४५।६। वार्तिके ।
३ पा० म० भा० १।१।७।।८ वार्तिके ।
४. परिमाणशब्दो नास्ति—ठ.
५ अत्र स्याद्वादरत्नाकरस्थैतद्व्याख्या संक्षिप्य लिख्यते यथा—

न तु वाक्ये पदानि, पदेषु वर्णाः, वर्णेष्ववयवाः सन्ति । पूर्वादिभागक्रमवर्णपदरूपावसायः पुनरभिव्यञ्जकानां ध्वनीनां धर्मानुविधानात् । क्रमवतां हि ध्वनीनां ये निष्पादकास्तालवादयस्तेषां प्रतिध्वनि भिन्ना एव

शक्य इति विभिन्नशक्तिकताल्वादिकारणनिष्पादिता ध्वनयः परमार्थतः परस्परमत्यन्तं विसदृशा अपि तुल्यस्थानकरणजन्मतया स्वयं सदृशभावं भजन्तः स्वव्यङ्ग्यानामन्योन्यविलक्षणानां वर्णपदवाक्यस्फोटानामपि तुल्यतामुपकल्पयन्तो भागबहिर्भूतानपि तान् भागसंक्रान्तानिवावभासयन्ति । मुखमिव मणिकृपाणदर्पणादयो नियतस्थानवर्णपदपरिमाणसंस्थानमनुपप्लवमेकमनेकमिवानेकविधस्थानवर्णपरिमाणसंस्थानभेदोपप्लवमिवादर्शयन्ति ॥

* संगृहीतं व्याख्यातं च ।   * चिरकालमुपलभ्यते ते वैकृता इत्युच्यन्ते ।

स्वल्पोपि व्यापारः । ध्वनिना तु संसृष्टं[1] स्फोटस्य[2] स्वरूपमुपलभ्यते यस्मात् तस्माद् ध्वनेः स्थितिकालः स्फोटोपलब्धिरूपः परिवर्तते । तेन च स्फोटविषयेण ग्रहणेनोपाधिना भिन्नकालेन प्रकल्पितभेदाः[3] स्फोटस्य द्रुतमध्यमविलम्बिता वृत्तयस्त्रिभागोत्कर्षेण युक्ताः समाख्यायन्ते ॥७६॥

यद्येवं ह्रस्वदीर्घप्लुतेष्वपि ध्वनिरेव कालभेदहेतुः[4] । तपरस्तत्कालस्य[5] इति दीर्घप्लुतयोर्यथैव, वृत्तिभेदेपि तथैव[6] तत्कालव्यपदेशप्रसङ्गः । द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदाद्[7] इत्येतस्मिन् पर्यनुयोगे प्रसक्ते प्रतिविधीयते—

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते ॥ ७७ ॥[8]

इह द्विविधो ध्वनिः—प्राकृतो वैकृतश्च । तत्र प्राकृतो नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते । वैकृतस्तु येनाभिव्यक्तं स्फोटरूपं पुनः पुनरविच्छेदेन प्रचिततरं[8] कालमुपलभ्यते । एवं हि संग्रहकारः पठति—

(टी०) पाधीति । ग्रहणं बुद्धिः, तस्यैवौपाधिकस्य भेदेन तस्य स्फोटस्याभिन्नस्यापि वृत्तिभेदो ह्रस्वत्वादिभेदः । गृह्यतेनेनेति वा ग्रहणं ध्वनयस्त एवोपाधयः, तद्भेदेन वृत्तिभेदः । **नित्यत्वात्** इति । नित्यानां नास्ति कालवृत्त्यनुग्रहः । चिरं क्षिप्रमिति च कालकृता व्यपदेशाः । ते स्फोटे न संभवन्ति । **कालपरिमाणवृत्तेः** इति । काल एव परिमाणं क्रियान्तरस्य परिच्छेदकत्वात् । तस्य वृत्तिः क्रमयौगपद्ये । **ग्रहणेन** इति । यासौ स्फोटग्राहिका बुद्धिः, ध्वनयो वा, तेषां च स्फोटो विषयो व्यङ्ग्यत्वेन । **भिन्नकालेन** इति । अभिन्नेपि स्फोटे ता एव बुद्धय उपाधिभूताः कालभेदेनावर्तमाना भिद्यन्ते । तत्कृतश्चायं द्रुतादिवृत्तिभेदः । **त्रिभागोत्कर्षेण** इति । द्रुतायां यत्परिमाणा वर्णास्त्रिभागेनोत्कृष्यन्ते मध्यमायां ततोपि त्रिभागेनोत्कृष्यन्ते विलम्बितायाम् ॥ ७६ ॥

नित्यत्वे इति । नित्यः शब्द इत्यस्मिन्दर्शने । **प्राकृतस्य** इति । ध्वनिस्फोटयोः पृथक्त्वेनानुपलम्भात्तं स्फोटं तस्य ध्वनेः प्रकृतिमिव मन्यन्ते । तत्र भवः प्राकृतः । तदुत्तरकालभावी तस्माद्विलक्षण एवोपलभ्यत इति विकारापत्तिरिव स्फोटस्येति वैकृत उच्यते ।

पुनः पुनरिति । यावद् ध्वनिर्नोपरमति तावल्लभ्यते स्फोटः । **संनिवेशविशेषात्** इति । कानिचित्प्रसन्नसंनिवेशानि स्ववधाराणि, कानिचिद्विषमसंनिवेशानि दुरवधाराणि । **अपचितेति** ।

१. संसृष्टस्य—घ१, ङ ।
२. इत्यतः पूर्वं 'तस्य' इत्यधिकम्—ठ.
३. परिकल्पित—घ, ङ.
४. कालहेतुः—घ, ङ.
५. पा० १ । १ । ७० ॥
६. पा० १ । १ । ७० ॥
७. इदं स्याद्वादरत्नाकरे (४ । १० ॥) संगृहीतं व्याख्यातं च ।
८. प्रचित—घ, ङ.
९. अत्र विषये स्याद्वादरत्नाकरे (४।१०॥) यदुक्तं देवसूरिणा तदुपयोगीति संगृह्यते—

द्विधा हि ध्वनयः प्राकृताः वैकृताश्च । तत्र प्राकृता नाम ते यैर्विना सामान्यविशेषरूपेण स्फोटात्मा प्रतीतिविषयं न याति । प्रतीतस्तूत्तरकालं यैः स एवायम् इत्युल्लेखेन चिरकालमुपलभ्यते ते वैकृता इत्युच्यन्ते ।

* ७ इत्यभिनवगुप्तेन ध्वन्यालोकव्याख्यायां * इत्युच्यते । तन्निमित्तां च प्लुतसंज्ञां लभते ।

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
स्थितिभेदे[2] निमित्तत्वं वैकृतः प्रतिपद्यते ॥ १ ॥[3]

तत्र तथा संनिवेशविशेषात्तुल्यमात्राविभागपरिमाणानि गर्गादिवाक्यानि कानिचिदुच्चारणावृत्तिप्रचयग्राह्याणि । कानिचिदपचितरूपावृत्तिग्राह्याणि । तथा स्वभावभेदादपचितध्वनिद्योत्यो ह्रस्वः । तावताऽभिव्यक्तिनिमित्तेन स्वरूपस्य ग्राहिका बुद्धिस्तत्रोत्पद्यते । प्रचितध्वनिद्योत्यस्तु दीर्घः । प्रचिततरध्वनिप्रतिपाद्यस्तु प्लुतः । स च प्राकृतध्वनिकालो व्यतिरेकाग्रहणादध्यारोप्यमाणः स्फोटे स्फोटकाल इत्युपचर्यते शास्त्रे ॥ ७७ ॥

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ ७८ ॥[7]

तद्यथा प्रकाशो जन्मानन्तरमेव घटादीनां ग्रहणे हेतुः, अवतिष्ठमानस्तु ग्रहणप्रबन्धहेतुर्भवति । एवमभिव्यक्ते शब्दे ध्वनिरुत्तरकालमनुवर्तमानो बुद्ध्यनुवृत्तिं शब्दविषयां विषये [।भि] व्यक्तिबलाधानादुपसंहरति । तस्मादुपलक्षितव्यतिरेकेण वैकृतेन ध्वनिना संसृज्यमानोपि स्फोटात्मा तद्रूप्यस्यानध्यारोपात् शास्त्रे ह्रस्वादिवत् कालभेदव्यवहारं नावतरति ॥ ७८ ॥

(टी०) अपचितरूपाभिरल्पीयसीभिरावृत्तिभिः, अपचिताभिर्वा रूपावृत्तिभिर्गृह्यते । तत्र गर्गादिवाक्यानि तुल्यकालान्यपि भिन्नाभिरावृत्तिभिर्धारणक्षमाणि । तथा तुल्यकालत्वेपि ह्रस्वादयः प्रचिताप्रचितध्वनिव्यङ्ग्यस्वभावा इत्येतावता दृष्टान्तः । व्यतिरेकाग्रहणात् इति । न कदाचिदयं स्फोटस्ततो व्यतिरेकेणोपलब्ध इति तं कालं तस्यैवावस्यतीति[8] ॥ ७७ ॥

वैकृतमाह—शब्दस्य इति । ऊर्ध्वम् इति । प्राकृतेन ध्वनिना व्यक्तेरुत्तरकालम् ।

टी०—ग्रहणप्रबन्धहेतुः । न पुनरुपलभ्यस्य घटादेः प्रचिततामन्यद्वा धर्मान्तरं दर्शयति । विषय[।भि]व्यक्तिबलाधानात् इति । विषयाभिव्यक्तिरेव बलमाधत्ते पुनः पुनर्भावात् । उपलक्षितव्यतिरेकेण इति । प्राकृतेन ध्वनिना स्फोटेभिव्यक्ते, उपलब्धेः पश्चाद्भावित्वात्तस्य स्फोटव्यतिरेक उपलक्ष्यते । तदेतयोर्भेदमुपलक्षयन्तो नान्यगतं कालभेदमत्राध्यारोपयन्ति । यतो वैकृतं ध्वनिरूपं नाध्यारोप्यते स्फोटे ॥ ७८ ॥

कथं पुनर्ध्वनिः शब्दोपलब्धिनिमित्तत्वं प्रतिपद्यते—

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा ।
क्रियते ध्वनिभिर्वादास्त्रयोभिव्यक्तिवादिनाम् ॥७९॥[1]

एतस्मिञ्श्लोके शब्दाभिव्यक्तिप्रक्रियामात्रं प्रतिज्ञायते । उत्तरौ तु दृष्टान्तप्रदर्शनविषयौ ।

तत्र केचिन्मन्यन्ते ध्वनिरुत्पद्यमानः श्रोत्रं संस्करोति, तच्च संस्क्रियमाणं शब्दोपलब्धौ द्वारतां प्रतिपद्यते । अन्ये त्वभिव्यक्तिवादिनो मन्यन्ते—शब्द एव ध्वनिसंसर्गात्प्राप्तसंस्कारः श्रोत्रस्य विषयत्वमुपगच्छति । केषांचिद् ध्वनिरुभयोः शब्दश्रोत्रयोरनुग्रहे वर्तते । ताभ्यामिन्द्रियविषयाभ्यां सहकारिणा निमित्तान्तरेणानुगृहीताभ्यां शब्दविषया बुद्धिरुत्पाद्यते । प्रदीपप्रकाशानुग्रहादिवद् दृश्येष्वर्थेषु सहकारिनिमित्तान्तरापेक्षया हि शक्तयो निमित्तानां समग्रतां नातिक्रामन्ति ॥७९॥

अभिव्यक्तिजा ध्वनय इत्युक्तं, केनोपायेन तेभिव्यञ्जका इति पृच्छति—कथं पुनर् इति ।

प्रक्रियामात्रम् इति । स्वरूपकथनमात्रमेतत् । नात्र हेत्वपदेशः । श्रोत्रं संस्करोति इति । ग्रहणासमर्थस्य वा श्रोत्रस्यापूर्वशक्त्याधानेन संस्कारः, विद्यमानशक्तिप्रबोधो वा, अर्थक्रियायां वा द्रुतस्यापि केवलं सान्निध्यमात्रमेव संस्कारो वाय्वेनेव चिकीर्षित इति त्रयः संस्कारविकल्पाः । द्वारताम् इति । तथा संस्कृतेन्द्रियोत्पन्ना बुद्धिः स्वविषयपरिच्छेदायालमिति । समग्रतां नातिक्रामन्ति । यदि सामग्र्येपि कार्यं न स्यात्, वैकल्ये च स्यात्, ततोतिक्रमो, न चैवम् इति ॥७९॥

१ वर्णस्य—क १. २. ३. ४. ५. ६. ७. ख, का०.

२ वृत्तिभेदे—का०

३ इति सर्वेषु कोशेषु मूलकारिकास्वन्तः प्रक्षिप्तम् । संग्रहकारीयमिदामिति विवरणं स्याद्वादरत्नाकरश्च । मध्येविवरणमिदमुदाहृतं न च व्याख्यातम् ।

४ 'परिमाणान्य' इत्येतावन्मात्रं पठ्यते । परतो गलितान्यक्षराणि—ठ । परिणामात्पर्वन्युगादि—घ, ङ.

५ तस्य चाभि ।

६ वृत्तिभेदे—क १. २. ४.५, ख, घ, ङ, का०. अयमपपाठः । समुपोहन्ते इत्यस्य सकर्मकत्वात् । सम्पादयन्ति घटयन्तीत्यर्थस्य वृषभेण वादिदेवसूरिणा च दर्शनात् । हेलाराजोपि वृत्तिभेदम इति पठति ।

(१।१६॥), वादिदेवसूरिणा च स्याद्वादरत्नाकरे (४।१०॥) हेलाराजेन च कालसमुद्देशे अनुनिष्पादितत्वेनेत्यादिश्लोकव्याख्यायां संगृहीतम् ।

८ इमं श्लोकं देवसूरिरित्थं व्याकरोति—यः प्रथमं जातो ध्वनिस्तस्य मात्राकालत्वात्तदुपचारेण तदभिव्यक्तः स्वतो निरवयवत्वादत्यन्तं पूर्वापरभागरहितः स्फोटात्मापि मात्राकाल इति व्यपदिश्यते । तन्निमित्ता च ह्रस्वसंज्ञा शास्त्रे व्यवहाराय क्रियते । यः प्रथमं जातो ध्वनिर्यश्च तज्जस्ताभ्यामाभिव्यक्तः स्फोटोपि तयोर्द्विमात्राकालत्वादुपचारेण मात्राद्वयकाल इत्यपदिश्यते । तन्निमित्ता च दीर्घसंज्ञा क्रियते । प्रथमध्वनिजातध्वनेर्जातो यस्तृतीयो ध्वनिस्तेन पूर्वाभ्यां चाभिव्यक्तस्तेषां त्रिमात्राकालप्रमाणत्वादत्यन्ताप्रमाणोपि शब्दस्त्रिमात्र

* 'श्लोके' इति यावदुपेक्षितम्—ठ.

१ वारणहेतु—घ, ङ.

२ व्यक्तिबाधानीयामुप०—घ, ङ. टीकोपाश्रयेण शोधितम् ।

३ इत्यत आरम्भानन्तरपरे श्लोके विवरणे संगृहीतम् ।

४ भेदव्यवहारो – घ, ङ.

५ विषयस्यैवो°—वा०दे०सू०.

६ इदं स्याद्वादरत्नाकरे (४ । १० ॥)

* आतपेन पृथिव्याश्चातपशुष्काया उदकेन संस्कृतो ग्रहणयोग्यो भवति घ्राणस्य। तत्र

* ६ येषां—कोशः। ७ रश्म्योरनु०—घ, ङ. लेखकप्रमादः।

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः ।

विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये ॥८०॥

समाधानं हि प्राकृतमलौकिकं वा न विषयात्मनि दृश्ये विशेषमादधाति। तथाञ्जनादिद्रव्यं चक्षुरेव संस्करोति न बाह्यं विषयम्। अलौकिकमपि समाधानं सूक्ष्मव्यवहितविप्रकृष्टोपलब्धौ चक्षुरेवानुगृह्णाति। विषयानुग्रहे हि तस्यान्यैरपि ग्रहणं प्रसज्येत । विशेषाभावात् । विषयसंस्कारस्तु तैलादीनामातपादिभिः पृथिव्याश्चोदकेन गन्धप्रतिपत्तिकाले दृष्टो न घ्राणेन्द्रियस्य। घ्राणेन्द्रियसंस्कारे तु संस्कृतासंस्कृतेषु विषयेषु प्रतिपत्तिभेदो न स्यात्। विशेषाभावात् ॥८०॥

चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरपि ।

विषयेन्द्रिययोरिष्टः संस्कारः स क्रमो ध्वनेः ॥८१॥

इहालोकानुगृहीतं घटादिविषयं सन्तमसेऽवस्थितोऽयं प्रतिपद्यते । तत्र येषामप्राप्यकारि चक्षुस्तेषामालोकेन विषयः प्रायेणानुगृह्यते। प्राप्यकारित्वे तु चक्षुषस्तुल्यजातीयेन तेजसा नयनरश्म्यनुग्रहः क्रियते ॥८१॥

टी०—समाधानेति। समाधानं चेतसोभिसंस्कारः।

प्राकृतम् इति। लौकिकम् । यदर्वाग्दर्शनानाम् । अलौकिकं यद् दिव्यदर्शनानाम्। विषयात्मनि इति। यदि विषयात्मनि संस्कारो भेदेन, नियमेन सर्वैरेवासंस्कृतेन्द्रियैरप्युपलब्धिः स्यात्। अन्यैः इति । अलब्धाभिज्ञैः। तैलादीनाम् इति । गन्धतैलादीनाम्। आतपाद् इति। आदित्यरश्मिभिः। संस्कृतासंस्कृतेषु इति। सर्वविषयोपलक्षणमेतत्। न पुनरिन्द्रियसंस्कारवादिनः संस्कृतो विषयोस्ति ॥८०॥

प्राप्यकारित्वे इति। येषां प्राप्यकारीन्द्रियमिति दर्शनम्।

आलोकानुगृहीतम् इति। आलोकेन विषयानुग्रहे विप्रतिपत्तिरेव नास्ति। तुल्यजातीयेन इति। चक्षुस्तेजोमयम्। तत्र द्वे दर्शने—बुद्बुदमानं रश्मिमात्रं चेति। तत्र यदा सन्तमसेऽवस्थितो भिन्नदेश आलोके स्थितं द्रव्यमुपलभते तदा नयनरश्मयः सूक्ष्मा नयनात् सन्ततं निर्गत्य व्यापित्वात्तेजःपरमाणूनामन्तरालवर्तिभिस्तेजःपरमाणुभिः संबध्यमानाः सूक्ष्मतरं रश्मिद्रव्यान्तरं पृथ्वप्रमारभमाणास्तावद् गच्छन्ति यावदालोकः। ततस्तेन संस्कारस्तेषां रश्मीनामिति ॥८१॥

१ समाधानं चित्तस्यैकाग्रता इति वाराणसेयसंग्रहः ।

२ स्फोटाभिव्यक्तौ दर्शनभेदानाख्यातुकामो देवसूरिर्यदाह तद्विपर्ययेत्यादिना संदर्भेण बहु संवदतीति तद्दर्शनायेह तदुपन्यस्यते—स्फोटस्यैव संस्कारो ध्वनिभिर्विधीयते ततोसौ प्रतीतिविषयो भवति । यथा तैल देर्गन्ध आतपेन पृथिव्याश्चातपशुष्काया उदकेन संस्कारोपगमे संस्कृतासंस्कृतविषये तुल्यं ग्रहणं भवेन्न च भवति । तस्माद्विषयस्यैव तत्र संस्कारः क्रियते इति ।

३ संसर्गात्तु—ठ.

४ चक्षुषा—का०. अपपाठः.

५ सं—क १.७, ग १. ४. इदमुपेक्ष्यम्।

६ येषां—कोशः

* ८ प्रत्यावृत्त्या—घ, ङ, का०। प्रत्यावृत्ति—क १.२.३.४.५.७, ग १.३.४, ङ

* त्या सुखेनावधारयितुं शक्यते। न च प्रत्यावृत्ति स्तत्र दृष्टा बुद्धिरूपजायते यथेदं गृहीतमिदं

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते ।

कैश्चिद्ध्वनिरसंवेद्यः स्वतन्त्रोन्यैः प्रकल्पितः ॥८२॥[1]

अथापरेऽभिव्यक्तिवादिनां त्रयो दर्शनभेदाः। शब्देन संसृष्टो ध्वनिरुपाश्रयानुराग इव स्फटिकादीनामविभक्त उपलभ्यते। केषांचित्तु यथेन्द्रियाणीन्द्रियगुणाश्चासंवेद्यस्वरूपा एव विषयोपलब्धिहेतवः, तथायं ध्वनिरगृह्यमाणरूपः शब्दग्रहे निमित्तं भवति। अन्ये त्वाहुः—दृष्टा केवलस्य ध्वनेः स्फोटरूपानवधारणे दूरादुपलब्धिः । शब्दोपलब्धिकल्प एवासावित्यपरे । तद्यथा। महत्त्वपचितपरिमाणानां द्रव्याणां परिमाणोपचयग्रहणं दृष्टं, चन्द्रादीनां च परिमाणापचयग्रहणं, वृक्षाद्यारूपग्रहणं च, शकलकोटरादीनां सामान्यविशेषाणां च धवखदिरादीनामप्रतिपत्तिः ॥८२॥

यथानुवाकः श्लोको वा सोढत्वमुपगच्छति ।

आवृत्त्या न तु स ग्रन्थः प्रत्यावृत्ति निरूप्यते ॥८३॥

वर्णपदवाक्यविषयाः प्रयत्नविशेषसाध्या ध्वनयो वर्णपदवाक्याख्यान्स्फोटान्पुनः पुनराविर्भावयन्तो बुद्धिष्वध्यारोपयन्ति। क्रमेण तु वर्णतुरीयग्रहणे सति समुदायाभावादविषयत्वमन्त्याया बुद्धेः प्राप्नोतीति संहितासूत्रभाष्यविवरणे बहुधा विचारितम्। कृत्स्नमपि शब्दरूपं प्रकाशीकृतं यावदस्वीकृताकारमनुपगृहीतविशेषं बुद्धावसंनिविष्टं तावदनुपलब्धेनैव तेन व्यवहारो न कश्चिदपि प्रकल्पते॥८३॥[14]

टी०—स तु ध्वनिर्यथाभिव्यञ्जकः तत्र दर्शनभेदानाख्यातुकाम आह—स्फोटरूपाविभागेन इति। अविभक्त एव स्फोटाद् ध्वनिर्गृह्यते इत्येके। अगृह्यमाण एव ध्वनिरभिव्यञ्जक

१ द्वयोर्प्र०—क २, ख.

२ प्रकाशितः—क १.२.३.४.५। प्रकाशकः—का०.

३ इदं स्याद्वादरत्नाकरे (४।१०) संगृहीतम्।

४ आश्रयाभि० - घ, ङ.

५ रूपावधारणे—घ, ङ.

६ स्फोटस्य—ग २, घ, ङ. सोढत्वमेकबुद्धिविषयत्वमिति वाराणसेयसंग्रहे। सोढत्वं जितत्वं वशतामिति यावत् इति रामचन्द्रः।

७ आवृत्त्यां—घ, ङ.

८ प्रत्यावृत्त्या—घ, ङ, का०। प्रत्याव-

९ विद्यते—क १.४.५.७.

१० इदं स्याद्वादरत्नाकरे ४।१०॥) संगृहीतं व्याख्यातं च । मण्डनमिश्रेणापि स्वकृतौ स्फोटसिद्धावष्टादशश्लोकव्याख्यायां संगृहीतं व्याख्यातं च तट्टीकाकृता रामचन्द्राचार्येण ।

११ मन्त्या—घ, ङ.

१२ बुद्धि—घ २.

१३ संनिकृष्टे—घ ङ.

१४ इमं श्लोकं वादिदेवसूरिरित्थं व्याचष्टे—

यथा ह्यनुवाकः श्लोको वा पुनः पुनरावृत्त्या सुखेनावधारयितुं शक्यते। न च प्रत्या-

* १° द्यनुपाख्येया० घ, ङ.   * काष्ठादिकारणजन्यस्तु स्तम्भादिरित्यनयोर्भेदो व्यवस्थाप्यते तथेहापि ताल्वादिकारणजन्योयं

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥८४॥[1]

व्यक्तरूपग्रहणानुगुणा अनुपाख्येयाकारा[2] बहव उपायभूताः प्रत्यया ध्वनिभिः प्रकाश्यमाने शब्दे समुत्पद्यमानाः शब्दस्वरूपावग्रहहेतवो भवन्ति ॥८४॥[3]

(टी०) इत्यपरे । केवलोपि ध्वनिः स्वतन्त्रवत् भाव्यत इत्यपरे । **इन्द्रियगुणाः** इति । येषां दर्शनं भौतिकानीन्द्रियाणि इति । भौतिकत्वेपीन्द्रियाणां तत्तद्भूयस्त्वेन तदाश्रिता रूपादयः समानजातीयरूपादिग्रहणे हेतव इति । तदुक्तम् **भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धवत्त्वज्ञाने हेतुरिति ।** तत्र यथा घ्राणेन्द्रियस्य पृथिवीभूयिष्ठगन्धवत्त्वात्समवेतो गन्धस्तत्समवायिकारणमिन्द्रियमनुगृह्णन् गन्धोपलब्धेर्निमित्तम् । न च समवेतो गन्धः संवेद्यते । तथा ध्वनिरसंवेदित एवान्येनोपायेन स्फोटोपलब्धेर्निमित्तं भवतीति । **मरुषु** इति । मरुषु स्वल्पमपि द्रव्यं पर्वतपरिमाणं दृश्यते । **चन्द्रादीनां च** इति । महापरिमाणाश्चन्द्रमण्डलादयः श्रूयन्ते, अपचितपरिमाणाश्च दृश्यन्ते । तदेवं यथा देशविशेषसम्बन्धादाकारान्तरव्यवस्थितानामाकारान्तरेण ग्रहणं तथा स्फोटो विभक्तेन रूपेण स्थितः, आरूपेण परिच्छिद्यत इति ॥८२॥[4]

तत्र यद्येको ध्वनिस्तदभिव्यक्तिसमर्थो द्वितीयध्वन्युच्चारणानर्थक्यम् । अथान्त्यः सर्वेषामसामर्थ्यम् । अविशेषात् । स एककमुच्चार्यत इति समुदायोपि नास्तीति कथमभिव्यक्तिरित्याशङ्क्नेति । अथ चानेकावृत्तौ श्लोकाद्यवभासः स्पष्टः संवेद्यते तथैवायमपि शब्दात्मा पुनः पुनरभिव्यक्तस्फोटरूपोवधार्यते । न च प्रत्यभिव्यक्ति तत्रेदृशी बुद्धिरुपजायते इदं गृहीतमिदं नेति । अथवानेकाभिव्यक्तो स्फोटावभासः स्पष्टः संवेद्यते । सोढत्वमिति सोढुं शक्यत्वं बुद्ध्याक्रमणीयता स्वीकार्यत्वम् । येन स्वेच्छयेवासौ पठनीयो भवति । आवृत्त्येति जातावेकवचनम् । आवृत्तिरेकैकाप्युपयुज्यते, उत्तरोत्तरविशेषाधानाय । अन्यथैकावृत्त्यैव सोढता स्यादिति ।

१ इदमभिनवगुप्ताचार्येण ध्वन्यालोकटीकायां (१ । १६ ॥) संगृहीतम् । तत्र 'ग्रहणानुग्रहैः' इति पाठभेदः । स्याद्वादरत्नाकरेपि (४ । १० ॥) मण्डनमिश्रकृतौ स्फोटसिद्धौ चाष्टादशश्लोकव्याख्यायां यथातथमुदाहृतम् ।

३ अत्र श्लोके देवसूरिराह—

नादैरभिव्यज्यमाने हि स्फोटे ये ज्ञानविशेषा स्फोटग्रहणानुकूला इदं तदित्यव्यपदेश्यास्ते स्फोटरूपावसाये हेतुत्वमुपयान्ति इति ।

४ इमं श्लोकं वादिदेवसूरिरित्थं व्याचष्टे—ध्वनिग्रहणे च त्रयो वादाः—केचिच्छब्दरूपादविभक्तग्रहणं रूपादिवालोकं ध्वनिं मन्यन्ते । इन्द्रियवदसंवेद्यमन्ये । स्वतन्त्रमपि कतिपये । तथा हि । ताल्वादिकरणसन्निपातजनितध्वन्यभिव्यङ्ग्यस्फोटरूपादविभागेन ध्वनिरूपप्रतीतिरिति न ध्वनिर्नापि स्फोटः परस्परतो भेदेन ग्रहीतुं शक्यते । यथा प्रभाकरादिकारणजनितालोकाभिव्यङ्ग्यस्तम्भाम्भोरुहादिरूपादविभागेनालोकप्रतिपत्तिरिति नालोको नापि विषयरूपं परस्परतो विभागेन ग्रहीतुं पार्यते । यथा च प्रभाकरादिकारणजन्योयमालोकः काष्ठादिकारणजन्यस्तु स्तम्भादिरित्यनयोर्भेदो

* पुनः—यदा नाकारादिविशेषावगमः केवलरूपरूपायेतादिकरणे तदा स्वतन्त्रो ध्वनिः   * कृतौ स्फोटसिद्धावष्टादशश्लोकव्याख्यायां च संगृहीतम् ।

तत्र त्वयमाकारपरिग्रहक्रमः—

नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां[5] बुद्धौ शब्दोवधार्यते ॥८५॥[1]

आवृत्ति

(टी०) क्याह—**यथानुवाक** इति । **सोढत्वम्** इति । स्मृतिबुद्धेरेकस्या विषयभावम् । **बुद्धावेकस्यां** यद्रूपमारोहतीति तत्संगृह्यते । अस्योत्तरश्लोके तथेत्यनेन सम्बन्धः । तत्र श्लोकोपात्तं दृष्टान्तं विभज्य दार्ष्टान्तिकं भाष्ये विभजति—**वर्णपदे**ति । वर्णपदवाक्यस्फोटाभिव्यक्तिहेतुत्वाद् ध्वनयः तद्विषया उच्यन्ते । **आविर्भावयन्तः** इति । द्योतयन्तः । **अध्यारोपयन्ति** इति । बुद्धिविषयतां नयन्ति । भागशस्त्वभिव्यक्तावुत्पत्तौ च दोषं ददाति—**क्रमेण तु** इति । **वर्णतुरीयग्रहणे** इति । उत्पत्तिपक्षे तावद्वर्णविभागाः परमाणुकल्पाः क्रमोत्पन्ना अतीन्द्रिया एवेति समुदायाग्रहणान्निर्विषयत्वं सुगममेव ।

अथ निरवयववर्णपक्षः, वर्णभागानां चेन्द्रियगम्यत्वं स्यात् । तथापि तेषां क्रमोत्पादादनन्तरं विनष्टत्वाच्च समुदायभावस्मृतिरपि न । सति प्रत्येकमनुभवे समुदायस्मृत्ययोगात् । न चापि तेषां स्मृतिबीजाधाने शक्तिः, तद्विषयाणामपाटवादभ्यासाभावात् ।

अथापि निरवयववर्णा ध्वनिभिर्व्यज्यन्ते तथाप्यभिव्यञ्जकेन व्यङ्ग्यग्रहणादन्ते च तेषां समुदितानां व्यञ्जनानामभावात् कुतः सकलशब्दग्रहणम् । एवं भागवत्यपि स्फोटे भागशोऽभिव्यक्तौ वाच्यम् ।

अथापि पूर्वपूर्ववर्णोऽभिव्यक्तो उत्तरोत्तरस्मिन् वर्णे संस्कारमाधत्ते यावदन्त्यो वर्ण इति तदालम्बना बुद्धिः समस्तशब्दाकाराऽऽविर्भविष्यतीत्येतदपि नास्ति । यतोऽभिव्यक्तः संस्कारमाधत्ते । यदा च स उत्तरोऽनभिव्यक्तः तदा क संस्काराधानम् । यदा च स उत्तरोऽभिव्यज्यते तदा पूर्वोनभिव्यक्त इति कः संस्कारमादध्यात् । स्वाभिव्यक्तो संस्काराधानं नानभिव्यक्ते, नित्यत्वात् सर्वैः सर्वत्राधानप्रसङ्गात् ॥८३॥

ध्वनिर्नित्यस्त्वादकार्यश्च स्फोट इत्यनयोर्भेदोवस्थाप्यते न तु भेदेन ग्रहणम् । केवलमिदमेव संभवति आलोकपरिकल्पिता विषयप्रतिपत्तिर्ध्वनिविनिर्मिता तु स्फोटप्रतिपत्तिरित्येके । यथेन्द्रियं विषयप्रतीत्यन्यथानुपपत्त्यानुमेयं किमप्यस्तीति कार्यदर्शनादवस्थाप्यते तथा स्फोटोपलब्ध्यन्यथानुपपत्त्या ध्वनिः कश्चिदत्यन्तपरोक्षोस्ति करणव्यापारज इत्यनुमीयते । स्फोटस्तु शुद्ध उपलभ्यत इतीतरे । अन्ये पुनः—यदा नाकारादिविशेषावगमः केवलरूप- प्रतीयते । अकारादिव्यक्तवर्णप्रतीते तु स्फोटे संसृष्टः प्रतीयत इत्याहुः ॥

१ ग्रहः—ठ.

२ आवृत्तिपरि०—क १, ग १, वा० दे० सू०, कमलशीलः ।

३ इदं तत्त्वसंग्रहे ७२२ तमे पृष्ठे, तत्पाञ्जिकायां च ६३६ तमे पृष्ठे, स्याद्वादरत्नाकरे ४ । १० ॥ शेषकृष्णकृतौ स्फोटतत्त्वे नवमे दले पृष्ठप्रान्ते मण्डनमिश्रकृतौ स्फोटसिद्धावष्टादशश्लोकव्याख्यायां

* परिपाकः परिपाचनं यस्यामिति । आवृत्तेन * उपपद्यत इति ।

नादैः शब्दात्मानमवद्योतयद्भिर्यथोत्तरोत्कर्षेणाधीयन्ते व्यक्तपरिच्छेदानुगुणसंस्कारभावनाबीजानि । ततश्चान्त्यो ध्वनिविशेषः परिच्छेदसंस्कारभावनाबीजवृत्तिलाभप्राप्तयोग्यतापरिपाकायां बुद्धावुपग्रहेण शब्दस्वरूपाकारं संनिवेशयति ॥८५॥[3]

टी०—**अनुपाख्येयैः** इति । इदं तदिति तस्य बुद्ध्यारूढस्याख्यातुमशक्यत्वात् । **ग्रहणानुगुणैः** इति । ते प्रत्ययास्तस्य स्फोटस्याकारग्रहणानुरूपाः । के पुनस्ते प्रत्यया इत्याह—**ध्वनिप्रकाशिते** इति । ध्वनिभिः प्रकाशिते शब्दे य उत्पद्यन्तेऽन्तरालवर्तिनः ॥८४॥

नादैः इति । ध्वनिभिः । स्फोटमवद्योतयद्भिरिति शेषः । **आहितबीजायाम्** इति । बीजानि शक्तयः ता आधीयन्ते तस्यां शक्तिद्वारेण । **ध्वनिना सह** इति । तस्मिन्काले शब्दोऽवधार्येत इति सम्बन्धः । **आवृत्तपरिपाकायाम्** इति । आवृत्तः परिपाको यस्या इति । परिपाकः कार्योत्पादनं प्रति विशिष्ट आत्मलाभः । स च बीजानामपि वर्तते । सह संनिधानात् । यतः प्रतिध्वनिविभागं विशेषप्रतिपत्तेः तस्य वृत्तिलाभः, अन्त्यध्वनिकाले चावस्थानात्कालान्तरावभासोऽप्यस्ति । स तु बीजानामपि परिपाको बुद्धेरव्यतिरेकाद् बीजानाम् बुद्धेरेव संबन्धित्वेनोपात्तः, न तु बुद्धेः परिपाकः । आवृत्तः परिपाको यस्यामिति विग्रहः । **व्यक्तपरिच्छेदेति** । व्यक्तपरिच्छेदो विशिष्टस्वरूपावधारणम् । व्यक्तस्य परिच्छेदः । **संस्कारभावनेति** । शक्तय एवाधीयन्ते तास्तु संस्कारादिभिरुच्यन्ते । तथा हि । शक्तयश्चेतः संस्कुर्वन्ति विशिष्टं जनयन्तीति संस्कारशब्दोक्ताः । तद्रूपभावनं च भावना । यतश्चेतनेनाकारेण भावयन्ति विशिष्टोत्तरबुद्धिजनकत्वेन बीजानि, तेन संस्कारश्चासौ भावना च बीजं चेति समानाधिकरणसमासः । **परिच्छेदेति** । स्फोटपरिच्छेदोपायाः संस्कारादयः ।

१ °णाभिधीयते —घ, ङ.

२–२ बीजानि—भावना इत्युपेक्षितम् ।

३ इदं स्फोटसिद्धिव्याख्यायां गोपालिकायां रामचन्द्राचार्येणेत्थं व्याख्यायि—

नादैर्ध्वनिभिराहितबीजायाम् । आहितं भावनाबीजं यस्यां सा तथोक्ता । आवृत्तपरिपाकायाम् इति । आवृत्तोऽभ्यस्तः परिपाको यस्यास्सा तथोक्ता । प्रथमेन ध्वनिना किञ्चिद्भावनाबीजमाहितं तेन च कश्चित् परिपाकः कार्यजननशक्तिविशेषः । एवं द्वितीयेनेति । यद्यपि परिपाका भिन्नास्तथापि जातिमाश्रित्यावृत्तवाचोयुक्तिः । अष्टकृत्वो ब्राह्मणा भुक्तवन्त इतिवत् । आवृत्तेत्यस्यान्या व्याख्या—आवृत्तोऽवधारणविघ्नभूतस्य रागादिकषायस्य बावृत्त्या कषायपरिपाको यस्यामिति । कचिरवावृत्तीति पाठः । बुद्धावन्तःकरणे शब्दोवधार्यते । अन्त्येन ध्वनिना सह । यदान्त्यो ध्वनिरवधार्यते तदा गौरित्येवं शब्दोऽप्यवधार्येत इत्यर्थः । अवधारणापरपर्यायं ज्ञानमपि बुद्ध्याख्यान्तःकरणाधिकरणमिति सांख्या मन्यन्ते । एतच्चावधारणं चित्रबुद्धिरिति वार्तिककारीया मन्यन्ते ।

अथ वान्त्येन ध्वनिना सह पूर्वनादैराहितबीजायां बुद्धौ पश्चिमध्वन्यनन्तरं शब्दोवधार्यते गौरित्येकं पदमिति । यदवधारणं समस्तवर्णविषयं स्मरणमित्याचक्षते । परमार्थतस्तु प्रत्यक्षज्ञानमेवैतत् । ध्वनिसंस्कृतश्रोत्रेन्द्रियजनितत्वात् । न ह्यन्यथा स्फुटप्रकाश

असतश्चान्तराले याञ्छब्दानस्तीति मन्यते ।
प्रतिपत्तुरशक्तिः सा ग्रहणोपाय एव सः ॥८६॥[2]

इह निर्भागेष्वपूर्वापरेष्वक्रमेषु वर्णपदवाक्येषु ध्वनिनाभिव्यज्यमानेषु वर्णे तावद्वर्णावयवग्रहणसरूपा भागाभिनिवेशिन्य इव बुद्धय उपजायन्ते, पदे वर्णग्रहणसरूपा, वाक्ये पदग्रहणसरूपाः । ताभिश्च बुद्धिभिरुपलब्धारो भागभूतानसतः शब्दानस्तित्वेनाभिमन्यन्ते । सा खलु परैः[3]प्रदर्शितविषयग्राहिणामशक्तिः प्रतिपत्तॄणाम्[4] । तथाभूतोपायक्रमवर्णान्तरसाध्यमेव हि तेषां शब्ददर्शनम् । निष्क्रमं तु दाशतयमप्युपायान्तरेण प्रतिपद्यन्ते प्रतिपादयन्ति च ॥८६॥[5]

(टी०) तेषां वृत्तिलाभो विशिष्टकार्योन्मुखता । **प्राप्तेति** । योग्यतैवात्र परिपाकः । स प्राप्तो यया । स्फोटपरिच्छेदसमर्थेति यावत् ॥८५॥

यदि ध्वनिभागाः प्रत्येकं कृत्स्नमेव शब्दमभिव्यञ्जयन्ति कथमन्तराले समस्तशब्दग्रहणमित्याह—**असतश्च** इति । **अन्तराले** इति । स्पष्टशब्दग्रहणादर्वाक् । **अशक्तिः** इति । तेभ्यः [शब्देभ्यः] अक्रमं स्फोटमवधारयितुं ध्वनिव्यतिरेकेणाक्षमाः । तत्संसर्गाच्चान्तराले प्रतिपत्तॄणां शब्दाभिमानः । ये तु व्युत्पन्नाः ते तस्मादेव प्रतिपद्यन्त इत्याह—**ग्रहणोपायः** इति । **भागाभिनिवेशिन्य इव** इति । इवग्रहणं भागानामभिनिवेशस्यासत्यत्वात् । यद्यपि च न वर्णभागाः केचन सन्ति यैः सारूप्यम् । तथापि सरूपग्रहणं सन्तो भागा इव दृश्यन्त इति तन्त्रे प्रतिपादनार्थम् । अन्यथा वर्णेष्ववयवसरूपेत्येवं वाच्यं स्यात् । यथा पदे वर्णग्रहणसरूपेति वक्ष्यति । **परप्रदर्शितेति** । परैः ध्वनिभिः व्यञ्जकैरुपदर्शितं व्यक्तं विषयं स्फोटं ये ग्रहीतुं समर्थाः । अन्येन वा प्रदर्श्यमानविषयमिति नान्येन प्रकारेण ये प्रतिपद्यन्ते । **उपायान्तरेण** इति । विना क्रमेणोच्चारणेन ये ध्वनीनभिव्यञ्जकान्विना उपायान्तरेण

१ °न्नास्तीति—क ३.४.५, ख, घ, ङ.

२ इदं स्याद्वादरत्नाकरे (४ । १० ॥) संगृहीतम् । तत्र यच्छब्दान्. तद्ग्रहोपाय इति पाठान्तरे । एवं पठ्यमानं साधीयः प्रतिभातीति नागोचरं विदुषाम् । मण्डनमिश्रकृतौ स्फोटसिद्धावप्येकविंशश्लोकव्याख्यायामिदं संगृहीतं व्याख्यातं च । तत्र यच्छब्दो नास्तीति इति पाठः ।

३ फले दर्शित°—घ, ङ .

फलप्रदर्शित°—ठ.

टीका त्वनुसृता ।

४ प्रतिवक्तॄणाम्—ठ.

५ अत्रैतच्छ्लोकस्य देवसूरिकृता व्याख्या लिख्यते—

शब्दान्वर्णादिभागरूपानुच्चारणान्तराले यदक्रमस्य भागाभावादसत एवास्तीत्यस्तित्वेन सत्तया मन्यते सा प्रतिपत्तुरनंशवर्णावधारणाक्षमता । न च भ्रान्तिज्ञानमपि सत्यशब्देनोपयुज्यतेऽपि तु तत्साक्षात्कारोपाय एवैष इति । न च भागावभासिन्यो मिथ्याबुद्धयः कथं सत्यस्फोटपरिच्छित्तिहेतव इति वक्तव्यम् । आराद्वनस्पतौ हस्तिप्रत्ययप्रवाहस्य सत्यवनस्पतितत्त्वे प्रतीतिहेतुत्वदर्शनात् । तत्सिद्धमन्योन्यमत्यन्तविलक्षणा एते नानाप्रकाराः पृथक्पृथग्विपयास्त्रयोऽप्यविद्योपदर्शितालीकावयवा वर्णपदवाक्यव्यपदेश्याः स्फोटा निरवयवा इति ॥

"मनस्त्व सविता वाक् सावित्री, यत्र ह्येव मनस्तद्वाग् यत्र वै वाक् तन्मन इत्येते द्वे योनी एकं मिथुनम्" (गोपथ ब्राह्मण P. 25. 12) 1.32-33

भेदानुकारो ज्ञानस्य वाचश्चोपप्लवो ध्रुवः ।
क्रमोपसृष्टरूपा वाग् ज्ञानं ज्ञेयव्यपाश्रयम् ॥८७॥[४]

अभिन्नमपि[५] ज्ञानमरूपं सर्वज्ञेयरूपोपग्राहित्वाद्भेदरूपतया प्रत्यवभासते । पञ्च वृक्षा विंशतिर्गाव इति । संहृतसर्वबीजश्चायमान्तरः शब्दात्मा व्यञ्जकध्वनिभेदक्रमानुकारेणाविर्भावकाले प्रत्यवभासते । तेन चान्यभेदरूपोपग्रहेणोपप्लुतं शब्दतत्त्वमेवेदं वाङ्मनसाख्यमविभागमन्यथा प्रतीयत इति । एवं ह्याह—

(टी०) त्वर्पेण ज्ञानेन पश्यन्ति । आराधिताश्च परप्रदर्शनेन परान् प्रतिपादयन्ति । सर्वत्र क्रममन्तरेण नास्ति ग्रहणमिति मन्यमानस्येदमुपायान्तरकथनेन व्यभिचाराख्यानं कथमस्य रूपमन्येनोपगृह्यत इति दर्शनाय ॥८६॥ * अत्र स्याद्वादरत्नाकरे (४।१०॥)
* श्लोकव्याख्यायां वृषभो हरिनाक्यं पठति ।

पञ्च वृक्षाः इति । परस्परतो भिन्नाकाराः पञ्च वृक्षा एकया बुद्ध्या परिच्छिद्यन्ते ।

१. भेदानुकार इति रामचन्द्राचार्य्य एवं व्याचष्टे—

तत्र ज्ञाने तावदाकारभेदानुकारो ज्ञेयगतस्याकारभेदस्य ज्ञानेपि कल्पना । वासनागतस्य वा नीलपीतादिरूपभेदस्य ज्ञानेऽध्यारोपः । एवं भेदकर्मकोनुकारो भेदानुकार इति व्याख्यातम् । भेदकर्तृको वा भेदानुकारः । यथा किलाकारभेदो ज्ञेयस्थतया वासनास्थतया वा प्रतिभासते तथा ज्ञानधर्मतयापि भासत इत्यस्ति भेदस्यानुकर्तृत्वम् । अनुकारशब्दार्थस्तु कैश्चित्स्वैरन्यधर्मैरन्यत्रातात्त्विकस्तत्त्वेनानुकृतिः, तद्धर्मवत्क्रियानुकारस्तद्धर्मतया भानमिति यावत् । असंनिहितस्य वा धर्मस्य समीपे कृतिरनुकारः । अन्यधर्मस्यान्यत्र समारोप इति यावत् । अथवा कृभ्वस्तयः सामान्यवचना इति कृञो गमेरर्थो विवक्षितः । तथा चानुकारोनुगम एव परामर्शसाहित्यापरनामा इति ।

स्फोटविषये पूर्वपक्षयता देवसूरिणा यदुक्तं तत्प्रकृतोपयोगीत्युपन्यस्यते—

अस्य च स्फोटस्य संव्यवहारक्रमेऽभिव्यञ्जकक्रमानुवर्तनादिव यः क्रमरूपावसाय उपप्लवोपगमनादिभ्रान्तिरूपः । अयमेव व्यवहारस्य निमित्तम् । अत एवायमतिदार्ढ्यं गतोऽशक्यापनयनः । यथा ज्ञानस्याभिन्नस्याववोधमात्रात्मकस्य नीरूपस्यानवयवत्वेपि सर्वज्ञेयरूपोपग्राहित्वाद्भेदरूपेणावभासः पञ्च वृक्षा विंशतिर्गाव इति । यथा चेतनं ज्ञेयरूपावग्रहणेनात्मभूतेन विना व्यवहारेऽवतारयितुं न शक्यते तथा स्फोटेनापि नालब्धक्रमेण कश्चिदर्थोऽभिधातुं शक्यः ।

अत्रेदमवधेयम्—यथा ज्ञानस्येत्यादीन्यक्षराणीहस्थेन वृत्तिसन्दर्भेण नितान्तं संवादीनि ।

२ वाचकोप०—क १.४.५.७, घ, ङ.

३ °रूपाया—क २, ख, का०.

४ इदं मण्डनमिश्रकृतौ स्फोटसिद्धावेकविंशश्लोकव्याख्यायां संगृहीतम् । *

५ °मविज्ञान०—घ, ङ.

६ ग्राहि तद्भेद—घ १, ङ .

ग्राहित्वात्तद्भेद०—घ २.

७ ग्रहणो०—कोशः .

८ मेवमवाङ्०—घ,ङ । मेवेदं वाङ्—ठ.

* ९ व्यप्रविभागम्—इत्येवं ११२ तम-

* यश्शब्द इति । यः प्रतिपत्ताऽसतोऽन्तराले गकारादिषु प्रतीयमानेषु तद्व्यतिरिक्तः शब्दो * अत्यन्तविलक्षणा या गृहीतिः ।

ज्ञेयेन न विना ज्ञानं व्यवहारेऽवतिष्ठते ।
नालब्धक्रमया वाचा कश्चिदर्थोऽभिधीयते ॥८७॥[१]

यथाद्यसंख्याग्रहणमुपायः प्रतिपत्तये ।
संख्यान्तराणां भेदेपि तथा शब्दान्तरश्रुतिः ॥८८॥[२]

यथा शतसंख्यां सहस्रसंख्यां वा भेदिकामाश्रयस्य प्रतिपित्समानः तदुपायभूतानेकत्वादीन् भिन्नकार्याञ्शतादीनामवयवानिव प्रतिपद्यते, तथा देवदत्तादिशब्दान्तरश्रुतिपरिच्छेदोपाया वाक्यरूपप्रतिपत्तिरिति नान्तरीयकं तासामुपादानम् ॥८८॥[४]

(टी०) यदा न विषयरूपबुद्धिर्वस्तुनः, प्रतिपद्यन्ते तदा पञ्च बुद्धयः । ततश्च प्रचितवस्तुप्रत्यवमर्शाभावः । अथैकत्वबुद्धिस्तानेकतया गृह्णाति, वनादिविभागाप्रतिपत्तिः । अतो बुद्धिरभिन्नापि विषयभेदमनुकरोति । अन्यभेदेपि । अन्यस्य विषयस्य यद्भेदरूपं तदुपग्रहेण । ज्ञेयेन न विना इति । न ज्ञेयरूपोपरागमन्तरेण ज्ञानेन शुद्धेन व्यवह्रियते ॥८७॥

कथमत्यन्तविलक्षणप्रतिपत्त्युपाय इत्याह—यथाद्यसंख्या इति । यथान्येषां संख्याभेदानामर्थान्तरभूता आद्या पूर्वा संख्या ग्रहणोपायः, भेदेपीति वैलक्षण्येपि तथा देवदत्तादिश्रुतिर्वाक्यप्रतिपत्ताविति । भेदिकाम् इति । व्यवच्छेदिकाम् । भेदापोद्धारविलक्षणत्वात्संख्या स्वाश्रयमाश्रयान्तरेभ्यो भिनत्ति एको द्वाविति । भिन्नकार्यान् इति । कार्यभेदेन वैलक्षण्यमाह । स्वानुरूपाभिधानप्रत्ययौ

misplaced note: this should be on p. 86

१ अथैतस्य रामचन्द्राचार्य्यकृता व्याख्या संक्षिप्योपन्यस्यते—

असतश्च इति । अन्तराल इति विवक्षया गौरित्येकं पदमिति ज्ञानस्य च मध्य इत्यर्थः । यच्छब्दम् इति पाठः । परमार्थतोऽसतो गकारादेरन्तराले शाब्दं परमार्थशब्दविषयं ज्ञानमुदीयमानं नास्तीति लौकिकः प्रतिपत्ता मन्यत इति यत् वर्णग्रहणं च यदभिमन्यते सा प्रतिपत्तुरशक्तिरेव । अविवक्षाशास्कर्तुमशक्तिरेव । अशक्तिकृतमित्यर्थः । कार्ये कारणोपचारः । तथापि कथं नियमः । अत आह—ग्रहणोपाय एव स इति । निरवयवविषयं ज्ञानं नास्ति गकाराद्येव प्रतीयत इति योभिमानः स तत्त्वग्रहणाभ्युपाय एव । नानुपायः । स एव वा तत्त्वग्रहणोपाय इति । काचित्पाठः—यश्शब्द इति । यः प्रतिपत्ताऽसतोन्तराल

नास्तीति मन्यते तस्य प्रतिपत्तुरशक्तिरसेति पूर्ववत् । अन्य पाठः । यान् शब्दानस्तीति विवक्षातः प्रभृत्येकपदज्ञानात्प्रागन्तराले यान् सतः शब्दानस्तीति प्रतिपत्ता मन्यते । उद्देश्यैः शब्दैरस्तीति मननस्य प्रत्येकसम्बन्धादस्तीति । एकवचनप्रयोगः । अस्तिक्षीरासमासवदस्तीत्यव्ययं वा । तेन सन्त इत्यर्थः ।

२ इति वादिदेवसूरिणा स्याद्वादरत्नाकरे (४।१०) संगृहीतं व्याख्यातं च ।

३ तेषामु°—ठ.

४ अत्र श्लोके देवसूरिराह—

यथा शतादिसंख्याग्रहणे एकादिसंख्या [उपायः] । शतादिसंख्या हि प्रकारान्तरेण ग्रहीतुमशक्यस्वाजिघृक्षायामेकादिसंख्या तद्ग्रहणोपायभूता प्रथमं गृह्यते, ततः शतादिसंख्याया अत्यन्तवि[लक्ष]णा या गृहीतिः ।

* ६ शेषमा° — कोशः. प्रमाद एवायम् ।
७ प्राविविक्त — घ, ङ.

* मिश्रीभूता इव भान्ति शक्तय इति ।

प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये ।
तेषामत्यन्तभेदेऽपि संकीर्णा इव शक्तयः ॥८९॥[3]

वर्णपदवाक्यविषया हि विशिष्टाः प्रयत्नास्तत्प्रेरिताश्च वायवः स्थानान्यभिघ्नन्ति । स्थानाभिघातप्राप्तसंस्काराश्च ध्वनयो यद्यपि परस्परं[4]व्यावृत्तस्वभावास्तथापि गोगवयजात्युपव्यञ्जनवद्[5] भ्रमणरेचनादिकर्मसामान्यविशेषाश्रयवच्च तेषामुपव्यञ्जनानां दुर्ज्ञानो भेदः । सामान्यमात्रया कयाचिदनुगतः [7]प्रविभक्तकार्याणामपि शक्तीनामात्मा कुतश्चित्कार्यविशेषात्संकरेणैवा[8]ऽवस्थितः । ततश्चायं निरवयवेषु वर्णेषु मात्राविभागाध्यवसायः, पदेषु च वर्णविभागाध्यवसायः, वाक्येषु च पदविभागाध्यवसाय इति ॥[10]८९॥

(टी०) कार्यतश्च भिद्यन्ते । अवयवान् इव इति — एकत्वादिसङ्घातमिव पश्यति । वैशेषिकदर्शनसमाश्रयेण चेह दृष्टान्तः । यतो व्यावृत्तलक्षणाः परस्परतः संख्या इति । तथा देवदत्तादीति । देवदत्त गामभ्याजेत्यन्ते वाक्ये वाक्याभिन्नलक्षणानि देवदत्तादिपदानि वाक्योपायभूतानीति ॥८८॥

भवन्तु नाम ध्वनयस्तस्य प्रतिपत्तावुपायः । ते त्वत्यन्तविलक्षणास्तमात्मरूपनिवेशनेन कथं गमयन्ति । न हि धूमोऽग्निं प्रतिपादयन् धूमरूपतां तमापाद्य प्रतिपादयति इत्याशङ्क्याह — प्रत्येकम् इति । संकीर्णा इव इति । तस्य भेदस्यानवबोधादेकरूपा इव । तत्प्रेरिताः इति । विशिष्टा इत्यनुवर्तते । व्यावृत्तस्वभावाः इति । कारणभेदेन ध्वनीनां भेदमाह । तथापि तेषामुपव्यञ्जनानां ध्वनीनां दुर्ज्ञानो भेद इति सम्बन्धः । तत्र दृष्टान्तमाह — गोगवयजातीति । यथा गोगवयजात्युपव्यञ्जनानां पिण्डावयवानां संस्थानस्य, संयोगविभागानां वात्यन्तभेदात्सत्यप्यनुगमभावे दुर्ज्ञानत्वाद्भेदस्य भवति सदृशप्रत्ययः । पिण्डयोरनेकावयवत्वे संभाव्येताप्यवयवानुषङ्ग इत्याह — भ्रमणरेचनादीति । भ्रमणरेचनं कर्म तदेव स्वस्य सामान्यविशेषस्याश्रयस्यापि संभवतीत्येवं विशेषितम् । यथा भ्रमणरेचनक्षणयोर्भिन्नाभिन्नसामान्यान्वितयोरपि दुर्ज्ञानो भेद इति । ततः किमित्याह — प्रविभक्तकार्याणाम् इति । वर्णजन्याभिव्यक्तिः कार्यं, तच्च तेषां ध्वनीनां विभक्तम् । कार्यविशेषात् इति । वर्णाद्यभिव्यक्तेरन्यत्प्रत्ययाभेदलक्षणं कार्यम् । संकरेणैव इति । सादृश्यकल्पनया गौरित्येतदभिव्यञ्जके ध्वनौ गकारस्फोटव्यञ्जकध्वनिमुत्प्रेक्ष्य गकारं तत्र व्यज्यमानं पश्यन्ति । अतो गकारादिवर्णरूपाविभागेन स्फोटमवस्यन्ति । तथा गामभ्याजेति वाक्यव्यञ्जके ध्वनौ गोस्फोटव्यञ्जकध्वनिशक्तिमध्या-

१ वर्णा — का०. प्रमादपाठितोपपाठः.
२ प्रकीर्णा — क १.२.३.४.५.७, ख.
३ इदं स्याद्वादरत्नाकरे (४।१०॥) संगृहीतं व्याख्यातं च ।
४ परस्परा° — घ २. अपपाठः
५ वद् इति नास्ति — घ,ङ. अपेक्ष्यते च ।
६ शेषमा° — कोशः प्रमाद एवायम् ।
८ संकरेण वा — कोशः.
९ गाद् व्यवसायाः — घ १, ङ । गस्ववसायाः — घ २. उभयमप्यसाधु ।
१० अत्र श्लोके देवसूरिराह — तेषाम् इति । ये व्यञ्जका ध्वनयोऽन्योन्यव्यावृत्तास्तेषामत्यन्तविजातीयत्वाद्भेदेऽपि मिश्रीभूता इव भान्ति शक्तय इति ।

* यथा च दूरदेशे समन्धकारे वा विषयं प्रतिपद्यते विरलं घनरूपत्वेनाकृष्णं कृष्ण-

* १० इत्यतोऽनन्तरं 'पूर्वं' इत्यधिकं वाराणसेयसंग्रहे ।

यथैव दर्शनैः पूर्वैर्दूरात्सन्तमसेऽपि वा ।
अन्यथाकृत्य विषयमन्यथैवाध्यवस्यति ॥९०॥[2]

यथा विषयेन्द्रियधर्म एवायं प्राकृतचक्षुषां दूराद् आकृतिमात्रोपलब्धौ वृक्षादीन्हस्त्यादिवत्प्रतिपद्यन्ते । तद्देशावस्थिता एव [4]प्रणिधानाभ्यासात् क्रमेण पुनर्यथावयवमुपलभन्ते । व्यक्तालोकाच्च देशात् सहसा मन्दसंनिविष्टप्रकाशान् [5]अपवरकादीन् प्रविश्य रज्ज्वादीन् सर्पादिवत्प्रतिपद्य तथैव प्रणिधानाभ्यासाच्चक्षुषि प्रकृतिस्थे यथावदुपलभन्ते ॥[6]९०॥

व्यज्यमाने तथा वाक्ये वाक्याभिव्यक्तिहेतुभिः ।
भागावग्रहरूपेण पूर्वं बुद्धिः प्रवर्तते ॥९१[8]॥

वाक्ये हि निर्भागे तदभिव्यक्तिविषयैः प्रयत्नविशेषैः [9]समुत्थाप्यमाना ध्वनयः सत्यपि भेदे सामान्यशक्तिसमन्वयाद्वर्णपदप्रत्ययभासभागावग्रहरूपां बुद्धिं

(टी०) गोव्य तत्र पदाध्यवसाय इति । मात्राविभागेति । ह्रस्वाद्यवसायः । अयं हि शक्तीनां संकरो यत्पदव्यञ्जकशक्तिं वर्णव्यञ्जिकामपि कल्पयन्ति । तत्कल्पनावशाच्च वर्णव्यञ्जका एव संहताः पदव्यञ्जकाः, ते संहता वाक्यव्यञ्जका इति विपर्यस्यति ॥८९॥

कथमतद्रूपस्तदाऽवसीयते । निदर्शनेऽपि चैतच्चिन्त्यमेवेत्यत्यन्तप्रसिद्धं प्रतिपाद्यनिदर्शनमाह — यथैव इति । व्यज्यमाने तथेत्युत्तरश्लोके सम्बन्धः । अन्यथाकृत्य इति । अन्यथा कृत्यं कार्यमस्य विषयस्य सोऽन्यथाकृत्यो विषयः स्वाकारानुकारिप्रत्ययजननसमर्थः । अथवाऽन्यथाकृत्य परिच्छिद्य । तद्देशावस्थिता इति । दूरदेशावस्थिता एव । प्रणिधानाभ्यासात् इति । यत्नात्तत्रैवेन्द्रियोपसंहारः प्रणिधानं तस्य पौनःपुन्यमभ्यासः । तथैव इति । क्रमेणेत्यनेन सम्बन्धः । प्रकृतिस्थे उत्पाताहितविकारविगमात् ॥९०॥

१ न्यथैव व्यवस्यति — क१.४.५.७ । अन्यथैव प्रपद्यते — दे० सू० ।
२ इदं स्याद्वादरत्नाकरे (४।१०॥) संगृहीतं व्याख्यातं च । मण्डनमिश्रकृतौ स्फोटसिद्धौ चैकोनविंशश्लोकव्याख्यायां यथातथमुदाहृतम् ।
३ दूरादन्धकारे वा — का०.
४ प्रणिधानाक्रमेण — घ १ । ट ठ इति कोशयोर्ग्रन्थपातः तथैवेतिपदं यावत् ।
५ नरकादीन् — घ, ङ.
६ अत्र श्लोके देवसूरिराह — यथा च दूरदेशे समन्धकारे वा विषयं
रूपतया । तथामून्स्फोटानपि निर्भागावाद्यैरभिव्यज्यमानान् भागावग्रहरूपेणाध्यवस्यति ।
७ पूर्वं — क१.२.३.४.५.७, ख.
८ इदं वादिदेवसूरिणा स्याद्वादरत्नाकरे (४।१०॥) संगृहीतं व्याख्यातं च । मण्डनमिश्रेणापि स्वकृतौ स्फोटसिद्धाविदं संगृहीतं विवृतश्चैकोनविंशश्लोकव्याख्यायाम् ।
९ संस्थाप्यमाना — घ, ङ.
१० [illegible]

* ६ युक्ता इति नास्ति — ठ. * बुद्धिवस्तुनः क्रमितया भाव्यमित्येवम-
पराधद्गण्ज्व्यवस्था युक्तेति ।

प्रवर्तयन्ति ॥[७]९१॥

यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तॄणां नियतो बुद्धिषु क्रमः ॥९२॥[३]

यथा क्षीरमुत्पत्तिपक्षेऽभिव्यक्तिपक्षे वा सर्पिरादिविकारप्रयुक्तं नियतरूपैर्मण्डकादिभिरवस्थाविशेषैर्विशिष्टसंविज्ञानपदनिबन्धनैरसंविज्ञानपदैश्च युज्यमानं यथायथं प्रकृतिधर्मप्रत्यासत्तिमनुवर्तमानमन्यतमानुपूर्वीनियमानतिक्रमेण प्रयोजिकां विकारशक्तिं प्रदर्शयति । शाल्यादिबीजं च तण्डुलादिप्रधानविकारप्रयुक्तं नान्तरीयकैर्नालाङ्कुरादिभिरवस्थाविशेषैर्युज्यमानं प्रयोजकेन प्रधानविकारधर्मेण प्रत्यवभासते । तथैवार्वाग्दर्शनानां प्रतिपत्तॄणां वाक्यस्वरूपग्रहणपूर्वकेण वाक्यार्थग्रहणेन प्रधानेन प्रयुक्तानां नियतोपाये साध्ये तस्मिन्नर्थे नियतक्रमपरिणामभागाकारप्रत्यवभासमात्रायुक्ता बुद्धयः प्रवर्तन्ते स्फोटेषु ॥९२॥[७]

टी०—वाक्ये इति । तस्यैव वाचकत्वं वक्ष्यति । प्रयत्नविशेषैः इति । ध्वनीनां विशिष्टतया विशिष्टग्रहणमेव युक्तं मन्यन्ते ॥९१॥

यदि तत्त्वेनासत्या एव भावाः कल्प्यन्ते, कल्पनाया अनियतत्वान्नियतौ रूपक्रमौ किंकृतौ । तथा हि । दूरतरे वृक्षं कश्चिद्वस्तीत्यपरो वल्मीक इति कल्पयति इत्यनियतः क्रम इत्याशङ्क्याह—**यथानुपूर्वी** इति । **सर्पिरादीति** । प्रधानं कार्यस्यात्मलाभाय कारणानि प्रयुङ्क्ते । **संविज्ञानपदनिबन्धनैः** इति । एतान्येव मण्डकादीनि तेषामवस्थाविशेषाणां पदानि । एतेषामेव च येऽन्तरालविभागाः सूक्ष्मा अवस्थाविशेषाः, न तेषां वाचकोस्तीत्यसंविज्ञानपदाः । **प्रकृतिधर्मेति** । विलक्षणकार्योत्पादेपि स्वजात्यनतिक्रमात् । पूर्वस्या वा प्रकृतेर्यो धर्मस्तमनुवर्तते । **प्रधानविकारेति** । प्रधानं विकारस्तण्डुला एव परिणामरूपतया धर्मत्वेन बीजस्योक्ताः । **प्रत्यवभासते** इति । तथा परिणामात् । **नियतक्रमेति** ।

१ अत्र वाराणसेयसंग्रहे – ततः प्रणिधानादिना वास्तवमखण्डमेव बुद्ध्या विषयीकुर्वन्ति—इत्यधिकं पठ्यते ।

२ अत्र श्लोके देवसूरिराह—

वाक्ये इति । वाक्यस्यैव व्यवहारोपयोगित्वेन प्राधान्यान्निर्देशः । पूर्वमिति । प्रथमं वर्णपदभागावग्राहिणी बुद्धिः प्रवर्तत इति ।

३ इत्युदाहृतं व्याख्यातं च स्याद्वादरत्नाकरे (४।१०।।) इति सूत्रे । श्रीमण्डनमिश्रेणापि स्फोटसिद्धावेकविंशश्लोकव्याख्यायां संगृहीतम् ।

४ मण्डकनिलीनकोत्तरकरवैर°—का०,

५ विज्ञातं—घ१, ङ.

७ अत्र देवसूरिकृतं तच्छ्लोकव्याख्या लिख्यते—

नियताश्च पदार्थानां शक्तयः । तेन तेऽन्यथाकरणेऽत्यन्तमसमर्थाः । यथा हि क्षीरस्य विकारे दध्यादौ, बीजस्य यवनालादौ न शक्यते राज्ञापि प्रथमा उत्तरा कारयितुमुत्तरा वा प्रथमा । अपि तु तयोर्विकारे नियतैवानुपूर्वी प्रथममिदमुत्तरं तत इति । तथैव प्रतिपत्तॄणामपि बुद्धिषु सदैव नियतः क्रमः । ततो बुद्धिक्रममन्तरेण स्फोटप्रतिपत्तौ प्रतिपत्तॄणामशक्यत्वात् न तस्य शब्दात्मनोऽशक्ययापि बुद्धिवस्तुनः क्रमितया भाव्यमित्येवम-

* ४ पदस्वरूपा°—का. * ८ तदनन्तरेषु श्लोकेषु — ठ.
५ -पात्यन्तस्वव्यक्त— घ, ङ. ९ दर्शितम् — ठ.

भागवत्स्वपि तेष्वेवं रूपभेदो ध्वनेः क्रमात् ।
निर्भागेष्वभ्युपायो वा भागभेदप्रकल्पनम् ॥९३॥

येपि भेदवादिनो गौरिति गकारौकारविसर्जनीयमात्रमेव प्रतिपन्नाः, नान्यस्तद्व्यतिरिक्तो वर्णरूपग्रहणोपायग्राह्यो निर्भागः शब्दात्मा विद्यते इति मन्यन्ते नित्यत्वं च शब्दानामभ्युपगच्छन्ति, तेषां क्रमेणाव्यपदेश्यवर्णतुरीयांशाभिव्यक्तौ स्वरूपानवधारणमविषयत्वं चान्त्यस्य व्यक्तरूपोपग्राहिणः परिच्छेदस्य प्रसज्यते । यौगपद्येन तु सर्वावयवाभिव्यक्तौ श्रुत्यविशेषप्रसङ्गो गवे इति च वेग इति च, तेन इति च न ते इति च । तत्र शब्दान्तरेर्थान्तरसम्बन्धिनि नैवायं दोषः । तस्मिन्नपि तु शब्देऽभिव्यञ्जकध्वनिक्रमकृता भेदेन प्रतिपत्तिः । दृष्टो हि मण्डूकादिवसासम्बद्धप्रदीपाभिव्यक्तेषु रज्ज्वादिषु सर्पादिप्रतिपत्तिभेदः ।

निर्भागेषु वा भागभेदप्रकल्पनाकृतशक्तिविशेषपरिग्रहा बुद्धयो यथोपायत्वं प्रतिपद्यन्ते तदनन्तरश्लोकेषु वर्णितम् ॥९३॥

(टी०) नियतः क्रमो यस्य तस्य ये भागास्तदाकारप्रत्यवभासाः त एव मात्राः ताभिर्युक्ताः ॥९२॥

भागवत्सु इति । ये भागवन्तं स्फोटमास्थिताः । **रूपभेदः** इति । **स्वभावभेदः** भागाख्यं इति । अभिव्यञ्जकान्त्यध्वनयः क्रमवत्कारणजाः तेषां क्रमानुरूपमेवाभिव्यक्तिं कुर्वन्ति इति दोषदर्शनात् पक्षान्तरमाह—**उपायो वा** इति । तत्रापि ध्वनिभेद एवोपाय इति । **नित्यत्वं च** इति । कार्यपक्षेभिव्यक्त्यभावात्कस्य ध्वनिकृतो भेदः । **अव्यपदेश्येति** । अपकर्षकाष्ठागतत्वात् ध्वनिभागेषु न व्यपदेशः । **अविषयत्वं च** इति । निरवयववर्णाभिव्यक्तावपि साकल्याभावादुपव्यञ्जकानां तदानीमविषयत्वं व्याख्यातम् ।

अथ नित्यत्वाद्यौगपद्येन स्थितानां यौगपद्येनैकैको ध्वनिरुत्तरोत्कर्षेणाभिव्यञ्जक इत्याह—**यौगपद्येन तु** इति । **श्रुत्यविशेषः** इति । वेगगवेशब्दयोः स एव वर्णस्फोटः । केवलमानुपूर्वी भिद्यते साध्यकालकृता, नित्यत्वात्स्वतो नास्ति । यौगपद्येनाभिव्यक्तेर्ध्वनिकृतापि नास्तीति सदोषत्वात्सावयवपक्षस्य पक्षान्तरमवश्यमभ्युपेतव्यम् । यत्र वर्णेतरस्फोटः तत्र कथं भागावसाय इत्याह—**व्यञ्जकध्वनीति** । व्यञ्जकानां ध्वनीनां यः क्रमः तद्गतः । कथमन्यगतेन भेदेनान्यत्र भेदावसाय इत्याह—**दृष्टो हि** इति । यथाऽलक्ताज्यातिच्छत्रतैलमण्डूकपूर्वगर्भालक्तकवर्तिप्रज्वलितप्रदीपाभिव्यक्तानि दीर्घसंनिवेशद्रव्याण्यपवरकादिषु सर्पवद् दृश्यन्ते । अनेनाभिव्यञ्जनवशादन्यथा भासनं दृष्टमिति । **भागभेदेति** । भागभेदेन या कल्पना तत्कृतः शक्तिपरिग्रहो यासु । प्रतिभागमुत्तरत्र विशिष्टभागावधानात् । अर्थान्तरभागावग्रहोऽन्यत्र कल्प्यमानस्तथा प्रतिपत्त्युपायो यथाद्यसंख्याग्रहणम् (१।८८) इत्यत्र व्याख्यातम् ॥९३॥

१ तेष्वेवं — का०.

२ कल्पना—घ २.

३ क्रमेणा व्यपदेश्य—घ१, ङ.

६ नाभिव्यञ्जक°—घ, ङ.

७ दिरपूर्वसम्बन्ध°—कोशः.

* ४ व्याक्तिषु — घ, ङ.
५ विकारध्वाने° — घ २.

* ९ °लब्धे — कोशः. व्यक्तमप-
पाठः.

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥९४॥

आकृतिनित्यत्वाच्छब्दनित्यत्वं केचिद् आचक्षाणाः उभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवेति इत्येवमादिषु स्फोटशब्दवाच्यां शब्दत्वादन्यां क्रमजन्मभिरयुगपत्कालैराश्रयैः क्रमेण प्रकल्पितोपलब्धिनिमित्तसंस्कारां शब्दाकृतिमाचक्षते । उत्पत्तिमत्यस्तु शब्दव्यक्तयः सत्यव्यपदेश्यरूपत्वे स्फोटं व्यपदेश्यरूपमवद्योतयन्त्यो ध्वनिव्यपदेशं लभन्ते ॥९४॥

अविकारस्य शब्दस्य निमित्तैर्विकृतो ध्वनिः ।
उपलब्धौ निमित्तत्वमुपयाति प्रकाशवत् ॥९५॥

अन्ये त्वाकृतिव्यक्तिव्यवहारप्रक्रियावैधर्म्यादेकमेव शब्दतत्त्वं नित्यमलब्धपरिणामं स्वनिमित्तेभ्यः प्राप्तविकारैर्ध्वनिभिरनाश्रितं ध्वनिषु, प्रदीपादिप्रकाशन्यायेनासति वस्तुसंप्रमोहे प्राप्तव्यञ्जकध्वनिविक्रियानुरागमुपलब्धरूपमिवाभिव्यज्यत इत्याहुः ॥९५॥

टी०—स्फोटदर्शनमाह—जातिः स्फोटः इति । केचिज्जातिमेव स्फोट इति वदन्ति । कथमत्रायं व्यपदेशः । व्यक्त्यभिव्यङ्ग्यत्वात् । व्यञ्जकत्वादेव तस्य ध्वनयो व्यक्तय इत्युच्यन्ते । अस्य दर्शनस्य निबन्धनमाह—आकृतिनित्यत्वात् इति । सिद्धे शब्दार्थसम्बन्धे इत्यत्र जात्याश्रयेण शब्दस्य नित्यत्वमुक्तम् । स्फोटमात्रम् इति । जातिमात्रम् । लश्रुतिः इति । लत्वजातिर्भवति । प्रधानस्य तत्र निर्देशो,नान्तरीयकं तु व्यक्त्युपादानम् । अतो न तत्राश्रितस्यानवस्थिततायामादर इति । आदिग्रहणात् स्फोटः शब्दो ध्वनिस्तस्यायाम उपजायते इत्यादयः । शब्दत्वादन्याम् इति । शब्दत्वं हि सर्वशब्दसाधारणं तस्य वाचकत्वे हि सङ्करः स्यात् । सत्यव्यपदेश्यरूपत्वे इति । व्यक्तयोऽव्यपदेश्याः स्वतोऽवस्थिताः । तासामन्यप्रकाशिता स्वरूपावधानोपकाराक्षमेति न व्यवच्छेदिकाः । अवच्छेदे च स्फोटमात्रं निर्दिश्यते इति हीयते । प्रकल्पितेति । उपलब्धिनिमित्तं ये संस्काराः ते प्रकल्पिता यस्याम् ॥९४॥

टी०—अपरे त्वाकाशगत एकः स्फोटवर्ण इत्याहुः—अविकारस्य इति । यदुक्तम्—तस्मिन्नित्यां शब्दव्यक्तिं प्रतिजानते इति । करणाभिघातो ध्वनेरेव भेदे निमित्तं न वाह्यस्य स्फोटस्येति कथयन्ति । प्रक्रियावैधर्म्यात् इति । इह उत्पत्तौ स्थितौ चावयवाः कारणतामुपगच्छन्तोऽवयविन आधाराः, न तावन्नित्यत्वाज्जातीनामुत्पादकत्वेन व्यक्तय आधारः । नापि...महाप्रलये घटादिजातीनां

१ ए ओङ्, ऐ औच् इति सूत्रभाष्यम् ।
२ दन्या—घ, ङ.
३ व्यपदेशी—घ, ङ.
४ व्यक्तिषु—घ, ङ.
६ °येन सन्ति—घ १, ङ.
७ संप्रयोगमोहे—ठ.
८ नुरागे—घ, ठ.
९ °लब्धे—कोशः. व्यक्रमपपाठः.

* ३ °यमुपदेश — घ २.

न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिता ।
आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते ॥९६॥

इह केचिदभिव्यक्तिमेवानित्यत्वसमधिगमहेतुत्वेनापदिशन्ति । अनित्यः शब्दोभिव्यङ्ग्यत्वात् घटवत् । इहानित्यानां घटादीनां प्रदीपादिभिरभिव्यक्तिर्दृष्टा, शब्दश्चायं ध्वनिभिरभिव्यज्यते इत्युपगम्यते, तस्मादनित्यः । अथ नाभिव्यज्यते प्राप्तमिदमुत्पद्यत इति । अतोऽप्यनित्य एव । तत्र येषां जातयः सन्ति नित्याश्च तान् प्रत्युच्यते—उभयथा दृष्टत्वादनपदेश इति । येषां तु नैव किंञ्चिन्नित्यमस्ति तेष्वसिद्धत्वेन प्रत्यवतिष्ठमानेष्वनैकान्तिकत्वस्य नित्यशब्दवादिनः प्रथमतरमसिद्धत्वेनैव प्रत्यवतिष्ठन्ते । कथम् । परं हि प्रत्यभिव्यङ्ग्यत्वादित्यनपदेशः सन्दिग्धत्वाद्, विकल्पप्रसङ्गो वानुषङ्गिणामित्यनवस्था स्यात्तर्कस्य ॥९६॥

देशादिभिश्च सम्बन्धो दृष्टः कायवतामपि ।
देशभेदविकल्पेपि न भेदो ध्वनिशब्दयोः ॥९७॥

अथापरः पूर्वपक्ष इहोपादीयते—देशभेदान्नाभिव्यज्यते शब्दः । समानदे-

(टी०) व्यक्तिभिर्विनाप्यवस्थानात् । तस्माद् द्वयं तदाधारो व्यक्तिश्च तासां जातीनां स्वानुरूपप्रत्ययाभिधाने हेतुः । न च तच्छब्देऽस्ति । यौगपद्याभावाच्छब्दभागानाम् । एकमेव इति । स्वगतभेदाभावात् । अलब्धपरिणामम् इति । ध्वनिभिरिति वक्ष्यति । तेन प्रत्यासत्तेर्ध्वनिविकारादलब्धः परिणामोऽनेनेति नित्यत्वेपि प्रधानस्य परिणामदर्शनादत्र प्रतिषेधः । ध्वनिभिः इति । नित्यमभिव्यज्यते इत्यनेन सम्बन्धः । अनाश्रितम् इति । यदसमवेतं ध्वनिषु । प्राप्तव्यञ्जकेति । ·········यतो निर्भागोपि भागवानिव भासते ॥९५॥

न चानित्येषु इत्याद्युत्तरपक्षश्लोकाः । पूर्वपक्षा अपि वर्णा उपात्ताः । तत्र येषाम् इति । वैशेषिकादीनाम् । उभयथा इति । तेषामेव वादिनां जातिषु नित्यासु व्यक्तिषु घटादिषु चानित्येषु दर्शनादभिव्यक्तेः अनपदेश इत्यहेतुः । संशयजननात् । असिद्धत्वेन इति । अनैकान्तिकत्वस्यासिद्धत्वेन । यतस्तस्य नित्यानभ्युपगमात् विपक्षे वृत्तिरसिद्धा । प्रथमतरम् इति । साधनप्रयोगकाल एव । असिद्धत्वेनैव इति । यथैवानित्यवादी नित्यत्वस्यानङ्गीकरणेनानैकान्तिकतां परिहरति तथैव व्यक्तिवाद्यपि नित्यानां जात्यादीनामङ्गीकरणेन व्यतिरेकासिद्ध्या प्रत्यवतिष्ठते । सन्दिग्धत्वाद् इति । उभयसिद्धस्य व्यतिरेकस्याभावात् सन्देहः । विकल्पप्रसङ्गो वा इति । यद्यनपेक्ष्य व्यतिरेकं पदसाम्यादनित्यत्वं भवता साध्यते नित्यजातिसाधर्म्यान्नित्यत्वं प्राप्नोतीति विकल्पः । अनुषङ्गिणाम् इति । यावन्तो धर्मा घटे जातौ चानुषज्यन्ते तेषाम् ॥९६॥

अभिव्यञ्जकादभिव्यङ्ग्यस्य भिन्नदेशत्वेप्यभिव्यक्तिर्युक्तेत्याह—देशादिभिश्च इति ।

१ चिदेकमेव—घ, ङ.
२ नित्यत्व—घ, ङ.
४ विकल्पः—घ १, ङ.
५ °मिह—का०.

* ५ इदं स्याद्वादरत्नाकरे (४।१०॥) संगृहीतम् ।   * मात्राभिव्यङ्ग्यः। न हि गोशब्दस्य यौभिव्य-

शस्था हि घटादयः प्रदीपादिभिर्व्यज्यन्ते । करणसंयोगविभागाभ्यां तु व्यञ्जकाभ्या मन्यत्र शब्दोपलब्धिरिति । स चायं ध्वनिषु व्यञ्जकेष्वप्रसङ्गः । तत्रापि ब्रुवते—कथमेकदेशस्थः शब्दो नानादेशैरतिविप्रकृष्टैर्ध्वनिभिर्व्यज्यत इति । तत्रेदं प्रतिविधीयते—देशैकत्वं देशनानात्वमिति कायवतामेष धर्मः । कायवन्तोपि तावदादित्यादयः परिच्छिन्नदेशा नानाधिकरणस्था इहोपलभ्यन्ते । अमूर्तयोस्तु ध्वनिशब्दयोर्देशदेशिव्यवहारातिक्रमात्सत्यपि देशभेदविकल्पाभिमाने नैवासौ तयोर्भेदो विद्यत इति ॥९७॥

ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥९८॥[५]

अथापरः पूर्वपक्षः—अभिव्यञ्जकनियमान्नाभिव्यज्यते शब्दः । इहाभिव्यङ्क्तव्यं नाभिव्यञ्जकं नियतमपेक्षते । घटादीनां हि मणिप्रदीपौषधिग्रहनक्षत्रैः सर्वैः सर्वेषामभिव्यक्तिः क्रियते । नियतनादाभिव्यञ्जकाश्चाभ्युपगम्यन्ते शब्दाः । वर्णान्तराभिव्यक्तिहेतुभिर्नादैर्वर्णान्तराणामनभिव्यक्तेः । तस्मान्नाभिव्यज्यन्त इति । तत्र प्रतिविधीयते—ग्रहणग्राह्ययोः इति । तद्यथा चक्षुःसमवेतं रूपमेव बाह्यरूपस्याभिव्यक्तौ निमित्तं, न गुणान्तराणि, नापीतराणीन्द्रियाणि,[६] नेन्द्रियान्तरगुणाः, तथा बाह्यार्थाभिव्यक्तिहेतवो भवन्ति ॥९८॥[७]

(टी०) देशभेदविकल्पेपि इति । सत्यदेशस्याभावात् विकल्पशब्देनाह । अन्यत्र इति । आकाशे । संयोगविभागौ पुनः करणेषु । स चायम् इति । ध्वनिशब्दयोरदेशत्वादसिद्धो हेतुः । मूर्त्तानां भावानामेकदेशतां नानादेशतामाह । ध्वनिशब्दयोस्त्वमूर्त्तयोरिदं नास्त्येवेति कथं तर्हि देशभेदप्रतिपत्तिरित्याह—कायवन्तोपि इति । ये मूर्त्तिमत्त्वाद्देशभेदार्हाः तेप्येकदेशस्थाः सन्तो नानादेशस्था इवोपलभ्यन्ते ॥ ९७ ॥

*सति हि देशे तस्य भेदाभेदौ, अदेशयोस्तु ध्वनिशब्दयोरेतन्नास्तीति चोद्यम् । तत्परिहारायाह—ग्रहणग्राह्ययोः इति । ग्रहणं चक्षुःसमवेतं रूपं तद्धि भास्वरत्वात्समानजातीयबाह्यरूपप्रकाशकम् । तुल्येन्द्रियेति । योऽयं नियमो भवतोपदर्शितः स भिन्नेन्द्रियविषयगतः तुल्येन्द्रियविषयगतं न मृष्यत इति ॥९८॥

१ प्रातिपदिकादिभिः पृथिव्यादि°—घ,ङ । पृथिव्यादिभि°—ठ. भ्रष्टोयं पाठः प्रकरणसामर्थ्याच्छोधितः ।
२ विभागानुव्यञ्जका°—घ, ङ.
३ नानावस्था—घ, ङ.
४ भावेपि—ग १.२.३.४ । भावोपि—वा० दे० सू०.
६ नार्थान्तराणी°—घ १.
७ अत्रैतच्छ्लोकव्याख्या देवसूरिकृता लिख्यते—

ननु नियमस्तावदभिव्यञ्जकानामभिव्यङ्ग्येषु न दृश्यते । घटादयो हि सर्वैरेवाभिव्यक्तिहेतुभिः प्रकाशमात्रस्वभावैर्मणिप्रदीपौषध्यादिभिर्व्यज्यन्ते । अयं तु स्फोटात्मा निय-

* स्यापीति ॥   * ७ स्वादर्शने—घ, ङ.

तुल्येन्द्रियग्राह्येष्वयं नियमो न विद्यत इति पर्यनुयोगे प्रतिविधीयते—

सदृशग्रहणानां च गन्धादीनां प्रकाशकम् ।
निमित्तं नियतं लोके प्रतिद्रव्यमवस्थितम् ॥९९॥[१]

तुल्येन्द्रियग्राह्येष्वप्येष धर्मो दृश्यते । तद्यथा नदीशैलेयादीनां[२] द्रव्याणां किञ्चिदेव संयोगिद्रव्यान्तरं कस्य चिदेव द्रव्यस्य गन्धविशेषाभिव्यक्तौ समर्थं भवति ॥९९॥

प्रकाशकानां भेदांश्च प्रकाश्योर्थोनुवर्तते ।
तैलोदकादिभेदे[३] तत्प्रत्यक्षं प्रतिबिम्बके[४] ॥१००॥

अथापरः पूर्वपक्षः—नाभिव्यज्यते शब्दः । वृद्धिह्रासस्संख्याभेदेष्वभिव्यञ्जकानामभिव्यङ्ग्यस्य तद्धर्मसमन्वयात् । न ह्यभिव्यञ्जकानां वृद्धिह्रासयोरभिव्यङ्ग्यानामर्थानां वृद्धिह्रासावुपलभ्येते । तद्यथा प्रदीपस्य वृद्धिह्रासौ न घटादीनाम् । न खल्वपि प्रदीपस्य सङ्ख्याभेदे संख्यान्तरयुक्तानां घटादीनां प्रदीपसंख्यभेदनिमित्तः संख्यान्तरयोगो दृश्यते । शब्दस्य त्वभिघातभेदे दृश्यते संख्यापरिमाणभेदः ।[५] तस्मान्नाभिव्यज्यत इति । तत्र प्रतिविधीयते—दृष्टमभिव्यङ्ग्यानामभिव्यञ्जकभेदानुविधानम् । तद्यथा । निम्नेष्वादर्शतलादिषु मुखप्रतिबिम्बमुन्नतं दृश्यते, उन्नतेषु निम्नं, खड्गे दीर्घं, प्रियङ्गुतैले श्यामं चीनशस्त्रयवनकाचादिष्वादर्शप्रमाणभेदानुपातीत्यपरिमाणो[६] भेदविकल्पः । संख्याभेदोप्यादर्शभेदे जलतरङ्गभेदे च दृश्यते सूर्य्यादिप्रतिबिम्बानाम् ॥१००॥

(टी०) गन्धादीनाम् इति । आदिग्रहणाद्रूपादीनाम् । लोके इति । प्रसिद्धमेतल्लोक इत्याह । नदीशैलेयादीनाम् इति । कस्य चिदेव द्रव्यस्येत्यनेन सम्बन्धः । द्रव्याणामिति निर्धारणे षष्ठी ॥९९॥

शब्दस्य तु इति । अभिव्यङ्ग्यधर्मभावमाह । अभिघातभेदे इति । अल्पेऽभिघाते सोल्पो भवति शब्दः, महति महानिति परिमाणभेदः । एकस्मिन्नभिघात एको द्वयोर्द्वाविति संख्याभेदः । अत्रानैकान्तिकत्वमाह—दृष्टमभिव्यङ्ग्यानाम् इति । निम्नेष्वादर्शतलेषु मुखमुन्नतम्, उन्नतेषु च निम्नं दृश्यत इति संस्थानभेदः । खड्गे दीर्घमिति प्रमाणभेदः । प्रियङ्गुतैले श्याममिति वर्णभेदः ।

ञ्जकः स एवाश्वशब्दस्यापि ध्वनिरिष्यते । किं तर्ह्यत्यन्तविलक्षणो गोशब्दाभिव्यक्तिसामर्थ्येनासाधारणः । तस्मादत एव नियमाच्चक्षुरादिवदस्य कार्यत्वमेव युक्तम् । तस्मिंश्च सत्यनित्यत्वमेव सञ्चरत इति । मैवं वोचः । यथा हि चक्षुरिन्द्रियमेव विषयरूपस्याभिव्यक्तौ निमित्तं नेन्द्रियान्तरमिति व्यञ्जकनियमेपि विषयरूपस्य न कार्यत्वं तथा स्फोट-

१ इदं स्याद्वादरत्नाकरे (४।१०॥) गद्यरूपेणोपन्यस्तम् ।
२ नखशैलेया°—घ, ङ.
३ भेदेन—क १.२.३.४.५.७, ख, घ, ङ.
४ °बिम्बकम्—ख । °बिम्बिते—ग १.२.३.४.
५ अतः परं 'संख्याभेदः' इत्यधिकम्—घ, ङ.
६ जननशस्त्रायवनका°—घ, ङ.

तत्रैनत्स्यात् । प्रतिबिम्बमादर्शादिषु चन्द्रादिभ्यो भावान्तरमेव संनिविष्टमुपलभ्यत इति । तत्र प्रतिविधीयते—

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु ।
पर्वतादिसरूपाणां भावानां नास्ति संभवः ॥१०१॥[2]

न हि वज्रादिष्वाधारेषु विरुद्धपरिमाणानामन्तःसंनिवेशिनां पर्वतादिसरूपाणां भावानामुत्पत्तिः संभवतीति ॥१०१॥

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु ।
वृत्तिकालः स्वकालश्च नादभेदाद्विभज्यते ॥१०२॥

नित्यानां हि स्थितौ सहकारिण्याः कालशक्तेर्व्यापारो न विद्यते । लोकेऽव्यवहारेण तु बुद्ध्या पूर्वान्तापरान्तयोरनुगम्यमानात्मतत्त्वाः[4] स्थितिं प्रति न भिद्यन्ते[5] सर्व एव प्रचिताप्रचितरूपा वर्णपदवाक्याख्याः स्फोटाः । उपलब्धिविषयतापत्तौ[6] तु तेषामभिन्नकालानामुपलब्धिस्थित्यभिमानः । वृत्तिकालः स्वकालश्च इति । नादो हि प्राकृतः शब्दात्मनि प्रत्यस्यमानस्थितिरूपो भेदस्याग्रहणार्थं ह्रस्वदीर्घ-

(टी०) आदर्शप्रमाणेति । आदृश्यते येष्विति, एतैर्वादर्शाः । तेषाम् । प्रतिबिम्बदर्शनेनैतदाह—यथा बिम्बकमभिन्नमपि प्राप्तोपरागं लक्ष्यते तथा स्फोटोपीति ॥१००॥

वज्रादर्शतलादिषु पदार्थान्तराण्येवोत्पद्यन्ते न तु किंचिदभिव्यज्यत इति चोद्ये सत्याह—विरुद्धपरिमाणेषु इति । खन्नादयोऽल्पपरिमाणाः पर्वतादयो महान्त इति न तेषां तावतां तत्र संभव इति । न तत्र भावान्तरोत्पत्तिः । तावत्यवकाशे ततोऽधिकप्रमाणस्य विरुद्धोत्पत्तिः । निबिडितावयवसंनिवेशोपलक्षणाय वज्रतलग्रहणम् । सूक्ष्मतरस्याप्यवयवस्य तत्रानुप्रवेशाभावात् ॥१०१॥

एवं व्यञ्जकध्वनिकृतं कालभेदमुपपाद्य निगमयति—तस्मात् इति । यतोऽभिव्यञ्जकधर्माननुवर्तते व्यङ्ग्यः । वृत्तिकालो द्रुतादिः । स्वकालो ह्रस्वादिः । नित्यानां हि इति । अनित्या ह्यनुकूलकालशक्त्यनुगृहीताश्चिरमवतिष्ठन्ते । प्रतिकूलकालशक्त्यनुगृहीता आश्वेव तिरोधीयन्ते । नित्येषु तु नास्ति स्थितिं प्रति कालस्य व्यापारः । अनुगम्यमानात्मतत्त्वाः इति । उपलब्धेः पूर्वकालं पूर्वान्त इत्याह । पश्चाद्भाविनं चापरान्त इति । तयोरप्यवस्थयोः बुद्ध्यानुगम्यमानात्मतत्त्वं येषामिति प्रत्यक्षेणानुपलम्भेपि युक्तिः । तयोरवस्थयोस्तत्त्वस्यानुगम्यमानत्वान्नास्ति भेदः सदावस्थानात् । कथं तर्हि पूर्वापरान्तव्यपदेश इत्याह—लोकव्यवहारेण तु इति । प्रत्यक्षेणोपलभ्यमानस्य पूर्वपश्चादनुपलम्भे पूर्वान्तापरान्तव्यवहारो लोके दृष्ट इति । प्रचिताप्रचितरूपाः इति । सर्वेष्वेव प्रचया-

१ जलादिषु—घ, ङ.
२ अस्य प्रथमश्चरणो हेलाराजेन जातिसमुद्देशे यथा जलादिभिर्व्यक्तम् इत्यादिश्लोकव्याख्यायां संगृहीतः ।
३ व्यवहारेषु—घ, ङ.
तत्त्वा—ठ.
यथाटीकं तु पठितम् ।
५ भिद्यते—कोशः ।
६ स्फोटानुपलब्धि°—ङ.
७ स्यनुमानः—कोशः । टीका त्वनुसृता ।

प्लुतकालभेदव्यवहारव्यवस्थाहेतुः । वैकृतस्तु नादो बाह्यद्रुतादिवृत्तिकालव्यवस्थां प्रकल्पयति ॥१०२॥[1]

यः संयोगविभागाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोन्यैरुदाहृताः ॥१०३॥[3]

अनित्यपक्षे स्थानकरणप्राप्तिविभागहेतुकः प्रथमोऽभिनिर्वृत्तो[4] यः शब्दः स स्फोट इत्युच्यते । तज्जातास्तु[5] सर्वदिक्कास्तद्रूपप्रतिबिम्बोपग्राहिणः सर्वद्रव्याणां स्वेनात्मना निरवयवत्वात् आकाशस्यापि मुख्यसमवायिदेशवत् संयोगिद्रव्यान्तरदेशप्रविभागोपचारे सति, देशनैरन्तर्यप्रत्यासत्त्या कार्यकारणसन्तानाविच्छेदेन यथोत्तरमपचीयमानपूर्वप्रतिबिम्बोपग्रहशक्तयो मन्दप्रदीपप्रकाशितरूपकल्पाः क्रमेण प्रध्वंसमाना ये वर्णश्रुतिं विभजन्ति ते ध्वनय इत्युच्यन्ते ।

नित्यपक्षे तु संयोगजविभागजध्वनिव्यङ्ग्यः स्फोटः । एकेषां संयोगविभागजध्वनिसंभूतनादाभिव्यङ्ग्यः । स्फोटरूपानुग्राहिणस्तु यथोत्तरमपचीयमानाभिव्यक्तिसामर्थ्या द्रुतादिवृत्तिभेदव्यवस्थाहेतवोऽपंचयात्मका ध्वनयः ॥१०३॥

(टी०) प्रचयौ स्वतो न विद्येते इति । उपलब्धिविषयतापत्तौ इति । उपलब्धिकाले । उपलब्धिस्थित्यभिमानः इति । उपलब्धेर्वा स्थितिकालप्रत्ययस्यायमभिमानो यदुत वृत्तिकालः स्वकालश्चेति । अन्यथा भेद एव न स्यात् । तस्यैककालत्वात् ।

ननु बुद्ध्यस्तद्विषयाः । स चाभिन्नकाल इति कुतो बुद्धेः स्थितिकालभेद इत्याह—नादो हि इति । प्रत्यस्यमानेति । तस्य वा ध्वनेः स्वकारणाक्षिप्तस्य या स्थितिः तस्या यद्रूपं तत् प्रत्यस्यमानं तत्रेति । भेदस्याग्रहणात् इति । ध्वनिस्फोटयोः । वैकृतस्तु इति । स शब्देऽवधारिते पश्चाद्व्यवनवसितभेदत्वान्नाध्यारोपनिबन्धनमिति तदीयकालेन द्रुतादिवृत्तिकालः ॥१०२॥

कार्यपक्षे स्फोटध्वनिभेदं प्रदर्शयन्नाह—यः इति । करणैः इति । स्थानकरणाभ्यामिति ।

१ अत्र वादिदेवसूरिकृततत्श्लोकव्याख्या लिख्यते—
यतश्च शब्दात्मनः स्वतो न भेदोऽपि स्वाभिव्यञ्जकवशात्तस्मादभिन्नकालेपि कालभेदादेव वर्णपदवाक्याख्याख्योपि स्फोटा नित्यत्वादत्यन्ताविद्यमानकालभेदाः । यस्त्वेषां ह्रस्वदीर्घप्लुतव्यपदेशयोग्यो मात्रिकादिस्वकालावगमो यश्च द्रुतादिवृत्तित्रये त्रिभागाधिकत्वेन भेदः स सर्वो नादानामभिव्यञ्जकानां तथा तथा भेदात् । तथाकृता हि ध्वनयः शब्देऽध्यस्यमानाः शब्दात्मना [illegible]
भवन्ति ।
२ °वियोगाभ्यां—ग १, च.
३ इदं ध्वन्यालोकलोचने (१।१६॥) संगृहीतम् ।
४ प्रथमादिभिर्निर्वृत्तौ—कोशस्थोपपाठः.
५ तज्जातिस्तु—कोशस्थोपपाठः.
६ °दिग्वस्तु—घ, ङ.
७ वर्णाः—घ, ङ.
८ व्यङ्ग्य—ङ, ठ.
९ सामर्थ्यात्—कोशः ।
यथाटीकं तु पठितम् ।

* ५-५ कालभाविच्छेदेना° — घ, ङ.   * एव वा ।

अल्पे महति वा शब्दे स्फोटकालो न भिद्यते ।
परस्तु शब्दसन्तानः प्रचयापचयात्मकः ॥१०४॥

देशव्याप्तिसामान्यादल्पमहत्त्वे शब्दस्योपचर्येते । प्रसिद्धेर्वा । सर्वत्र हि प्रसिद्धिरेवार्थव्यवस्थाकारणम् । अनवस्थितैव हि तर्कागमाभ्यां भिन्नेषु प्रवादेषु वस्तुगता व्यवस्था । तत्राविशेषेण कार्यशब्दानां कारणशब्दानां चोत्पन्नापवर्गित्वान्नास्ति महतोऽल्पस्य वा शब्दस्य सूक्ष्मोऽपि कश्चित्कालभेदः । हस्तिमशकज्ञानवत् । निमित्तभेदात्तु कार्यारम्भे शब्दस्य सामर्थ्यं भिद्यते । कस्य चिद्धि भेरीदण्डाभिघातजस्येव कार्यपरम्परा दूरमनुपतति । कश्चित्तु लोहकंसाभिघात इव प्रत्यासन्नदेशग्राह्यं दीर्घकालं सन्तानमविच्छेदेनारभते ॥ १०४॥

(टी०) निमित्तोपलक्षणार्थत्वात्करणशब्दस्य । अन्यैः इति । अभिव्यक्तिवादिभ्यः । स्थानकरणयोः प्राप्तिविभागौ संयोगविभागौ तद्धेतुकः । सर्वदिक्कः इति । तस्माद्धि स्थानसंयोगविभागजाताच्छब्दाद्दशदिग्व्यापिनः कदम्बकोरकवद्वीचिसन्तानवच्च शब्दा जायमानाः श्रोत्रदेशं दशदिगवस्थितानामुपगच्छन्तीति । देशनैरन्तर्यप्रत्यासत्त्येति वक्ष्यति । तत्रैकत्वादाकाशस्य कथं शब्दस्य देशनैरन्तर्यमिति चोद्यं समाधातुमादावेव प्रक्रमते —सर्वद्रव्याणाम् इति । एतदाह—आकाशस्य ये संयोगिनो घटादयः परिच्छिन्नदेशास्ते तं देशभेदमुपपादयिष्यन्तीति । स्यादेतत् । घटादिदेशभेदेन नाकाशस्यापि देशभेदः । तत्र तूपचरित इत्याह—सर्वद्रव्याणाम् इति । एतदाह—न कश्चिन्मुख्यो देशः, यतस्सूत्रारम्भकारणाद्यवयवा (?) एकदेशो घटस्य, न तु तस्य स्वगतो भेदोस्ति । ते च ततोऽर्थान्तरमेवेत्युपचरित एव देशः । मुख्यसमवायीति । मुख्यसमवायिनां कालादीनां ये देशास्ते घटे आरोप्यन्ते । ते च मुख्या अभिमता इति मुख्याः । तदनेन सर्वत्रोपचारमाह । मन्दप्रदीपप्रकाशितेति । यद्यपि प्रदीपेन तुल्यो ध्वनिः, न प्रकाश्येन तथापि योऽसौ स्फोटः स एव मन्दस्फोटोपलभ्य इति ध्वनावभेदाभिमानादेवमुक्तम् । वर्णश्रुतिम् इति । येऽन्तरालवर्तिनः प्रविभक्ताक्षराः ते स्फोटरूपोपग्रहा व्यञ्जका एव ध्वनयः । एकेषाम् इति । शब्दव्यक्तिस्फोटवादिनाम् । संयोगविभागजनितध्वनिसंभूतेन नादेन यदभिव्यङ्ग्यं स्फोटरूपं तस्योत्तरे ध्वनिजा ध्वनयोऽपचीयमानाभिव्यक्तिशक्तयो द्रुतादिव्यवस्थाहेतवः, येषामन्तेऽनुरणनमात्रं भवति ॥१०३॥

संयोगजो ध्वनिः स्फोटः तज्जास्तु ध्वनय इति अनित्यपक्षे प्रक्रियावर्णनायाह—अल्पे इति । ह्रस्वे । महति वा इति । दीर्घप्लुतयोः । स्फोटकालः इति । तेषां प्राथमिकानामभिन्नः कालः, सर्वेषामेकक्षणावस्थानात् । कथं तर्हि कालभेदावगतिरित्याह—परस्तु इति । ते हि स्फोटशब्दाः तत्कार्यभूतानामुत्तरेषां शब्दानां वशेन कालभेदमादर्शयन्ति यदाह प्रचयाप्रचयात्मक इति ।

१ हि—घ, ङ. टीकायामप्यपिशब्दः । कोशान्तरे ग्रन्थपातः ।
२ विद्यते—घ, ङ.
३ चित्—घ, ङ.
४ तुरीदण्डा°—ङ.
६ अत्र वाराणसेये संग्रहेऽयं विशेषः —शब्दोऽत्र ध्वनिः । स च द्विविधः । उत्तरोत्तरशब्दानां कारणरूप आद्यः, कार्यरूप उत्तरश्च । तत्राद्यः स्फोटव्यञ्जकः, स्फोट एव वा ।

* ३ स्थानीयेनेव – घ, ङ.   * ६ तदाश्रयश्च – घ, ङ.

दूरात्प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते ।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते ॥१०५॥

इह केचिदाचार्या व्यक्तं स्फोटं सहजेन ध्वनिना सर्वतो दूरव्यापिना प्रकाशस्थानीयेन गन्धेन युक्तं द्रव्यविशेषमिवाविर्भावकाल एव संबद्धं मन्यन्ते ध्वनिना । यथैव प्रदीपे घटसंनिविष्टावयवं प्रत्युपादानं तेजोद्रव्यं, तदाश्रितश्च तद्विक्रियानुपरिवर्ती प्रकाशः, घण्टायाश्चाभिघातेन व्यक्ततरौ स्फोटनादौ सर्वेषां वर्णानामभिनिष्पत्तौ धर्म इति ।

स चायं श्लोकद्वयेनानन्तरेण प्राकृतवैकृतयोर्नादयोर्विशेष आख्यातः ॥१०५॥

द्रव्याभिघातात्प्रचितौ भिन्नौ दीर्घप्लुतावपि ।
कम्पे तूपरते जाता नादा वृत्तेर्विशेषकाः ॥१०६॥

टी०—ननु चाल्पत्वमहत्त्वे परिमाणं, तस्य गुणत्वाद् द्रव्ये समवायः, शब्दस्य तु गुणत्वात्कथमल्पत्वमहत्त्वे इत्याह —देशव्याप्तिसामान्यात् इति । अथवाल्पो महानिति मूर्तानां धर्मः, शब्दास्त्वमूर्ताः कथं तथोच्यन्ते इत्युपक्षिप्तम् । मुख्याल्पत्वमहत्त्वानां सूचिपर्वतादीनां यो धर्मः देशव्याप्तिः तस्मात्सामान्याच्छब्देऽपि ते उपचर्येते । अल्पसूच्यल्पदेशं व्याप्नोति । महान्पर्वतो महान्तम् । शब्दोऽपि चाल्पमहान्तौ देशौ व्याप्नुवंस्तथा व्यपदिश्यते । सा चेयं व्याप्तिः शब्दस्य कार्यानुमेया । सर्वत्र हि इति । न लोकप्रसिद्धिं विहायान्यथा पदार्थस्वभावव्यवस्थापना युक्ता । पुरुषप्रतिभावशात्तर्कस्यानवस्थानात्, सिद्धान्तभेदादागमस्येति न ताभ्यां वस्तुस्वभावव्यवस्था । यदाह—अनवस्थितैव इति । कार्यशब्दानाम् इति । संयोगविभागजानां स्फोटजानां ध्वनीनाम् । कारणशब्दानाम् इति । संयोगविभागजानां स्फोटानाम् ॥१०४॥

दूरात् इति । दूराद् ध्वनिमात्रं तु लक्ष्यत इति सम्बन्धः । प्रभेव इति । यथा प्रदीपः प्रभया सहोत्पद्यते । अपरिच्छिन्नप्रदीपाश्च प्रदीपमुपलभन्ते । तथा स्फोटोऽपि ध्वनिभिरनुगत एवोपलभ्यते । दूराचापरिच्छेदेऽपि तस्य तद्ध्वनिमात्रमुपलभ्यते ।

केचित् इति । अनित्यशब्दवादिभिरेव पूर्वमन्यथोक्तम् । इदं तु दर्शनान्तरम् इति । व्यक्तम् इति । अभिव्यक्तम् । केनेति । सहजेन ध्वनिना । तत्प्रतिबिम्बोपग्रहात् । सर्वतो दूरव्यापिना इति । समन्ताद् दूरदेशव्याप्त्योत्पत्तिं ध्वनीनामाह । आविर्भावकाल एव इति । उत्पत्तिकाले यथा द्रव्यस्य गन्धेन सहैवोत्पत्तिस्तथा स्फोटस्य ध्वनिना । यथैव इति । घटसंनिविष्टावयवं च तत् प्रत्युपादानं चेति समासः । प्रदीपे तेजोद्रव्यं तदनन्तरसंनिवेशावयवात् संनिविष्टरूपं, प्रकाशस्तु प्रभावन्त एव तेजोवयवाः समन्ततः प्रशिथिलसन्धयः । तादृशः स्फोटनादयोर्भेदः । घण्टायाः इति । प्रथमोऽभिघातजस्तारतरः शब्दः, तदन्यो नाद इति स्पष्ट एव भेदः । सर्वेषाम् इति । योऽयं प्रदीपदृष्टान्तसिद्धः ॥१०५॥

१ व्यक्ति—घ, ङ.
२ स्थायिना—घ, ङ.
४ सर्वत्र—घ, ङ.
५ घनसंनिविष्टेति साधु प्रतिभाति ।

* ६ ऽव्यक्तस्य — क १.२.३.४ ५.७.

इत्यादि सर्वमनुगन्तव्यम् ॥११२॥

ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति—

अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥११३॥

स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥११४॥

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥११५॥

(टी०) सूक्ष्मास्तत्तदवस्थापरिग्रहेण तथा व्यपदिश्यन्ते । कथमेकैकरूपाणामनेकच्छायादिरूपापत्तिरित्याह—सर्वशक्तित्वात् इति । छायादिभावोपगमसामर्थ्यनित्ययुक्तत्वात् परमाणूनां कस्मान्न सदा छायादय इत्याह—भेदसंसर्गवृत्तय: इति । भेदो विभागः । संसर्गः संयोगः तौ वृत्तिरेषामिति । यदा कुतश्चिन्निमित्तात् संयुज्यन्ते तदा परिणमन्ते यदा तु विभज्यन्ते तदा परमाणुच्छायामवतिष्ठन्ते (?) । परिणामिन: इति । सन्निवेशविशेषग्राहिणः ॥ १११ ॥

तेषां शब्दत्वापत्तौ विधिमाह—

यद्यपि ते शब्दत्वापत्तिशक्तियुक्ताः तथापि प्रयत्नेनैव संह्रियमाणाः शब्दतां प्रतिपद्यन्ते । शब्दपरिणामत्वात् शब्दा इत्याख्याताः ॥ ११२ ॥

आन्तरो ज्ञाता वागात्मनि इति । ज्ञानात्मकेऽपि तस्मिन् ग्रहीतृत्वव्यवहारोऽस्ति यथा शब्दतत्त्वमेवेदं वाङ्मनसाख्यप्रविभागम् इति । तेन ज्ञातर्यपि वाग्रूपानुषङ्गः । सूक्ष्मे इति । भेदरूपोपसंहारादतीन्द्रिये । स्थित: इति । सारूप्यानुषक्ते ज्ञानात्मनि स्थितो वाचि स्थित इत्युक्तः । व्यक्तये इति । तस्यामवस्थायां शब्दरूपस्य ज्ञानस्याविवेकेनानवधारणेन शब्दरूपव्यक्त्यर्थं स्थूलेन्द्रियगम्येन रूपेण विवर्तत इति ॥ ११३ ॥

स्थूलशब्दभावापत्तौ आत्मनः क्रममाह—स मनोभावम् इति । मनो हि विषयपरिच्छेदकमिति मनोऽवस्थामागच्छति । विषयपरिच्छेदेन योग्येन स्थूलेनात्मना व्यवतिष्ठते मनः, प्रकाशरूपत्वात् । तेजसा इति । शरीरान्तःस्थितेनोष्मणा । पाकम् इति । मनोरूपतामापन्नस्य ज्ञातुरतिशयो विषयावग्रहसामर्थ्यख्यापकः । वायुम् इति । प्राणाख्यं वायुम् । आविशति इति । स्वरूपं तत्र प्रत्यस्यात्मरूपतामापादयति ॥ ११४ ॥

१ अथेदमान्तरं—का०.
२ ज्ञानं—का०.
३ सूक्ष्मो—ख२, क२.३.४.५.७.
४ वागात्मना — का० । रागात्मनि—क१. २.४.५.७, ख.
५ स्थितम्—का०.
६ समताभाव°—क१. २. ३. ४. ५. ७, ख, ग, घ, ङ.
७ निवर्तते—क२, का०. व्यक्रमपपाठः.
८ अयं श्लोको रामकण्ठाचार्यकृतविवृत्युपेतासु स्पन्दकारिकासु १५३ तमे पृष्ठे संगृहीतः । तत्र किमपि पाठान्तरं नास्ति ।

* ६ मनुगृह्णाति — घ २. *१२ प्रतीयते — ग १.२.४, घ २.

विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥११६॥

इत्येवमादि सर्वमनुगन्तव्यम् । निदर्शनमात्रं चेदम् । बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्ते । तद्यथा । अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितः प्राणो वायुस्तेजसानुगृहीतः शब्दवहाभ्यः शुषिभ्यः सूक्ष्मांशं धूमसन्तानवत्संहन्ति । स स्थानेषु शब्दघनः संहन्यमानः प्रकाशमात्रया कया चिदन्तःसंनिवेशिनः शब्दस्याविभक्तं बिम्बमुपगृह्णाति—इत्येवमादि सर्वमनुगन्तव्यम् । तद्यथा । नाभिप्रदेशात्प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति, ततः शब्दनिष्पत्तिः—इत्यादि शिक्षाकारमतभेदप्रबन्धोऽनुगन्तव्यः । आचार्यः खल्वप्याह—

आत्मा बुद्ध्या समर्थ्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥

इत्येवमादि । तथापरः पठति—वायुः कोष्ठस्थानमनुप्रदानमापद्यते । स कण्ठगतः श्वासतां नादतां वा इत्यादि । अथापर आह—मनोभिहतः कायाग्निः प्राणमुदीरयति । स नाभेरुद्यन्मूर्धन्यभिहतोऽन्येन पुनरुद्यता मरुताभिहन्यमानो ध्वनिः सम्पद्येत क इति वा ख इति वा—इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमागमदर्शनं दृश्यमानं सर्वं प्रपञ्चेन समर्थयितव्यम् ॥११६॥

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।
व्यञ्जनाद्वायुरिव स स्वनिमित्तात्प्रतीयते ॥११७॥

टी०—अन्तःकरणतत्त्वस्य इति । मनोरूपतामापन्नस्य ज्ञातुः । तद्धर्मेण इति । मनसो धर्मेण विवर्तत इति सम्बन्धमाचष्टे । तेजसा इव इति । यथा तेज इन्धनमाश्रयतां प्रतिपन्नं तत्समावेशात् विहायेन्धनरूपतां तेजोरूपं भवति तथा वायुः स्वरूपहानेन मनोरूपतां प्रतिपद्यत इति ॥ ११६ ॥

विभजन् इति । विभागेनावस्थापयन् । प्राण: इति । योयं प्रक्रान्तः । वर्णान् इति । श्रुतिरूपाण्याह । अभिव्यज्य इति नित्यानित्ययोः यथेष्टमभिसम्बन्धः । वर्णेषु इति । स च वायु-

१ विभज्य—ख, का०.
२ ग्रन्थान्—क४.५.७, ख, घ, ङ.
३ एतच्छ्लोकचतुष्टयं दाक्षिणात्येषु चतुर्ष्वपि कोशेषु न धृतम् । इदं सर्वं परकृतिरत्र संगृहीता स्यादिति हेतुरुपेक्षायां संभावनीयः ।
४ सूक्ष्मांशधू°—घ, ङ । सूक्ष्मं धूम—ङ.
५ मानया—घ, ङ.
७ तद्यथा—कोशः. समुच्चयवचनेन निपातेनात्र भवितव्यमिति तथेत्युत्प्रेक्षणम् ।
८ समेत्या—ख, ग१.२.३.४, घ१,ङ.
९ इदमुदीच्येषु कोशेषु कारिकासु मध्ये प्रक्षिप्तम् ।
१० इदं सूत्रम् ।
११ सूक्ष्मत्वेनोपलभ्यते—क १. २,ख, घ१, ङ । सूक्ष्मत्वाच्चोपलभ्यते—का०.

cf Vrsabha — many other ones also to be traced

* ख्यायाम् । हेलाराजीयेपि सम्बन्धसमुद्देशे

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते[1] ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[2] ॥१२४॥[3]

यथास्य संहृतरूपा शब्दभावना तथा ज्ञेयेष्वर्थैपूत्पन्नेनार्थ्यविकल्पकेन[4] ज्ञानेन कार्यं न क्रियते । तद्यथा त्वरितं गच्छतस्तृणलोष्ठादिसंस्पर्शात्सत्यपि ज्ञाने काचिदेव सा[5] ज्ञानावस्था यस्यामभिमुखीभूतशब्दभावनाबीजायामाविर्भूता-स्वर्थोपग्राहिणामाख्येयरूपाणामनाख्येयरूपाणां च शब्दानां प्रत्यर्थनियतासु[6] शक्तिषु शब्दानुविद्धेन शक्त्यनुपातिना ज्ञानेनाक्रियमाण[7] उपगृह्यमाणो[8] वस्त्वात्मा ज्ञाना-नुगतो व्यक्तरूपप्रत्यवभासो ज्ञायत इत्यभिधीयते । स च निमित्तान्तरादाविर्भवत्सु श्रुतिबीजेषु स्मृतिहेतुर्भवति । तथैकेषामाचार्याणां सुप्तस्यापि जाग्रद्वृत्त्या सदृशो ज्ञानवृत्तिप्रबन्धः । केवलं तु शब्दभावनाबीजानि तदा सूक्ष्मां वृत्तिं प्रतिलभन्ते । तस्मात्तामन्तःसंज्ञां चेति तामवस्थामाहुः । तदेतत्संज्ञानं शब्दप्रकृतिर्विकारभावेनाविर्भा-वतिरोभावावजस्त्रं प्रत्यनुभवति ॥१२४॥

(टी०) करणानि तत्र तत्र वर्णे प्रथमतो नियुङ्क्ते । अथवान्तःकरणस्य प्रथमतो विन्यासो येन पूर्वमकृतशब्दोच्चारणोपि बालो विशिष्टं प्रयत्नमारभते । **प्रतिपुरुषम्** इति । अवस्थितो ज्ञाने बुद्धिस्थ-बीजपरिग्रहो यस्याः । सा हि ज्ञाने बीजपरिग्रहेण प्रतिपुरुषमवस्थिता । बीजानां तु वृत्तिलाभे कार्यनिष्पत्तिर्नान्यदा । **अनुपदेशसाध्याः** इति । यद्यपीदमिदं च स्थानं व्यापारयेत्युपदिश्यते बालानां तथापि प्रतिभोद्घाटनमेव शब्दाः कुर्वन्ति । यतस्तेऽप्युपदेशशब्दा बालस्याप्रसिद्धसम्बन्धा एव । तत उपदेशः पूर्वशब्दभावनाबीजवृत्तिलाभमेव करोतीति ॥१२३॥

सम्प्रति ज्ञाने शब्दरूपानुपङ्गमाह—**न सोऽस्ति** इति । सर्वस्मिन् ज्ञाने शब्दानुगमः केवलमनुवृत्तिः क्वचिद्यथा निमित्तशून्यवस्तुग्राहिणि ज्ञाने लब्धवृत्तिः । क्वचिद्यथा तदुत्तरभाविषु भूतेषु वा । तमेवानुषङ्गमाह—**अनुविद्धमिव** इति । उपदेष्ट्रापि प्रतिपन्नशब्दरूपम् । **संहृतरूपा** इति । यावज्ज्ञाने व्यक्तरूपता वृत्तिलाभेन भवति तावद् भावनानुगमः । **आविर्भूतासु** इति । शब्दानां शक्तिषु इति सम्बन्धः । **अर्थोपग्राहिणाम्** इति । अर्थप्रतिपादकानां शब्दानामिति सम्बन्धः ।

१ शब्दानुगमनाद्विना—ग १. ३. ४.

२ वर्तते—ग १. ३. ४ । गम्यते—ग२ । दृश्यते—उत्पलाचार्यः । गृह्यते—जयन्तभट्टः, रामचन्द्रः पार्थसारथिश्च.

३ इदं न्यायमञ्जर्यां ८० तमे पृष्ठे, मीमांसाश्लोकवार्तिकव्याख्यायां १८१ तमे पृष्ठे, स्पन्दकारिकाव्याख्यायां ५१ पृष्ठे स्याद्वादमञ्जर्यां च १०६ पृष्ठे संगृहीतम् । गोपालिकायामप्येकविंशश्लोकव्याख्यायाम् । हेलाराजीयेपि सम्बन्धसमुद्देशे द्वितीयस्मिञ्श्लोके प्रथमोस्य चरणः संगृहीतः । एतदुत्तरार्धसंवादि 'यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः' इति स्पन्दकारिकासु ।

४ नार्थविकल्पकेन—घ.

५ सामान्या—ङ.

६ प्रत्यर्थं नियतासु—टीकापाठः.

७ ज्ञानिना क्रियमाणा—घ, ङ.

८ गृह्यमाणावस्थात्मा—घ, ङ.

* ३ °देश्यया वृत्त्या — घ, ङ.
४ प्रकाशान्त — घ १, ङ ।

* ७ शिष्टेष्वर्थ° — कोशः ।
अत्र सप्तमीबहुवचनं न सङ्गच्छत इति शोधितम् ।

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती[1] ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥१२५॥[2]

यथा प्रकाशकत्वमग्नेः स्वरूपं चैतन्यं वान्तर्यामिणस्तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम् । याप्यसञ्चेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मानुगमोऽभ्या-वर्तते । योपि प्रथमोपनिपाती बाह्येष्वर्थेषु प्रकाशः स निमित्तानामपरिग्रहेण वस्तु-स्वरूपमात्रमिदं तदित्यव्यपदेश्यया[3] वृत्त्या प्रत्यवभासयति । स्मृतिकालेपि च तादृशा-नामुपलब्धिबीजानामाभिमुख्ये स्मर्तव्येषु श्लोकादिषु प्रकाशानुगममात्रमारूपमिव बुद्धौ विपरिवर्तते । कोप्यसावनुवाकः श्लोको वा योऽयं मया श्रुतिमात्रेण प्रकान्त[4] इति । वाग्रूपतायां चासत्यामुत्पन्नोपि प्रकाशः पररूपमनङ्गीकुर्वन्प्रकाशनक्रियासा-धनरूपतायां न व्यवतिष्ठते । भिन्नरूपाणां चानुपकारिणामात्मान्तरात्मनामितरेतर-स्य वस्तुमात्राज्ञाने[5] प्रत्यवभासमाने यदुत्तरकालमनुसन्धानं प्रत्यवमर्श एकार्थका-रित्वमविभागेन शक्तिसंसर्गयोगोपग्रहः तद् वाग्रूपतायां बद्धम् । सा ह्यनुसन्द-धाना प्रत्यवमृशन्ती च सर्वविशेषणविशिष्टेष्वर्थ[7]क्रियाकारिणि प्रत्यये शक्त्यपोद्धा-रकल्पनया भेदसंसर्गमात्रां न विजहाति ॥१२५॥

(टी०) **आख्येयरूपाणाम्** इति । आख्यातुं शक्यते रूपं येषां गवादिशब्दवत् । **अनाख्येयरूपाणाम्** इति । पड्जादिवत् । यतो न तेषामर्थः पर्यायान्तरेणाख्यातुं शक्यते । **प्रत्यर्थं नियतासु** इति । प्रतिनियतार्थपरिच्छेदोपयोगिन्यो हि ताः । अर्थनिरूपणायोग्यता शब्दस्य शक्तिरित्युक्ता । तस्यां हि प्रवृत्तायां तज्ज्ञानं यथार्थं निरूपयति । **शब्दानुविद्धेन** इति । शब्दोपरक्तेन । स सूक्ष्मः सर्वज्ञानेऽस्तीत्याह । **शब्दशक्त्यनुपातिना** इति । शब्दस्य शक्तिरर्थप्रतिपादनं तदुपदर्शनेऽर्थरूपप्रतिपत्तेः । गौरयमश्वोऽय-मिति । **आक्रियमाण** इति । विशिष्टेनाकारेण शब्दानुविद्धेन स्पष्टेन लभ्यमानः । तदेवाह—**उपगृह्य-माणः** इति । **ज्ञानानुगतः** इति । प्रत्यवमर्शज्ञानेन । **व्यक्तरूपेति** । व्यक्तरूपः प्रत्यवभासोऽस्मिन् । इदं तदिति व्यपदेश्यरूपत्वात् । **स च** इति । वस्त्वाभासः । **निमित्तान्तरात्** इति । सदृशग्रहणादेर्निमि-त्तात् । **तदेतत् संज्ञानम्** इति । यतः शब्दभावनाबीजवृत्तिलाभे तदर्थसंवेदनमुपजायते ततः शब्दः प्रकृतिः, ज्ञानं विकारः । यतश्च तस्माज्ज्ञानादयं गौरिति शब्दो भवति ततो ज्ञानं प्रकृतिर्विकारः शब्द इति । अथवा शब्दभावनानुविद्धं ज्ञानं तदनुविद्धज्ञानकारणं,ततस्तद्व्यतिरेकिण्यपि शब्दभावना ज्ञानस्य कारणम् । कार्येपि ज्ञाने शब्दभावनास्तीति सा कार्यं पूर्वज्ञानस्य ॥१२४॥

ज्ञानेपि शब्दाकारानुगमोऽस्तीति द्रढयन्नाह—**वाग्रूपता चेत्** इति । **उत्क्रामेत्** व्यपगच्छेत् ।

१ इदं जयन्तेन न्यायमञ्जर्यां ५३२ तमे पृष्ठे रामकण्ठेन च स्पन्दकारिकासु संगृहीतम् ।

२ व्यावर्त्यते—घ १, ङ.

प्रकान्त—घ२, ङ. अवश्यं प्रकृतिरेषा पूर्वस्यापभ्रंशस्य ।

५ च सत्या°—कोशः, का०, इदमसाधु ।

६ चानुकारि°—ङ.

* निरूपणम् — ङ.

अत्यन्तमतथाभूते निमित्ते श्रुत्युपाश्रयात् ।
दृश्यतेऽलातचक्रादौ वस्त्वाकारनिरूपणा ॥१३०॥

श्रुतिरेव हि सर्वं शब्दार्थं स्वरूपपदात्मनि संनिविष्टं दर्शयति । सा तमर्थं[4] जनयतीव । स हि तस्यां प्रत्याय्यात्मना नित्यमवस्थितः । न च बाह्यवस्तुगतं सदसत्त्वं श्रुतिरपेक्षते, नापि विपर्ययाविपर्ययौ । तथा ह्यलातचक्रेपि सर्वप्रदेशव्यापिरूपा च क्रियादिशब्दरूपभावनानुगता श्रुतिरवतिष्ठमानाऽलातचक्रादिशब्दानां व्यावहारिकाणामर्थवत्तां प्रकल्पयति । तच्छ्रुतिबीजाभिमुख्ये तथाभूतनिमित्तया श्रुत्या प्रकल्पितो वस्त्वाकारः सत्यप्यनुमानबलीयस्त्वे रूढीभवति । अत्यन्तासत्सु च निर्ज्ञातेषु शशविषाणादिषु श्रुतिरेवार्थं जनयति प्रकल्पयति स्वात्मन्यवरुणद्धि । तथैवान्यान्प्रत्यक्षानर्थान् । नित्यसंनिविष्टो हि सनिबन्धनश्चानिबन्धनश्च शब्देष्वभिधेयत्वेनार्थात्मा, प्रतिपुरुषं तु भावनानुविधायिनी सत्यसति वार्थे स्वप्रत्ययानुकारेण भिन्नरूपा शब्देभ्यः प्रतिपत्तिरुपपद्यते ॥१३०॥

टी०—**प्रत्याय्यात्मना** इति । न कुण्डवदरन्यायेन······। तच्छ्रुतिबीजेति । येयं बुद्धिः चक्रे चक्राकारा तस्या अपि शब्दनिबन्धनतामाह । तया श्रुत्या पौनःपुन्येन प्रयोगाद् बीजमाहितं तस्याभिमुख्ये कार्योपजननसामर्थ्योद्भवे । आहितबीजवृत्तिलाभ इति यावत् । अलातचक्रश्रवणेऽलातबुद्धिः साऽलातचक्रशब्दप्रयोगाभ्यासाहितबीजवृत्तिलाभात् इत्याह—**तथाभूतनिमित्तया** इति । अलातश्रुतेर्बहिस्तस्याभावात् तया प्रकल्पितः स वृत्तिलाभः ।······अन्ये तु बीजवृत्तिलाभस्य बीजाभिमुख्ये सति प्रकल्पितो वस्त्वाकार इति व्याचक्षते । **अनुमानबलीयस्त्वे** इति । न हि तत्रावयवास्तावन्तो न देशा व्यापिनः, नाप्यवयवी, नापि समुदायः परिच्छिन्नमूर्त्तित्वात् । उपगृहीतैकदेशवर्तिनः तस्यानुमानादप्यसत्त्वं प्रतिपद्यते तथापि सदेव पश्यतीति । अर्थप्रकल्पनायां सामर्थ्ये शब्दस्य प्रसिद्धयन्तरमाह—**अत्यन्तासत्सु च** इति । **जनयति** इति । ततः शब्दात्तदाकारप्रत्ययस्य प्रसूतेः सोर्थस्तेन जनितः । **अर्थान्** इति । य एव तदर्थाः प्रमाणान्तरसिद्धसत्त्वाः तानपीयं न बहिः सदसत्तया प्रकाशयति, अपि तु बुद्धिप्रतिभासमानार्थाकारतया । कथं पुनर्विद्यमानबहिरर्थैव शशविषाणादिशब्दस्यार्थमवरुणद्धीति गम्यत इत्यत आह—**नित्यसंनिविष्टः** इति । सदर्थाकारबुद्धिजननेन शब्देष्वभिधेयात्मा सन्निविष्टः । यदि नित्यसंनिविष्टः तस्यैकरूपत्वात् कथमन्यथात्वोपलब्धिरिति कारणमाह—**प्रतिपुरुषम्** इति । तत्तद्भिन्नदर्शनानुरोधेन या भावनाः तदनुविधायिनी प्रतिपत्तिरुपपद्यत इति सम्बन्धः । यथा वैशेषिकस्य घटश्रुताववयविनि प्रतिपत्तिरपरेषां संघातमात्रे ॥१३०॥

१ भूत्युपाश्रयात—क १.२.७, ङ. अयमपपाठ एतेषां कोशानां समानमूलकत्वस्य प्रसाधकः । ०पाश्रया—ट, ठ.
२ यात°—क१.३.४.५.७, ङ.
३ निरूपणम्—ङ.
४ सामर्थ्यं—ट, ठ.
५ ज्ञापयतीव—घ.
६ नित्यावस्थितेन च—घ, ङ.
७ तच्छ्रुतिष्वाभि°—ट, ठ.

* २ आश्रय इति लुप्तं — घ, ङ.
३ वदेवाग्नि° — घ, ङ.
४ ऋक्° —

* ६ इत्यतोनन्तरं 'वृत्तिमतिक्रान्ते' इति प्रक्षिप्तम् — घ। वृत्तिमति इति — ङ.
७ इति त्यक्तम् — ङ.

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥१३१॥

इह द्वौ शब्दात्मानौ—नित्यः कार्यश्च । तत्र कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही । नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तःसंनिवेशी प्रभवो विकाराणामाश्रयः कर्मणामधिष्ठानं सुखदुःखयोः, सर्वत्राप्रतिहतकार्यशक्तिर्घटादिनिरुद्ध इव प्रकाशः परिगृहीतभोगक्षेत्रावधिः, सर्वमूर्तीनामपरिमाणा प्रकृतिः, सर्वप्रबोधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद्दवाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभः, तस्मिन्खलु वाग्योगविदो विच्छिद्याहङ्कारग्रन्थीनत्यन्तविनिर्भागेन संसृज्यन्ते । आह च—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥[4]१३१॥

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥१३२॥

व्यवस्थितसाधुभावेन हि रूपेण संस्क्रियमाणे शब्दतत्त्वे ऽपभ्रंशोपघातापगमादाविर्भूते धर्मविशेषे नियतोभ्युदयः । तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभां तत्त्वप्रभवां भावविकारप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुद्ध्य नियता क्षेमप्राप्तिरिति ।

टी०—परमात्मनोपि शब्दरूपतां प्रतिपादयन्नाह—**अपि प्रयोक्तुः** इति । प्रयोक्तुरात्मानमपि शब्द एवेत्याहुः । शरीरादवच्छिनत्ति—**अन्तः** इति । येन सायुज्यं समानलोकतामैकार्थ्यमिच्छन्ति । **शब्दात्मानौ** इति । द्वे शब्दरूपे विवृत्तोऽविवृत्तश्च । अविवृत्तो नित्यः विवृत्तोऽनित्यः । **व्यावहारिकः** इति । येन लोकव्यवहारः । **प्रतिबिम्बमुपगृह्णाति** इति । प्रकृतिरूपानुगमादेव । **सर्वव्यवहारयोनिः** इति । साध्यसाधनव्यवहारस्य प्रतिसिद्धान्तं च पदपदार्थभेदव्यवहारस्य योनिः कारणं तन्निबन्धनत्वात्सर्वप्रवादानाम् । **अधिष्ठानम्** इति । तस्यैवानुग्रहोपघाताभ्यां सुखदुःखे उत्पद्येते । स एव फलानां भोक्तेति यावत् । **घटादिनिरुद्ध इव** इति । यथा बहिरवस्थितपदार्थप्रकाशनशक्तिरपि प्रदीपप्रकाशो घटेनावरुद्धत्वादन्तश्चरिष्णुः बहिरवस्थितरूपप्रकाशने प्रतिहतशक्तिः तथासावपि परिगृहीतभोगक्षेत्रावधिः । भोगाय क्षेत्रं शरीरं तदेवावधिः । तेनान्यत्र न भोगः । तच्छब्देन परिगृहीतं तद्द्वारेण तस्य सुखदुःखानुभव इति । **अपरिमाणा** इति । अपरिणामेपि कारणस्य परिमितत्वे किंचित्कदाचिदुत्पद्य क्षीयेतेति कारणस्यापरिमाणतामाह । तेन सर्वदा मूर्तीनामुत्पादेपि नास्ति क्षय इति ॥१३१॥

१ मश्नुते
२ आश्रय इति लुप्तं—घ, ङ.
५ ससद्ब्रह्मा°—घ, ङ.
६ इत्यतोनन्तरं 'वृत्तिमतिक्रान्ते' इति

* ५ एते त्रयश्लोका उदीच्येषु कोशेषु का-　　* ९ वाचो — क १.२, ख, घ, ङ । वान्ते — ग २.

आह च—

प्राणवृत्तिमतिक्रान्ते वाचस्तत्त्वे व्यवस्थितः ।
क्रमसंहारयोगेन संहृत्यात्मानमात्मनि ॥१॥
वाचः संस्कारमाधाय वाचं ज्ञाने' निवेश्य च ।
विभज्य बन्धनान्यस्याः कृत्वा तां छिन्नबन्धनाम् ॥२॥
ज्योतिरान्तरमासाद्य च्छिन्नग्रन्थिपरिग्रहैः ।
पैरेण ज्योतिषैकत्वं छित्वा गन्थीन्प्रपद्यते ॥३॥१३२॥

न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते ।
वीजं सर्वागमापाये त्रय्येवातो' व्यवस्थिता ॥१३३॥

टी०—**तस्मात्** इति । यत एव तद्यथोपदर्शितं माहात्म्यं शब्दस्य । **शब्दसंस्कारः** इति । अपभ्रंशावेवित्तोन्यः । **सिद्धिः** इति । सिद्ध्युपायः सिद्धिः । **परमात्मनः** इति । नित्यस्य ब्रह्मणः । **कथं** पुनः सिद्धिरेव सामानाधिकरण्येन शब्दसंस्कार इत्युक्तेस्याह—**तस्य** इति । शब्दब्रह्मणः । **प्रवृत्तितत्त्वज्ञः** इति । प्रवृत्तिः क्रिया, ते च षड्भावविकाराः तेषां तत्त्वमेव सत्ता प्रतिभाख्या तां यो जानाति । **अश्नुते** इति । तेनैकीभवति । ततः पारम्पर्येण सिद्धेः हेतुत्वात् संस्कारः सिद्धिः ।

प्रतिभामवबुध्येति सम्बन्धः । **तत्त्वप्रभवाम्** इति । यदास्या भेदा असत्त्वभूता इति निश्चयः, ततः प्रतिभोत्पद्यत इति । स्वभावचरणाभ्यासादिभ्योपि सा जायत इत्यवच्छिनत्ति—**सत्ताम्** इति । सत्तानुगुण्यमात्रात् तस्या उद्भवः । **विकारप्रकृतिम्** इति । यतः सत्ता भावविकाराणां षण्णां प्रकृतिरेव । तज्जातिसमुद्देशे वक्ष्यति । **साध्यसाधनेति** । एतावद्धि जगद्यदुत साध्यं साधनं च । तदभिनिर्वर्त्यमानसामर्थ्यं च तत् ।

प्राणवृत्तिम् इति । बुद्धौ प्राणे च वाचोऽवस्थानम् इत्युक्तम् । यच्च प्राणवृत्तिमतिक्रान्तं तस्य दूरीभूतेव करणवृत्तिरिति भेदरूपस्यासत्यतावबोधात् प्राणवृत्तिमतिक्रान्तमिति बुद्धिस्थ एव शब्दो व्यवस्थितः । तत्रापि शब्दात्मा प्रत्यवभासमानो गृहीतक्रम इत्यवभासत इत्यवच्छिनत्ति—**क्रमसंहारेति** । **आत्मनि** इति बुद्धौ । **ज्ञाने** इति । सर्वां वाचं ज्ञान एव स्थापयति । वाचं करणात्प्राणे प्रत्यर्पयति प्राणाद्बुद्धाविति कथयति । **बन्धनानि** इति । अविद्याहङ्कारादीनि । **ज्योतिरान्तरेति** । ज्ञानविशेषमासाद्य । **छिन्नग्रन्थिपरिग्रह** इति । विकारपरिग्रहच्छेदात् । **परेण** इति । यत्तत्त्वान्तरं ब्रह्म । **छित्त्वा** इति । उक्तोप्यर्थः पुनरुपायभावेनोपात्तः ॥१३२॥

१ वाचः स्थाने—का०.
२ °परिग्रहम्—का०. विचारासहोपपाठः. अहो अस्य संस्कर्तुर्लेखकेषु गौरवम् । प्रत्यवायाभियेव तदीयेषु विन्यासेषु शङ्कां परिहरति ।
३ कारणज्यो°—क१.२.३.४.५, ख.
४ प्रवर्तते—क१.२.३.४.५.७, ख.
(५) रिकासु मध्ये प्रक्षिप्ता दृश्यन्ते ।
६ चात्मकर्तृकं—ट, ठ, टीका.
७ किञ्चिदा°—घ, ङ । कश्चिदा°—का०
८ गमोपाये—क२.४.५.७, ख, घ, ङ. एवं चोपायशब्देन किं कार्यम् । तमन्तरेणार्थावगतेः ।

* ६ कर्म — ग २. — Not according to Rau

सर्वप्रवादेष्वागमवाक्यानां प्रणेतृपरिग्रहेण पौरुषेयत्वमभ्युपगम्यते । । वेदवाक्यानि तु चैतन्यवदपौरुषेयाणि । तान्यागमान्तराणां प्रणेतृषु विच्छिन्नेष्वागमान्तरानुसन्धाने बीजवदवतिष्ठन्ते ॥१३३॥

अस्तं यातेषु वादेषु कर्तृष्वन्येष्वसत्स्वपि ।
श्रुतिस्मृत्युदितं धर्मं लोको न व्यतिवर्तते ॥१३४॥

इह प्रणेतृवदागमानामपि प्रवादेषु विच्छेदो[ना]भ्युपगम्यते । तेषु प्रत्यस्तमितेषु यावदन्ये प्रणेतारो नोत्पद्यन्ते, आगमान्तराणि च न प्रतायन्ते, तत्राप्यन्तराले श्रुतिविहितानि कर्माणि स्मृतिनिबन्धनांश्च भक्ष्याभक्ष्यादीन्नियमान्नातिक्रामन्ति शिष्टाः ॥१३४॥

ज्ञाने स्वाभाविके नार्थः शास्त्रैः' कश्चन विद्यते ।
धर्मो ज्ञानस्य हेतुश्चेत्तस्याम्नायो निबन्धनम् ॥१३५॥

अनुपदेशं हि कस्य चिज्ज्ञानमभ्युपगच्छतामहितप्रतिषेधार्थानां हितप्रतिपादनार्थानां चोपदेशशास्त्राणां वैयर्थ्यं प्रसज्यते । यदि हि धर्मविशेषात्कस्य चिदेव पुरुषस्योपदेशमन्तरेण ज्ञानमुत्पद्यते, केचित्तु पुरुषाः शास्त्रेण प्रतिपादयि-

ननु च वेदादेषां साधूनां धर्मसाधनत्वमपवर्गहेतुता चाऽऽगमप्रामाण्येन स्थाप्यते, आगमान्तराण्यपि कापिलादीनि सन्ति, तेष्वेतत्सिद्धमित्याह—**न जातु** इति । न हि कश्चिद्वादी सांख्यादिः स्वमागममपौरुषेयं प्रतिपद्यते । पौरुषेयत्वाच्चासंभावनीयं प्रामाण्यमस्य ॥१३३॥

तस्मादागमं प्रणेतारो विच्छिद्यन्ते नागम इत्याह—**अन्तं यातेषु** इति । यदा प्रणेतारो ह्रसन्ति । **श्रुतिविहितानि** इति । यज्ञानातिष्ठन्ति । **स्मृतिनिबन्धनान्** इति । शाब्दमशब्दं वा स्मरणमङ्गीकृत्य । **शिष्टाः** इति । तेपि कपिलादयः तत एव तेषु कर्मसु प्रवृत्तवन्तः ॥१३४॥

तैरपि कपिलादिभिरविच्छिन्नो वेदाख्य आगमोऽभ्युपगन्तव्य इत्याह—**ज्ञाने स्वाभाविके** इति । ते ह्यागमप्रणयनादेवात्मनो ज्ञानातिशयमङ्गीकुर्वन्ति । तच्च ज्ञानं तेषां यदि स्वाभाविकं तदन्येषामितरथैवेत्यनर्थकं शास्त्रप्रणयनम् । **धर्मो ज्ञानस्य** इति । तत्रैतत्स्यात्—येषां धर्मानुग्रहः तेषामेव ज्ञानातिशयः । ते चागमानां प्रणेतारः न तु गृहीतकर्माणो मन्दावबोधाश्चेति । **तस्याम्नायः**

१ आगमान्तरान—इत्येतावद् घ, ङ) कोशगतं शब्दस्वरूपम् ।
२ अन्तं—ग१.४, ट, ठ. टीका. [Not according to Rau]
३ वेदेषु—ग१.३.५.
४ °न्येषु—क१.२.३.४.५.७, ख, ग, १.३.४. घ, ङ । °न्येष्व – ग२.
५ स्मृतिगतं—क१.२.३.४.५.७, ख, का०.
७ प्रतीयन्ते—घ, ङ. लेखकप्रमाद एवायम् ।
८ कोर्थः—क१.२.३.४.५.७, ख.
९ शास्त्रे—ग१.२.३.४, घ, ङ. अत्र तृतीयान्तः प्रयोग एव व्यवहारमनुपततीति नागोचरं कुशलानाम् ।
१० पादितार्थां°—घ, ङ.
११ इत्यतोनन्तरं 'हि' इत्याधिकम्—घ, ङ.

* ३ °आतीतिष्ठति— ग १.२.३.४.
४ अथवा— घ, ङ. लेखकप्रमाद एवायम् ।

* १० पा. ४/१/९२॥
११ पा. १/४/३२॥

तव्याः, तदा तस्य पुरुषविशेषहेतोर्धर्मस्य व्यवस्थितेन निबन्धनेन भवितव्यम् । विच्छिद्यन्ते चान्यानि निबन्धनानि । तस्मादाम्नायनिबन्धनं धर्ममासेवमानाः पृथक्प्रवादानां प्रणेतारस्तां तां बहुविकल्पां[२] सिद्धिं लभन्ते ॥१३५॥

वेदशास्त्राविरोधी च तर्कश्चक्षुरपश्यताम् ।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते ॥१३६॥

आगमवाक्यानामेव हि शब्दार्थप्रविभागव्यवस्था तर्केण क्रियते । स चायमर्वाग्दर्शनानामनुग्रहे वर्तत इति पूर्वैर्न्यायविद्यास्वित्थम्भूतस्तर्क आश्रितः । तत्र यावाननुगम्यमानस्तर्कः स्वशास्त्रं न बाधते तावाननुगन्तव्यः । तर्कातीतमपि बहुश्रद्धानुगम्यं सर्वेषु शास्त्रेषु दृश्यते । अथ तर्काननुगमेन यः केवलमागमं प्रमाणं करोति तस्य किं प्रयोजनम् । आगमवाक्यानां सम्यक्-प्रतिपत्तिः प्रयोजनम् । वाक्यानां हि तुल्यरूपत्वेऽपि सति निमित्तान्तराच्छक्तिर्भिद्यते । तत्र यो रूपादेव केवलाद्वाक्यार्थं प्रतिपद्यते प्रकरणसामर्थ्यादि नापेक्षते[५] स विवक्षिताविवक्षितयोः संमोहमापद्यते ॥१३६॥

सतो[६]ऽविवक्षा पारार्थ्यं[७] व्यक्ति[८]रर्थस्य लैङ्गिकी ।
इति न्यायो बहुविधस्तर्केण प्रविभज्यते ॥१३७॥

कर्तुरीप्सिततमं कर्म[९], तस्यापत्यम्[१०], ग्रहं सम्मार्ष्टि, कर्मणा यमभिप्रैति स सम्प्रदानम्[११],

(टी०) इति । स एव धर्मस्तेषां वेदमन्तरेण कुतः । निबन्धनानि इति । वैशेषिकादिनिबन्धनो ज्ञानविशेषः ॥१३५॥

एवमवस्थापिते आगमप्रामाण्ये तीर्थिकान्तरकल्पितस्य च तर्कस्याप्रामाण्येऽभिप्रेतं तर्कप्रामाण्यं कथयति—तर्कश्चक्षुः इति । वेदशास्त्राविरोधी च इति । तीर्थान्तरप्रकल्पिततर्कं व्युदस्य वेदार्थव्यवस्थापकस्य मीमांसास्थापितस्य श्रुतिलिङ्गादेः प्रामाण्यमुद्भावयति । अपश्यताम् इति । श्रुतिमात्रादसमर्था वेदार्थान्द्रष्टुम् । पूर्वैः इति । जैमिन्यादिभिः । न्यायविद्यासु इति । मीमांसादिषु । इत्थम्भूतः इति । शब्दोपात्तार्थाविपरीतप्रतिपत्तिहेतुः । भिद्यते इति । तदेव शब्दरूपमन्यत्र प्रयुज्यमानं भिन्नार्थमवसीयते । संमोहम् इति । न जानाति किमिह विवक्षितं किं वाऽविवक्षितम् इति ॥१३६॥

१ वा—घ, ङ. अत्र वीप्सार्थ एव युक्तः, समुच्चयो विकल्पो वा नेति नात्र बहु समीक्षणीयमस्ति ।
२ कल्पां—घ, ङ. मन्येऽत्र प्रमादता लेखकेन विशब्दस्त्यक्तः । विकल्पशब्द एव प्रकारार्थमभिधत्ते न कल्पशब्दः ।
३ °आतितिष्ठति—ग१.२.३.४.
५ नापेक्ष्यते—घ. अपपाठः.
६ यतो—क२.३.४.५ ख, का०.
७ वागर्थां—क२.३.४.५, ख, घ१, ङ. अपपाठः.
८ वृत्तिर°—ट, ठ, टीका.
९ पा० १।४।४९॥

* २ क० सं. (२३/७). तत्र विसृजते इति पाठः.

* अक्ता उपदध्यात् तेजो घृतम् इति श्रूयते ।

स्त्रियं ये चोपजीवन्ति प्राप्तास्ते मृतलक्षणम् ।

इति लिङ्गसंख्याकालानामविवक्षा, क्वचिच्च विवक्षेति लक्षणव्यवस्थापनं तर्काधीनम् । तथा[१] च । नक्षत्रं दृष्ट्वा वाचं विसृजेत्[२] इति कालोपलक्षणार्थं नक्षत्रदर्शनं तत् । प्रधानस्यान्यथासिद्धौ परार्थत्वात् दृश्यमानेषु ज्योतिःषु कालविशेषपरिच्छेदे सति तत् क्रियते । काकेभ्यो दधि रक्ष्यतामित्युपघातप्रतिषेधस्य चिकीर्षितत्वात्काकेष्वसत्स्वपि श्वादिभ्यो रक्ष्यते । पात्राणि संमृज्यन्तामिति भुजिक्रियाङ्गोपसंहारपरत्वात्पात्राभावेप्यङ्गान्तराण्युपसंह्रियन्ते । लैङ्गिकी[३] खल्वपि व्यक्तिः । अक्ताः शर्करा उपदधाति[४] इति सर्वाञ्जनद्रव्यप्रसङ्गे तेजो वै घृतम्[५] इति लिङ्गाद्विशेषप्रति-

टी०—तदेवोदाहरणैकदेशेन प्रतिपादयति—सतोऽविवक्षा इति । शब्देनोपात्तस्याप्यर्थस्याविवक्षा । पारार्थ्यम् इति । शब्दोपात्तस्यार्थस्योपलक्षणता । लैङ्गिकी इति । शब्दसामान्येनावसीयमानस्य वाक्यान्तरप्रकल्पनेन विशेषाभिव्यक्तिः ।

ईप्सिततमम् इति । नपुंसकलिङ्गस्य शब्दप्रतिपादितस्यापि नान्तरीयकत्वेनोपादानाद्विवक्षा नास्ति । स्त्रीपुंसयोरपि·········कटं करोति । तथा कर्तुरीप्सिततममिति एकत्वसंख्याऽविवक्षिता । तेन कर्त्रोः कर्तॄणां च ईप्सिततमयोरिति तत्रापि कर्मत्वम् । देवदत्तौ यज्ञदत्तादयश्च घटौ घटान् कुरुतः कुर्वन्ति इति । ईप्सितशब्देपि यदीच्छार्थः मत्यर्थः 'मतिबुद्धिपूजार्थेभ्यः' इति वर्तमाने तस्याप्यविवक्षा । तेन यच्चेष्यमाणं यच्चेष्टं घटं करिष्यत्यकार्षीदिति तत्रापि कर्मसंज्ञा । अथ भूते तस्याविवक्षायां वर्तमानभविष्यतोरपि सिद्धा । तस्यापत्यम् इति । भाष्य एव चोदितम्—पुँल्लिङ्गेन चायं निर्देशः, एकत्वेन चेति । तथा चापत्यमिति नपुंसकैकवचनम् । तयोरविवक्षा । ग्रहं संमार्ष्टि इति । सोमपात्रस्य संज्ञा ग्रह इति । तत्र संख्याया अविवक्षा, ततो बहूनामपि संमार्गः । कर्मणा यम् इति । लिङ्गसंख्याकालानामविवक्षायाम् । यो यां वाऽभिप्रैष्यत्यभिप्रागाद्वा तत्र सर्वत्र सिद्धा सम्प्रदानसंज्ञा । उपजीवन्ति इति । कालस्याविवक्षायाम् । ये उपजीविष्यन्ति ये चोपाजीविषुस्ते । 'गर्भाष्टमे ब्राह्मणमुपनयीत' इति लिङ्गस्य विवक्षा । तेन स्त्रीनपुंसकयोर्नोपनयः । 'पशुना यजेत' इति ङ्याप्प्रातिपदिकात् इति संख्याया विवक्षा । तेन द्विबह्वोः कार्यं न क्रियते । 'तेन दीव्यति खनति जयति जितम्' इति कालस्य विवक्षा ।

पारार्थ्यस्योदाहरणं नक्षत्रम् इति । शब्दोपात्तो हि वाग्विसर्गो नक्षत्रदर्शनपूर्वकः, तत्र नक्षत्रदर्शनेन काल उपलक्ष्यते । यदा नक्षत्रमुदेति तदा वाचंयमेन वाग्विसर्गः कर्तव्य इति । अन्यथा सिद्धौ इति । यदा प्रच्छन्ने नभस्यन्यत एव कालावगतिः । पात्राणि इति । भुजिक्रियाङ्गोपसंहारेऽभिसंहिते तदङ्गोपलक्षणार्था पात्रश्रुतिः ।

अथाविवक्षातः पारार्थ्यस्य को विशेषः । अविवक्षायां शब्दोपात्तस्य नान्तरीयकमुपादानमिति न तस्योपयोगः । पारार्थ्ये त्वन्योपलक्षणार्थतेति ।

१ तथथा—घ, ङ. पारार्थ्यमेव विषयीकृत्य नक्षत्रमित्याद्युदाहरणमुपन्यस्तम् ।
३ लौकिकी—घ, ङ.
४ तै० ब्रा० ३.१२.५।१२॥ तत्र शर्करा

* विन्यस्तम् । * ८ मित्युच्यते— घ, ङ.

पत्तिरित्येवंप्रकारो न्यायस्तर्केण प्रविभज्य लक्षणं व्यवस्थाप्यते ॥१३७॥

शब्दानामेव सा शक्तिस्तर्को यः पुरुषाश्रयः ।
शब्दाननुगतो न्यायोऽनागमेष्वनिबन्धनः॥ १३८॥

शब्द एवोपदेष्टा तत्सामर्थ्यमेवानुगच्छन्तो वक्तारो योग्यशब्दनिबन्धनेनैव विवक्षया प्रवर्तन्ते । नियतां तु शब्दशक्तिमर्थप्रकरणलिङ्गवाक्यादिभिरनुगच्छति पुरुषे शब्दाश्रितमेव सामर्थ्यं पुरुषाश्रयोयं तर्क इति मन्यन्ते । शब्दशक्तिरूपापरिगृहीतस्तु साधर्म्यवैधर्म्यमात्रानुसारी सर्वागमोपघातहेतुत्वादनिबन्धनः शुष्कस्तर्क इत्युच्यते । तद्यथा ।

यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेत् ॥[8]

शब्देन वाच्यमित्युक्ते द्रामिलकेन भवीत वक्तव्यम् इति ॥१३८॥

टी०—अञ्जनेन सर्वस्य स्नेहद्रव्यस्य सन्निधाने 'तेजो वै घृतम्' इति वाक्यं घृतस्य तेजसि ······कथयति । व्यक्त्या च लिङ्गेन घृतमेव तेजोनुग्रहायोपादीयते ॥१३७॥

अयमर्थप्रकरणादिर्विभाग: शब्दसमय एवेति न पुरुषैः शक्तिमनपेक्ष्य कल्प्यत इति कथयति—**शब्दानामेव** इति । **शब्दानुगतः** इति । शब्दमनुगतः शब्दशक्त्यनुसारेणावस्थापितो यः स एव न्याय इति द्रष्टव्यः । **अनागमेषु** इति । आगमनिरपेक्षेषु पुरुषेषु । येषु चार्थेष्वागमो वेदाख्यो नास्ति । **अनिबन्धनः** इति । निर्विषयः । शब्दावस्थिता शक्तिस्तस्य विषयः ।

शब्द एव इति । नान्यस्यार्थप्रतिपादनसामर्थ्यमनुमानादेः । **शुष्कस्तर्कः** इति । आगम उपोद्बलको यस्य नास्ति स प्रतिपत्तिप्रसरसामर्थ्यविरहाच्छुष्कस्तर्कः शुष्ककाष्ठवत् । तं च दर्शयति—**यदुदुम्बरवर्णानाम्** इति । अन्यत्र हेतुभूयस्त्वे फलभूयस्त्वमिति । तत्र यदि मद्यपानात् सौत्रामण्यां फलं मद्यघटशतपानात्ततोपि भूयः फलं स्यात् । न च तथेत्यागमोपघाती शुष्कस्तर्कः । आगमेन च सौत्रामण्यां प्रतिनियतानि यान्यङ्गानि विहितानि तानीति नातिप्रसङ्गः । **द्राविडकेन** इति । साधुभिः शब्दैर्वाच्यमिति यद्यर्थप्रतिपत्त्यर्थमेतत् साऽर्थप्रतिपत्तिर्द्राविडकृतेष्वपभ्रंशेष्वविशिष्टा । अथ निष्प्रयोजनमेतदभ्युपेयते द्राविडकृते तत्तुल्यम् । अभ्युदयहेतुत्वमप्यनिवन्धनमविशिष्टमुभयोरिति शुष्कस्तर्कः । आगमस्तु न म्लेच्छितवै नापभाषितवै इति प्रत्यवायहेतुतामपभ्रंशानामाह ॥१३८॥

१ °स्तत्कार्यः—क२, ख, घ, ङ । °क्रियैरकार्यः—क१.४.५.७.

२ स शब्दानुगतो—क २.१.४.५.७, ख, घ, ङ, ट, ट । शब्दाननुगतो ग१.२.३.४ । अयमेव पाठो विवरणानुकूलः ।

३ °देशः—घ.

४ °बन्धनं तैर्वि०—घ, ङ. संशोध्य विन्यस्तम् ।

५ °विवक्षायाः—घ, ङ.

६ गच्छान्ति—घ, ङ । °गच्छति—ट, ठ. ।

७ कृतं—ट.

८ इदं व्याकरणमहाभाष्ये १।१।१॥ इत्यत्रोदाहृतम् । उदीच्येषु कोशेष्वस्य कारिकासु प्रक्षेपः ।

९ मित्युच्यते— घ, ङ.

What do ट, ठ read?

* प्रतीयताम् — ग २.४ (वाराणसेयसंग्रह) * ६ °मागते — क २.३.४.५.७, ख, घ, ङ. व्यक्तमपपाठः ।

रूपादयो यथा दृष्टाः प्रत्यर्थं[1] यतशक्तयः ।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु ॥१३९॥

ज्ञाने शास्त्रपूर्वके वा प्रयोगेभ्युदय इत्यागमात्प्रतिपन्नानामुपपत्तिमात्रमागमस्यैवोपोद्बलकमित्युच्यते । इहैषां रूपरसगन्धस्पर्शानां प्रत्येकं समुदितानां च दृष्टादृष्टफलाः प्रत्यर्थं यताः शक्तयः परिगृह्यन्ते । दृष्टफलास्तावद् विषौषधययस्कान्तवनस्पतिप्रभृतीनाम् । अदृष्टफला[2] मद्यतीर्थोदकादीनाम् । शब्दानामपि केषाञ्चिदुच्चारणे विषापहरणादि दृष्टं फलमुपलभ्यते । तथा सूक्तादीनामभ्यासादभ्युपगम्यते विशिष्टमदृष्टं फलम् ॥१३९॥

यथैषां तत्र सामर्थ्यं धर्मेप्येवं प्रतीयताम्[3] ।
साधूनां साधुभिस्तस्माद्वाच्यमभ्युदयार्थिनाम्[4] ॥१४०॥

सन्ति चेह दृष्टफलाः काश्चित्प्रतिशब्दं शक्तय इत्यागमादेवावसीयते । सत्यागमे साधूनामपि तथैवावसीयतां धर्मसाधनत्वमित्यतोभ्युदयार्थिभिरनतिशङ्कनीयां स्मृतिमविच्छिन्नशिष्टसमाचारां परिगृह्य व्यवहारे साधव एव शब्दाः प्रयोक्तव्याः ॥१४०॥

सर्वोऽदृष्टफलानर्थानागमात्प्रतिपद्यते ।
विपरीतं च सर्वत्र शक्यते[5] वक्तुमागमे[6] ॥१४१॥

टी०—**रूपादयः** इति । रूपरसगन्धस्पर्शाः । **शब्दाः** इति । अयमपि दृष्टान्त एव समानजातीयः । विषापहरणस्वर्गगमनादिकार्यजनका यथा शब्दा इति । दार्ष्टान्तिकमुत्तरश्लोकेन दर्शयिष्यति । **प्रत्येकम्** इति । तुल्ये रूपत्वे नीलं चक्षुषोऽनुग्राहकं भास्वरत्वं तूपघातकम् । तथा तुल्ये रसत्वे मधुरः श्लेष्माणं जनयति कटुकः पित्तमिति दृष्टफलाः । **अदृष्टफलाः** इति । यथा तुल्ये रूपयोगेऽजः श्वेतगुण एवालभ्यते वायव्यः । **मद्यतीर्थोदकादीनाम्** इति । मद्यस्पर्शादिभिरधर्मः, स्वतीर्थोदकं तु धर्माय । **केषांचित्** इति । अथर्ववेदपठितानां मन्त्राणाम् । यद्यपि चार्थप्रतिपादने मन्त्राणामङ्गता तथापि तेऽर्थास्तैरेव शब्दैः प्रत्याय्यमाना विषं हरन्ति नान्यैः ॥१३९॥

टी०—उक्ते निदर्शनान्याह—**तत्र** इति । स्वस्मिन्कार्यविशेषे । **धर्मेपि** इति । धर्मे साधूनामेव सामर्थ्यमिति सम्बन्धः । **अविच्छिन्नेति** । अविच्छिन्नः शिष्टैः समाचारो यस्याः । ते हि साधूनेव प्रयुञ्जते नासाधूनित्याचरितः तैर्व्यवहारः ॥ १४० ॥

१ प्रत्यर्थ—क२.४.५,ख.

२ दृष्टफलानां-घ, ङ । अदृष्टफलानामद्य° इत्येवंरूपो विन्यासः—ट, ठ. संशोध्य तु पठितम् ।

Not according to Ram ३ प्रतीयते—क२.३.४.५.७,ख,ग१,घ,ङ । (कोशेपि) अयमेव विवरणानुकूलः पाठः । विधीयताम्—ग२.

४ °र्थिभिः—का०. अस्माभिस्तु नैकस्मिन्कोश उपलब्ध इति नोपात्त एष पाठः.

५ दृश्यते—क२,ख Not according to Ram

६ °मागते—क२.३.४.५.७,ख,घ,ङ. व्य

* ६ श्रुतिनिबन्धं — घ | अत्र कोशे   * २. उभयमसाधु |

तत्र केचिदाहुः—यथैषां विषापहरणादिषु सामर्थ्यमधर्मेऽप्येवं कस्मान्न प्रतीयते। एतस्मादेव दृष्टान्तादस्तु शक्तिविपर्ययप्रतिपत्तिरिति। एतस्मिन्पर्यनुयोगे प्रतिविधीयते—सर्वेष्वागमेषु दृष्टादृष्टफलासु प्रतिपत्तिषु विपरीतफलप्राप्तिः शक्यते प्रसङ्क्तुम्। तस्मादागमं कंचित्प्रमाणीकृत्य व्यवस्थिते तस्मिन्या काचिदुपपत्तिरुच्यमाना प्रतिपत्तावुपोद्बलकत्वं लभते ॥१४१॥

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ॥१४२॥

यथैव भक्ष्याभक्ष्यगम्यागम्यवाच्यावाच्यादिविषया व्यवस्थिताः स्मृतयः यासु निबद्धं समाचारं शिष्टा न व्यतिक्रामन्ति तथेयमपि वाच्यावाच्यविशेषविषया व्याकरणाख्या स्मृतिः। स्मृतो ह्यर्थः पारम्पर्यादविच्छेदेन पुनः पुनर्निबध्यते। प्रसिद्धसमयाचारायां च स्मृतावनिबन्धनशब्दायां शिष्टसमाचाराविच्छेदेनैव स्मर्यते ॥१४२॥

अदृष्टफलान् इति। अदृष्टं फलं येषामर्थानां क्रियाङ्गानुष्ठानानां दानहिंसादीनामिति। **आगमात्** इति। प्रत्यक्षादीनां तत्राप्रवृत्तेः। **सर्वत्र** इति। सर्वागमेष्वदृष्टफलजनकत्वं शक्यते तर्केणाध्यारोपयितुम्।

उत्तरपक्षस्थानीयस्य श्लोकस्य पूर्वपक्षं दर्शयति—**तत्र केचित्** इति। **अधर्मेऽपि** इति। शक्तिप्रतिनियममात्रमवसीयते न विशिष्टकार्यजनकत्वेऽन्यसाधकत्वमनुमीयते। **प्रतिपत्तिषु** इति। ज्ञानाद्यनुष्ठानेषु। तत्रागमं कश्चित्प्रमाणीकृत्य शक्तिप्रतिनियमदर्शनमुपोद्बलकम् ॥१४१॥

कः पुनरसावागम इति श्रुतिस्मृतिरूपत्वादागमस्य स्मृतिरूपमुपन्यस्यति—**साधुत्वज्ञानविषया** इति। साधुत्वज्ञानं विषयो यस्याः, तत्कार्यत्वाद्विषय उक्तः। **अविच्छेदेन** इति। समाचारस्येत्युपस्कारः। **निबन्धनम्** (?) इति। स्थितम्। एतदाह—तत्रापि नोच्यते—पञ्च पञ्चनखा भक्ष्यमाणा धर्मायाधर्मायान्ये इति, केवलमिदं भक्ष्यमित्युच्यते। अथ चास्मादेव नियमाद्धर्माङ्गताऽवसीयते। यतो नेदं वचनं क्षुदपनयनाय श्वमांसादिष्विति तुल्यत्वात्क्षुत्प्रयुक्तत्वाच्च विधीयते। यतो नापीदं वचनमनर्थकं व्यवस्थितप्रामाण्यत्वात् स्मृतीनाम्। तथेहाप्येते साधवोऽमी नेति केवलमुच्यते न चायमुपदेशोऽर्थप्रयुक्तत्वात्। न तत्र विधिः। न चानर्थक्यं स्मृतित्वादस्येत्यभ्युदयाङ्गतैवास्य। विनापि शब्दोपनिबन्धनं स्मरणमेव प्रमाणम्। यथाह—**अनिबन्धनशब्दायाम्** इति। न विद्यते निबन्धनः शब्दो यस्यां स्मृतौ। **स्मर्यते**। अर्थ इति प्रकृतं संबन्धनीयम् ॥१४२॥

१ किञ्चित् घ, ङ.
२ सेयं—ग २.
३ शिष्याणामिदं—क७. — not Raw
४ व्याकरणं धनम्—क १.३.४.५.७, ख, घ, ङ. — Not Raw
५ साधु—कोशः. इदमपभ्रष्टमिति शोधितम्।
द्विशावृत्तो वाच्यावाच्यादिविषया इत्यादि र्व्यतिक्रामन्तीत्यन्तो ग्रन्थः। तत्र पूर्वत्र विन्यासे श्रुतिपदं नोपात्तम्। ङ—संज्ञे कोशान्तरेऽपि न दृश्यते।
°निबन्धनं—ट, ठ.
७ शब्दाध्युष्ट°—घ,१ङ। शब्दादीष्ट°—घ

* ३-३ 'प्राति°—°शक्तिः' अयं ग्रन्थः काशि-

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥१४३॥

परैः संवेद्यं यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी। श्लिष्टा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च। तथा याऽक्षे या दुन्दुभौ या वेणौ (या) वीणायामित्यपरिमाणभेदा। मध्यमा त्वन्तःसंनिवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना। सा तु सूक्ष्मप्राणवृत्त्यनुगता क्रमसंहारभावेऽपि व्यक्तप्राणपरिग्रहैव केषाञ्चित्। प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः पश्यन्ती। सा चलाचला प्रतिलब्धसमाधाना चावृता विशुद्धा च, सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च, परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमाणभेदा। तत्र व्यावहारिकीषु सर्वासु वागवस्थासु व्यवस्थितः साध्वसाधुप्रविभागः पुरुषसंस्कारहेतुरेकेषाम्। परं तु पश्यन्तीरूपमन-

टी०—एवं स्मृतित्वे प्रामाण्यं व्याकरणस्मृतेराख्याय सर्वशब्दनिबन्धनत्वमाह—**वैखर्याम्** इति। **एतद्** इति व्याकरणम्। अद्भुतमाश्चर्यं परं पदमिति सम्बन्धः। अनेकप्रकरणस्य शब्दराशेरास्पदं प्रतिष्ठेत्याश्चर्यमेतत्। **अनेकतीर्थभेदायाः** इति। वैखरीमध्यमापश्यन्तीनामनेकमार्गभेदकृतामाह। **त्रय्याः** इति। त्रयोऽवयवा वैखर्यादयो यस्या इति त्रयी। **परम्** इति। उत्कृष्टम्। **पदम्** इति तत्सारत्वात्। **संवेद्यम्** इति। परिच्छेद्यं करणस्थशब्दमाह प्राणाद्बुद्धेश्च व्यवच्छेदाय। चिह्नादेरनुमानादपि स्यात्, न त्वेवमित्याह—**श्रोत्रविषयत्वेन** इति। श्रोत्रग्राह्यत्वेनेति। श्रोत्रग्राह्येण रूपेण यत्संवेद्यते। **प्रतिनियतम्** इति। विशिष्टानुपूर्वीनियतं पदान्तरव्यवच्छिन्नम्। **श्लिष्टा** इति। अव्यक्ताक्षरा। **व्यक्तवर्णे**ति। व्यक्तवर्णसमुच्चारणं यस्याम्। **प्रसिद्धसाधुभावा** इति। व्याकरणस्य तद्विषयतामाह। **याऽक्षे** इति। शकटाक्षेऽपि परिवर्ततेऽयं शब्दः।

ननु वाचो भेदकथनमेतत्, न तु शब्दमात्रभेदकथनम्। तत्कथं शकटाक्ष उपात्तः। उच्यते—अर्थवाददर्शनादिदमुपात्तम्। एवं हि श्रुतौ पठ्यते। मध्यमामाह—**अन्तःसंनिवेशिनीम्** इति। **परिगृहीतक्रमेव** इति। यतस्तस्यां बुद्धौ विशिष्टक्रमपरिग्रहेण प्रत्यवभासत इव शब्दः। एकत्वाद्बुद्धेस्तदव्यतिरेकाच्च शब्दस्यैवशब्दः। **बुद्धिमात्रोपादाना** इति। बुद्धिमात्रमुपादानं कारणं यस्याः। अन्तःसंनिवेशित्वे क्रमवत्तायां परमार्थतश्चाक्रमत्वे हेतूपदर्शनमेवैतत्। बुद्धिस्थत्वात् अन्तःसंनिवेशित्वं क्रमादाकारेण प्रत्यवभासनात् क्रमवत्त्वमेकबुद्धितत्त्वादव्यतिरेकादक्रमत्वम्। **सूक्ष्मया** इति। अनु-

१ °स्त्रयी—क२,ख,घ१,ङ.
२ इति न पठितम्—घ, ङ. कोशान्तरयोस्तु धृतम्। नागेशोऽपि इमां कारिकां व्याचक्षाणः श्लिष्टव्यक्तवर्णरूपा प्रसिद्धसाधुभावापभ्रष्टा दुन्दुभिवेणुवीणादिशब्दरूपा चेत्याह।
केन संस्कर्त्रा मध्यमास्थयाऽन्तःपातितया योजित इति विमर्शं तस्य वैदुष्यस्य।
४ प्रतिसमाधाना—घ, ङ.
प्रतिलब्धसाधना—ट.
५ व्यवस्थितसाध्वसाधुप्रविभागा—का०. इदं प्रमत्तपठितावातिरिच्यते।

* ६ सैवं- क ४.५.७, ख । सेयं - घ, ङ. * विपर्यासेन दृश्यते ।

पभ्रंशमसंकीर्णं लोकव्यवहारातीतम् । तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन वा शब्दपूर्वेण योगेनाधिगम्यत इत्येकेषामागमः । तथेतिहासेषु निदर्शनान्युपलभ्यन्ते—

गौरिव प्रैक्षरत्येका रसमुत्तमशालिनी ।
दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता ॥१॥
एतयोरन्तरं पश्य सूक्ष्मयोः स्पन्दमानयोः ।
प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति ॥२॥
अन्या त्वप्रेर्यमाणेव विना प्राणेन वर्तते ।
जायते हि ततः प्राणो वाचमाप्याययन्पुनः ॥३॥
प्राणेनाप्यायिता सेयं व्यवहारनिबन्धना ।
सर्वस्योच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥४॥
घोषिणी जातिनिर्घोषा अघोषा च प्रवर्तते ।
तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ॥५॥

(टी०) गताऽनुगृहीता । करणान्यभिघ्नतोऽस्य प्राणस्य स्थूला वृत्तिः । बुद्धौ पुनर्विशिष्टाकारपरिग्रहेण क्रमतः प्रत्यवभासमानः संहार उपलक्ष्यते । न चैतद्रूपं प्राणवृत्त्यनुग्रहमन्तरेणास्ति । क्रमसंहारभावेपि इति । यद्यप्येकबुद्धिनिष्ठत्वान्नास्ति क्रमः, तथापि व्यक्तया प्राणवृत्त्या तदानीमप्यस्ति परिग्रहोऽस्याः । स्वयमप्यस्योपांशुतरं पठतः तत्स्पष्टम् । पश्यन्तीमाह—प्रतिसंहृतक्रमा इति । यदा हि इदन्तया निरूपयति तदैकान्ततः क्रमाभावो वर्णानाम् । चलाचला इति । रूपादिषु विषयेष्ववर्वाग्दर्शनानां विक्षिप्तोत्पद्यते बुद्धिर्वागेव हि सा । प्रतिलब्धसमाधाना च इति । अविक्षिप्ता योगिनां शब्दपूर्वयोगेन समाहितत्वात् । आवृता इति । अपभ्रंशैर्वा समाकीर्णा तैरवष्टब्धा । विशुद्धा च इति । वाग्योगविदाम् । ते हि तामक्रमां वाचं वेदयन्ते । अपभ्रंशैर्वा विविक्तां यथा वैयाकरणाः । संनिविष्टज्ञेयाकारा इति । ज्ञेयाकारेण यथानुस्यूतं सदा ज्ञानं तथा शब्दोप्यर्थाकारेण । प्रविलीनाकारा इति । सद्भावेऽप्याकाराणां न तेऽवधार्यन्ते । तस्या एव हि सूक्ष्मत्वादनवधारणं किम्पुनस्तत्संनिविष्टाकाराणामिति प्रलयस्तेषाम् । परिच्छिन्नार्थेति । परस्परविरुद्धस्वभावा गवादयोर्थाः प्रत्यवभासन्ते यस्यां बुद्धौ । सकाशात्प्रकृता इव दृश्यन्त इति परिच्छिन्नाः ।

ततः सन्निविष्टज्ञेयाकारेति प्रथमे व्याख्याने शब्देऽर्थाकार उक्तः । इह तु ज्ञाने ज्ञेयाकारः । द्वितीये तु ग्राह्यांशसंभवः तत्र कथितः । सम्प्रति तु तथा प्रत्यवभासने ग्राहकरूपतोक्ता । मध्य-

१ गम्य—ट.
२ इत्येषा°— घ,ङ. नात्र वादिनः केचिद्विप्रतिपन्ना य एषामित्यनेन प्रत्यवमृश्येरन् ।
३ प्रचरत्येका—का०. व्यत्ययपपाठः.
४ स्थिता—ट.
५ स्वप्रमाणेव—का०. स्वापूर्यमाणैव—ट.
७ बन्धनम्—का०.
८ गौरिवेत्यादिर्गरीयसीत्यन्तः सन्दर्भः सर्वेपूदीच्येषु कोशेषु कारिकासु प्रक्षिप्तः । अयं च भारते आश्वमेधिके पर्वणि ब्राह्मणगीतासु द्वाविंशेऽध्याये महता

See p 126.11

* इति देहेन्द्रियसङ्घात उच्यते तत्र भवा वैखरीति निरवोचत् ॥ वाक् प्रयोक्तॄणां संबान्धिनी

* स्वप्रकाशा । वेद्यवेदकभेदातिक्रमात् । सूक्ष्मा दुर्लक्ष्या । अनपायिनी कालभेदास्पर्शादिति ॥

पुनश्चाह —

स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥१॥
केवलम्बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥२॥
अविभागा तु पश्यन्ती सर्वतःसंहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥३॥

(टी०) मायास्तु सकाशात्पूर्ववद्विशेषः । संसृष्टार्थप्रत्यवभासा इति । न हि तस्यां बुद्धिरूपायां पश्यन्त्यां पृथग्भावः शब्दार्थयोरिति सैव बुद्धिः संभिन्नरूपा प्रत्यवभासते इति । साध्वसाधुप्रविभागः इति । साध्वसाधू प्रविभज्येते अनेनेति लक्षणमुच्यते । व्यावहारिक्यां वाचि लक्षणं व्यवस्थितमिति । एकेषाम् इति । वैखर्यादिभेदमाख्याय तत्र व्यावहारिकीषु इत्यत आरभ्य व्यवहारातीतमिति यावदिदमेकेषां दर्शनम् । एतस्या एव इति । येयं वैखरी वाक् तस्यां संस्क्रियमाणायां सर्वा एव संस्कृता भवन्ति तज्जातीयकत्वात् ।

तथेतिहासेषु इति । भारते हि वासुदेवेनार्जुनस्यैतदुपदिश्यते । उत्तमशालिनी इति । उत्तमत्वेन शालत इति । उत्तमत्वं च तस्याः सर्वकारणत्वात् । शुचिस्मिता इति । स्मितं विकासः

१ विवृते—का०. अपपाठः । अभिहते—रामकपाठः.

Vr! has it!

२ बन्धिनी—का०

३ उपादानक्र०— क२,७,ख, का०. एषोपपाठः । विवरणग्रन्थोत्र मानम् ।

i.e. Vṛṣabha

४ सैषा—क४.५, का०.

५ स्थानेष्वित्यादिश्लोकत्रयं जयन्तभट्टेन न्यायमञ्जर्यां १०१, १०४ तमयोः पृष्ठयोः, वादिदेवसूरिणा च स्याद्वादरत्नाकरे (परि० १ । सू० ७॥) उदाहृतं यथातथं व्याख्यातं च चरमनिर्दिष्टेन । तद्यथा—

स्थानेष्विति ताल्वादिस्थानेषु । वायौ प्राणसंज्ञे । विधृतेऽभिघातार्थं निरुद्धे सति । कृतवर्णपरिग्रहेति हेतुद्वारेण विशेषणम् । ततः ककारादिवर्णरूपस्वीकारात् वैखरीसंज्ञा । वक्तृभिर्विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः (जयन्तस्तु—विखर यद्वा तेषां स्थानेषु । तस्याश्च प्राणवृत्तिरेव निबन्धनम् । तत्रैव निबद्धा सा तन्मयत्वादिति । या पुनरन्तः सङ्कल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते । तदुक्तम्—केवलम्बुद्ध्युपादानेत्यादि । अस्यार्थः—स्थूलां प्राणवृत्तिं हेतुत्वेन वैखरीवदनपेक्ष्य केवलं बुद्धिरेवोपादानं हेतुर्यस्याः सा प्राणस्थत्वात् क्रमरूपमनुपतति । अस्याश्च मनोभूमाववस्थानम् । वैखरीपश्यन्त्योर्मध्ये भावान्मध्यमा वागिति । या तु ग्राह्यग्राहकभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते । तदुक्तम् —अविभागा त्वित्यादि । अस्यार्थः—पश्यन्ती यस्यां वाच्यवाचकयोर्विभागेनावभासो नास्ति । सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देशकालकृतो यत्र । क्रमाविवर्तशक्तिस्तु विद्यते । स्वरूपज्योतिः

* ५ एष श्लोको वाराणसेये संग्रहे न पठितः।   * द्वेधे सम्भवो न प्रार्थते।

सेयमाकीर्यमाणापि नित्यमागन्तुकैर्मलैः।[1][2]

अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥४॥

तस्यां दृष्टस्वरूपायामधिकारो निवर्तते।

पुरुषे षोडशकले तामाहुरमृतां कलाम् ॥५॥

प्राप्तोपरागरूपा सा विप्लवैरनुषङ्गिभिः।

वैखरी सत्त्वमात्रेव गुणैर्न व्यवकीर्यते ॥६॥[3][4][5]

टी०—स च तयोः शुचिः। एकस्या भविष्यत्वादपरस्या भेदनिरूपणे विवृतत्वात्। **एतयोः** इति। उक्तवक्ष्यमाणे वाचावेकीकृत्य परामृशति। **अन्तरम्** इति। विशेषम्। **पश्य** इति। अर्जुन इत्युच्यते वासुदेवेन। **प्राणापानान्तरे** इति। अन्तरं छिद्रम्। तेन प्राणापानरहितायां बुद्धावेव प्रतितिष्ठति। मध्यमा सूक्ष्मप्राणवृत्त्यनुगता व्यक्तप्राणपरिग्रहेति पक्षेपि प्राणापानमध्ये प्राणस्थेत्येवं व्याख्येयम्। बुद्धिव्यतिरेकपक्षे च प्राणाधिष्ठानतास्त्येवेति। **आप्याययन्** इति। परिपोषयन्। स चायं पश्यन्तीप्रेरितो मध्यमां परिपुष्णाति। परिपोषश्च तस्याः श्रोत्रोपलभ्यस्वरूपनिष्पत्तिः। यदाह—**आप्यायिता** इति। सैव हि मध्यमा प्राणेन करणेषूपनिचिता श्रोत्रोपलभ्यतां याति वैखरी भवति। **विना प्राणेन वर्तते** इति मध्यमाकथनम्।

पुनर्मध्यमातो वैखर्या उत्पत्तिरित्याह—**जायते हि** इति। सा बुद्धिः प्राणं प्रेरयति स्वरूपनिविष्टस्य शब्दस्य करणे निवेशायेति पूर्ववत्सर्वम्। **घोषिणी** इति। घोषः सततं विद्यते यस्याः। का पुनः सेत्याह—**जातिनिर्घोषा** इति। वैखरीमाह। **अघोषा** इति पश्यन्तीमध्यमे उपात्ते।

स्थानेषु इति। उर आदिषु। **विधृते** इति। तत्र प्रतिघातात् विधृत इव सः। **स्वरूपज्योतिः** इति। स्वरूपप्रकाशनात्। यतो न स्वसम्बन्धिगतेन वा बुद्ध्यन्तरेण संवेद्यते। वैखर्यां स्वपरसंवेदनं प्रतीतमेव। मध्यमायां स्वसंवेदनमस्त्येव। परस्यापि अनुमानात्तत्र संवेदनाभिमानः। **सूक्ष्मा** इति। स्वसंवेद्यतयाऽतीन्द्रियत्वेन इति। **आकीर्यमाणापि** इति। संभिद्यमाना। **मलैः** इति। अपभ्रंशैः।

ननु च व्यवहारातीतत्वात् कथमपभ्रंशैः तस्याः संभेदः। उच्यते—वाग्विभागमजानन्तस्तामेव संकीर्णां पश्यन्ति। न हि तस्यां परिशुद्धाया मलमस्तीति। यथाह—**आगन्तुकैः** इति। अविद्याकल्पितैः। **कलेव** इति। चन्द्रस्य हि चतुर्दश कलाः सूर्येण प्रतिपद आरभ्याभिभूयन्ते। या त्वस्य पञ्चदशी कला साऽमावस्यायां सूर्येणैकीभावान्नाभिभूयते। भेदे ह्यभिभवितुरभिभाव्यस्य चैतद्भवतीति। एवं सा वागपभ्रंशैर्नाभिभूयते। **अधिकारः** इति। नियोगो बन्धाख्यः। यतो यन्नियुक्त इवाविद्यावशात्संसारे उत्पत्तिविनाशावनुभवन्नवतिष्ठते। **षोडशकले** इति। द्वे दर्शने सूर्यमयः पुरुषः सोममय इति च। सोममय इति दर्शनमङ्गीकृतमत्र। सोमश्च षोडशकल इति पुरुषोपि तथा।

१ सैषा संकीर्यमाणा°—का०, क२.४.५। सेयमापूर्य°—घ१.
२ °गन्तुभिर्म°—क२.७, ख.
३ मात्रेण—ट,ठ.
४ व्यतिकीर्यते—क२, ख.
५ स्थानेष्विव्यादिर्व्यवकीर्यते इत्यन्तो ग्रन्थः पुनश्चाहेति वाक्येनावतारितः पूर्वस्य स्वस्य च समानकर्तृकतां बोधयति। ब्राह्मणगीतास्वसतोप्यस्य भारतेऽन्यत्रो-

* ड॰ उभयमप्यसाधु।   * ५. ७।४।६५॥ इति पाणिनीयेन सूत्रेण निपातितमिदं रूपद्वयम्।
३ ° स्वभावज्ञैस्तु— ग १२.३.४.

सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण मनुष्येषु प्रत्यवभासते। तत्रापि चास्याः किञ्चिदेव व्यावहारिकम्, अन्यत्तु सामान्यव्यवहारातीतम्। आह च—

स्वत्वापि variant not recorded

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥[1] इति ॥

तस्याश्चासंकीर्णं वाचो रूपं कार्त्स्न्येन सामान्यविशेषवत्यस्मिँल्लक्षणे व्याकरणाख्ये निबद्धम्। अर्वाग्दर्शनानां तु पुरुषाणां प्रायेण सातिशयाः प्रतिघातिन्यः सापराधाः शक्तयः। निरपराधस्तु लक्षणप्रपञ्चवाननेकमार्गोऽयं शब्दानां प्रतिपत्त्युपायो[2] दर्शितः ॥१४३॥

तद्विभागाविभागाभ्यां क्रियमाणमवस्थितम्।

स्वभावज्ञैश्च[3] भावानां दृश्यन्ते शब्दशक्तयः ॥१४४॥

विभागो नाम परप्रतिपादनाय कल्पितः प्रकृतिप्रत्ययादिभेदः। तद्यथा। धातोस्तव्यदादय इति। तथा चोक्तम्—यत्तावदयं सामान्येन शक्नोत्युपदेष्टुं तत्तावदुपदिशति[4] इति। अविभागस्तु यत्र स्वरूपेणोच्चारणम्। तद्यथा। दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनीष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च[5]

टी०—**प्राप्तोपरागरूपा** इति। उपरज्यन्त एभिरित्युपरागा अपभ्रंशाः। प्राप्तमुपरागरूपं ययेति। **विप्लवैः** इति। विप्लवो ह्यसत्याभासेनार्थस्वरूपसंस्पर्शी। अपभ्रंशास्तु साधुस्वरूपासंस्पर्शिन उपप्लवस्थानीया बालैस्तथात्वेन गृहीता उपप्लवा उक्ताः। उपरागप्राप्तौ करणत्वात्तृतीया।

तदेवमागमं प्रमाणमुपन्यस्य प्रकृतमेव श्लोकं व्याचष्टे—यदुक्तमनेकतीर्थभेदेति। **सैषा त्रयी** इति। **तुरीयेण** इति। नामाख्यातादिभेदाच्चतुर्विधायामपि प्रत्येकं चतुर्थो भागो मनुष्येषु प्रकाशते। त्रयस्तु मनीषिणामेवेति। **सामान्यविशेषवति** इति। उत्सर्गापवादवति। **निबन्धनम्** इति। वैखर्याः स्वरूपं साक्षात्, पश्यन्तीमध्यमयोरपि पारम्पर्येण।

टी०—ननु साधूनां विशिष्टस्मरणपारम्पर्यादेव प्रतिपदपाठवत् साधुत्वमवधार्यते। किं व्याकरणेनेत्याह—**सातिशयाः** इति। **प्रतिघातिन्यः** इति। साधुशब्दज्ञानेऽप्रवृत्तिः प्रतिघातः। **सापराधाः** इति। साधूनामसाधुतया परिज्ञानात्। **अनेकमार्गः** इति। एवं ह्युक्तं—सर्ववेदपार्षदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्। बहुलमन्यतरस्यां विभाषेत्यादिग्रहणं तत इति, उत्सर्गापवादस्थान्यादेशादिभेदो वा ॥ १४३ ॥

तद् इति। व्याकरणम्। **क्रियमाणम्** इति। शास्त्रप्रबन्धाविच्छेदाद् वर्तमानकालता। तथा हि कृतानि करिष्यन्ते च क्रियन्ते चापराणीति। **बहुविभागानि** इति। बहुविभागाः प्रतिपदपठिताः,येषु व्याकरणेषु बहवः प्रतिपदं पठ्यन्ते। **प्रत्यक्षेण** इति। साधुशब्दे नानुमानिकी प्रतिपत्तिरपि

१ ऋक्० १।१६४।४५॥
२ उपायदर्शिता—घ। उपायं दर्शिता—
४ आद्यन्तौ टकितौ (१।१।४६॥) इति सूत्रभाष्ये।
५ ७।४।६५॥ इति पाणिनीयेन सूत्रेण

* °नापि— घ, ङ.   १० °वगम°— ङ. इदमसाधु.

न्साह्वान् इति । कानि चिद् व्याकरणानि बहुविभागानि बहून्प्रत्यक्षपक्षेण शब्दान् प्रतिपादयन्ति । कानि चित्तु विभज्यानुमानपक्षेण बहूनां समुदायानां प्रतिपादनं कुर्वन्ति । सैषा स्मृतिर्यथाकालं पुरुषशक्त्यपेक्षया तथा तथा व्यवस्थाप्यते । सन्ति तु साधुप्रयोगानुमेया एव शिष्टाः । सर्वज्ञेयेष्वप्रतिबद्धान्तःप्रकाशास्ते विशिष्टकालावधिप्रविभागां यथाकालं धर्माधर्मसाधनभावेन समन्वितां शब्दशक्तिमव्यभिचारेण पश्यन्ति ॥१४४॥

अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टैर्निबध्यमानां तु न व्यवच्छिद्यते स्मृतिः ॥१४५॥

ये शब्दप्रमाणका एव केवलं सर्वमेव शास्त्रप्रत्ययमदृष्टफलेष्वर्थेषु अभिशङ्कनीयत्वादप्रमाणं पुरुषस्य दर्शनमिति मन्यन्ते तेषां श्रुतिस्मृत्योरविच्छेदाविशेषे तुल्ये चोभयोरर्थस्य नित्यत्वे श्रुतिरव्यभिचरितस्वरवर्णानुपूर्व्यदेशकालनियमा न केनचित्कर्त्रा प्रकारान्तरेणावस्थापितपूर्वा सर्वकालं सर्वदेशेषु प्रतिचरणं विभागेन व्यवस्थापिता । स्मृतिस्तु नित्यमविच्छिद्यमानार्था गद्यश्लोकवाक्यादिभेदेन प्रतिकालमन्यथा शिष्टैरेव निबध्यते ।

(टी०) तु प्रतिपदपाठोऽयमेव समुदायः साधुरिति । पुरुषशक्त्यपेक्षया इति । ये महाशक्तयस्तानपेक्ष्य बहुविभागानि, अल्पशक्तीनपेक्ष्याल्पविभागानि ॥१४४॥

एवं स्मृतित्वाद् व्याकरणस्य प्रामाण्यमाख्याय प्रसङ्गादन्या अपि स्मृतीस्तन्मूलभूतां च श्रुतिं व्याचष्टे—अनादिम् इति । उत्पादाभावादेवाह—अव्यवच्छिन्नामिति । सैव तु कथमुत्पादरहितेत्याह—अकर्तृकाम् इति । अपदेशवचनमेतत् । कर्तुरभावादिति यावत् । स्मृतेर्हि सकर्तृत्वादुत्पादविच्छेदौ प्राप्नुत इत्याह—निबध्यमाना तु इति । तत्रापि पुनः पुनः शास्त्रकरणेन प्रबन्धाविच्छेद इति । ननु दृष्टा सूक्तादवगतिरन्वयव्यतिरेकाभ्यां च शब्दादवगतिरित्यत आह—अदृष्टफलेषु इति । धर्माधर्मादौ शब्दो न सूक्ष्मार्थप्रकाशनशक्तियोगः । कथं पुनरेवमित्याह—शास्त्रप्रत्ययम् इति । दर्शनम् इति । यो 'मन्यन्ते' इति शब्दः स इहापि संबध्यते । तन्त्रेणोपात्तत्वात् ।

ननु धर्माधर्मयोः प्रत्यक्षमपि कैश्चिदभ्युपगतं प्रामाण्येनेत्याह—अभिशङ्कनीयत्वात् इति । यतो रागाद्यनुगमः पुरुषेषु प्रायेण दृष्टः । अव्यभिचरितेति । स्वर उदात्तादिः । स नियतो वैदिकेषु

१. ६ । १ । १२॥ इति पाणिनीयेन सूत्रेण निपातितमिदं रूपद्वयम् ।
२ इति कीटवेधाल्लुप्तम्—ट.
३ हुतरं —घ, ङ.
४ साध्यभा° —घ२. इदमसाधु.
५ °मप्यवच्छिन्नां —का०. अपपाठः प्रमादपठितः.
७ इदं हेलाराजेन जातिसमुद्देशे ज्ञानमस्मद्विशिष्टानाम् इत्यादिश्लोकव्याख्यायां संगृहीतम् ।
८ परस्परदर्शन°—घ, ङ.
९ °पूर्वं देश°—घ, ङ. अत्र लेखकप्रमादादिना पाठभ्रंशः समजनीति स्पष्टम् । °पूर्व्यां देश°—ट.

* २ यासु – ट, ठ. टीकाकृतः पाठोऽङ्गीकृतः।
३ 'विच्छिद्यते (व्यवच्छिद्यते इति वा) घ, ङ.

तत्र केचिदाचार्या मन्यन्ते—न प्रकृत्या किंचित्कर्म दृष्टमदृष्टं वा । शास्त्रानुष्ठानात्तु केवलाद्धर्माभिव्यक्तिः । शास्त्रातिक्रमाच्च प्रत्यवाययोगः । येषामेव हि ब्राह्मणवधादीनां विषयान्तरे पातकत्वं तेषामेव विषयान्तरे प्रकृष्टाभ्युदयहेतुत्वं शास्त्रेण विधीयत इति ।

अन्ये तु मन्यन्ते—भावशक्तिमेव प्रतिनियतविषयां शास्त्रमनुवदति । को हि शास्त्रस्य क्रीडत इव कारणस्य पुरुषानुग्रहोपघाताभ्यामर्थः । शास्त्रस्वभावाभ्युपगमाद् द्रव्यस्वभावाभ्युपगम एव युक्ततरो दृश्यते । तथा हि दृष्टार्थासु चिकित्सादिषु स्मृतिषु विषौषधादीनामिवार्थक्रियासु सामर्थ्यमुपलभ्यते, न स्मृतिशास्त्राणाम् । तस्माच्छास्त्रस्वभाव इव पक्षान्तरे द्रव्यादिस्वभावोऽयं शास्त्रेणानूद्यते । यथैवोपघातनिमित्तान्यनुग्रहनिमित्तानि च लोके व्यवस्थितानि तथैव तत्प्रतिपत्त्युपायानामव्यविच्छेदेन व्यवस्था विद्यते[3] ॥१४५॥

अविभागाद्विवृत्तानामभिख्या स्वप्नवच्छ्रुतौ ।
भावतत्त्वं तु विज्ञाय लिङ्गेभ्यो विहिता स्मृतिः ॥१४६॥

येषां तावदियं नित्यैव लोकस्य विभागेन प्रवृत्तिर्नैव काचिद् युगमन्वन्तरव्यवस्था, नापि ब्रह्मणोऽसाधारणः कश्चिदहोरात्रप्रविभागो विद्यत इति दर्शनं

(टी०) तथा वर्णानुपूर्व्यम् । चतुष्पथे नाधीयीतेति देशनियमः । सन्ध्यायां नेति कालनियमः । सर्वकालं सर्वेषु देशेषु इति । कालतो देशतश्चानन्यथात्वं कथयति । गद्यश्लोकेति । सन्निवेशभेदेन । अन्यथा इति । स्वराद्यनियमः ।

एवं भेदमभिधाय धर्मं प्रति तयोर्दर्शनभेदमाह—किंचित्कर्म इति । पदार्थानां स्वत एवाभ्युदयाङ्गता स्थिता ।·········वस्तुत एकत्वे कार्यनानात्वं न भवेत् । ब्राह्मणवधादीनाम् इति । आदिशब्दात्सुरापानस्य । भावशक्तिम् इति । स्वभाव एषः, केवलमवबोधकं शास्त्रम् । येषामेव हीति चोद्यं परिहरति—प्रतिनियतविषयाम् इति । दृश्यते हि पदार्थानां सहकारिकारणवशात् शक्तिभेदः । को हि इति । यथेष्टचरणेऽभ्युदय इति किं न शास्त्रं प्रवृत्तं येन कस्य चित् प्रत्यवायो न भवेत् । कारणस्य इति । धर्माधर्मनिमित्तस्य । तत्रैतत्स्यात्—कस्यात्र पर्यनुयोगः । स्वभाव एष शब्दस्य यत्कर्तव्यतां चोदयति, अकर्तव्यतां च निवर्तयति । पदार्थपर्यनुयोगः किमर्थं न, ते व्यवस्थिता इत्याह—स्वभावेति । तुल्ये स्वभावाभ्युपगमे द्रव्यस्वभावाभ्युपगमो युक्तः । अन्यत्रापि दर्शनादिति । तथा हि दृष्टार्थासु इति । तस्मात् इति । यथा प्रथमपक्षे शास्त्रस्य स्वभावस्तथा द्वितीयपक्षे पदार्थस्वभावोऽपर्यनुयोज्यः । यथैव इति । यथा तेऽर्थाः स्वत एव विशिष्टशक्तियुक्ताः स्थिताः तथा तत्प्रतिपादक आगम इति ॥१४५॥

Not according to Rau

१ विषयान्तराभ्युदय°—ङ.
२ यास—ट, ठ. टीकाकृतः पाठोऽङ्गीकृतः ।
४ अविघाताद्वि°—क१, ख, का०. not to Rau
५ भिधा—क७, घ, ङ.

* उभयत्र विसर्जनीयविरहितः पाठः। *५ शाक्तिं- टीकापाठः. not necessarily

तेषामुक्तः श्रुतिस्मृतिप्रवृत्तिधर्मः पुरस्तादनन्तरे श्लोके। येषान्तु स्वप्नप्रबोधवृत्त्यो नित्यं विभक्तपुरुषानुकारितया कारणं प्रवर्तते तेषाम् ऋषयः के चित्प्रतिभात्मनि विवर्तन्ते,सत्तालक्षणं महान्तमात्मानमविद्यायोनिं पश्यन्तः प्रतिबोधेनाभिसंभवन्ति। के चित्तु विद्यायां विवर्तन्ते। ते मनोग्रन्थिमात्मानमाकाशादिषु भूतेषु प्रत्येकं समुदितेषु वा विशुद्धमनिबद्धपरिकल्पं तथैवाभिसंभवन्ति। तेषाञ्चागन्तुरविद्याव्यवहारः सर्व एवौपचारिकः, विद्यात्मकत्वं तु नित्यमनागन्तुकं मुख्यम्। ते च स्वप्न इवाश्रोत्रगम्यं शब्दं प्रज्ञयैव सर्वमाम्नायं सर्वभेदशक्तियुक्तमभिन्नशक्तियुक्तं च पश्यन्ति।

अर्थवच्छब्दानामपि नित्यतामाह—**अविभागात्** इति। अविभक्ताच्छक्तिशब्दब्रह्मणः······ विवर्तानामिति। ब्रह्मैव ऋषिरूपेण विवर्तत इति। **श्रुताविति**। वेदे। **स्वप्नवद्** इति। यथा स्वप्ने श्रोत्रनिरपेक्षमननुकृतबाह्यविषयं मानसं ज्ञानं भवति तथा तेषामृषीणां वेद इति। **लिङ्गेभ्यः** इति। वेदव्यवस्थितान्येव लिङ्गान्यवबुध्य। **विहिता** इति। उपनिबद्धा। कारिकोपन्यासफलं स्वयमेव विवरणे दर्शयिष्यति।

नित्यैव इति। येषामिदं दर्शनं यथैते पदार्थाः सम्प्रति विविक्तस्वभावाः तथा सर्वकालम्, न त्वेव कदाचिदविभागावस्था। **युगमन्वन्तरेति**। कृतादीनि द्वासप्ततिश्चतुर्युगानि। **असाधारणः** इति। चतुर्दश मन्वन्तराणि कल्पः, स ब्रह्मणोऽहोरात्रः। तत्र यो दिवसः स सर्गः, या रात्रिः स प्रलय इति येषामिदं दर्शनं नास्ति यथा मीमांसकानाम्। **स्वप्नप्रबोधवृत्त्या** इति। कृतादिविवर्तः प्रबोधवृत्तिः। प्रतिलयः स्वप्नवृत्तिः। **विभक्तपुरुषेति**।······अस्मिन्दर्शने आद्यन्तवत्त्वात् सर्गस्य विच्छेदः श्रुतिस्मृत्योः प्रतिपाद्य इति कारिकाफलम्। **प्रतिभात्मनि** इति। यदा प्रतिभा विवर्तते तदैवैक ऋषयस्तया सहैव विवर्तन्ते। एवं तर्हि प्रतिभात्मना सहेति वक्तव्यम्। किमुच्यते प्रतिभात्मनीति। प्रति······स्वभावा एते तया सहोत्पन्ना इति कथयति। प्रतिभात्मनीति ताद्रूप्ये सप्तमी। ऋषयो विवृत्तिकाले तां प्रतिभां सम्यगवबुध्यन्ते। तामेव प्रतिभां पर्यायैः स्वशास्त्रप्रसिद्धैः कथयति—**सत्तालक्षणाम्** इति। सत्तामाह। **अविद्यायोनिम्** इति। योऽयं विकारग्राम उत्तरः सोऽसत्यस्वभावोऽविद्यात्मकः, तस्येयं योनिः कारणमिति। **पश्यन्तः प्रबोधेन** इति। ते हि तां प्रतिभां पश्यन्तः संयुज्यन्ते प्रबोधेन। **विद्यायाम्** इति। यदेन्द्रियाणि विवर्तन्ते तदा तैः सह तद्रूपा एव विवर्तन्ते। मनसो ह्येकदेशो विद्या। तेषां चात्मा तत्स्वभावो विवर्तत इति विद्यायामित्युक्तम्। **मनोग्रन्थिम्** इति। मन एव ग्रन्थिः, दुर्मोचत्वात्। **आत्मानम्** इति। आत्मशब्दः स्वभाववाची। **अनिबद्धपरिकल्पम्** इति। परिकल्पोऽहंप्रत्ययविवर्तः। स च मनःस्वभावत्वात्तेषामात्मनि अनिबद्धः। स्वतो मन आकाशादिषु प्रत्येकं समुदितेषु चात्मपरिग्रहेणावतिष्ठमानं तत्राहङ्कारप्रत्ययं कुर्यात्। **तथैव** इति। यदुक्तं पूर्वत्र **प्रबोधेनेति**। प्रबोधेनेति मनोभिसंभवन्ति। **ते च** इति। ऋषयः।

१ इत्यतोनन्तरं 'नित्यं प्रबोधवृत्त्या' इत्यधिकम्—ङ.

२ विबोध—घ१, ङ। विभक्ति—घ २।

३ प्रविभागात्मनि - कोशः। टीकाकारेणाप्यतः पाठ एव साधुरिति स एवाश्रितः।

४ शक्तिम°—टीकापाठः. - Not necessarily

* विवक्षितत्वात्कर्तरि तिङ् शक्योऽवक्तुम्। ११ न प्रकृति- घ, ङ.

के चित्तु पुरुषानुग्रहोपघातविषयं तेषामर्थानां स्वभावमुपलभ्याम्नायेषु कचित्तद्विषयाणि लिङ्गानि दृष्ट्वा दृष्टादृष्टार्थां च स्मृतिमुपनिबध्नन्ति। श्रुतिं तु यथादर्शनमव्यभिचरितशब्दामेव प्रथममविभक्तां पुनः संगृहीतचरणविभागां समामनन्तीत्यागमः॥ १४६॥

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ॥१४७॥

यथैव हि शरीरे दोषशक्तिं रत्नौषधादिषु च दोषप्रतीकारसामर्थ्यं दृष्ट्वा चिकित्साशास्त्रमारब्धम्। रागादींश्च बुद्धेरुपप्लवानवगम्य तदुपघातहेतुज्ञानोपायभूतान्यध्यात्मशास्त्राणि उपनिबद्धानि। तथेदमपि साधूनां वाचः संस्काराणां ज्ञापनार्थमपभ्रंशानां चोपघातानां त्यागार्थं लक्षणमारब्धम्॥ १४७॥

कथंभूताः पुनरपभ्रंशाः—

शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥१४८॥

शब्दप्रकृतिरपभ्रंशः इति संग्रहकारः। नाप्रकृतिरपभ्रंशः स्वतन्त्रः कश्चिद्विद्यते। सर्वस्यैव हि साधुरेवापभ्रंशस्य प्रकृतिः। प्रसिद्धेस्तु रूढितामापद्यमानाः स्वातन्त्र्यमेव केचिदपभ्रंशा लभन्ते। तत्र गौरिति प्रयोक्तव्ये अशक्त्या प्रमादादिभिर्वा गाव्यादयस्तत्प्रकृतयोपभ्रंशाः प्रयुज्यन्ते। ते च सास्नादिमत्येव लब्धस्वरूपाः (टी०) **अश्रोत्रगम्यम्** इति। उपदेष्टुरन्यस्याभावात्। **प्रज्ञयैव** इति। शुद्धेन मनसा। **अभिन्नशक्तिं च** इति। यदनेकमप्येकं कर्म प्रकाशयति। यथोक्तम्—**सर्वशाखाप्रत्ययमेकं कर्म** इति। **प्रथमम्** इति। प्रथमतो विभागमन्तरेण पश्यन्ति श्रुतिम्। ततश्चरणविभागेनावस्थितां पश्यन्तीत्यागमः॥१४६॥

तदेवं श्रुतिस्मृतीनां च स्वरूपमाख्याय व्याकरणस्मृतेरन्याभिः स्मृतिभिस्तुल्यतामाह—**कायवाग्बुद्धिविषयाः**। ते हि मला अवस्थिताः पदार्थपरिच्छेदविरोधिनो बुद्धेः कालुष्यहेतव उपप्लवाः॥१४७॥

१ शब्दार्थौ—घ.

२ स्वगृहीत°—घ, ङ. इदमसाधु। संगृहीतमित्येव सुवचम्।

३ शास्त्रे—क २, ख, घ, ङ.

४ तथैव—घ, ङ. लेखकप्रमाद एवायम्।

५ शास्त्रै°—कोशः. अपार्थोपपाठः।

६ बध्नाति—घ, ङ. पूर्वत्र आरब्धम्, परत्र चारब्धमितिवदत्रापि कर्मणि भूते प्रयोग एव साधुः। कर्तृविशेषस्या-

७ निवृत्त्यर्थं—का०। ज्ञानार्थं—घ, ङ.

८ अलब्धगाधे गाम्भीर्याद् (२।४८१) इति श्लोकव्याख्यायां यदुक्तं पुण्यराजेन—तदेवं ब्रह्मकाण्डे 'कायवाग्बुद्धिविषया ये मलाः' इत्यादिश्लोकेन भाष्यकारप्रशंसोक्ता इति तद्विवरणग्रन्थेन तु लेशतोपि न समर्थ्यते।

९ शब्दसं°—ग१.३.४.

१० प्रयुयुक्षते—ग१.१.४., ट, ठ.

* ७ स्त्र—का०. व्यक्तमपपाठः।

साधुत्वं विजहति। अर्थान्तरे तु प्रयुज्यमानाः साधव एव विज्ञायन्ते। न ह्येतेषां रूपमात्रप्रतिबद्धमसाधुत्वम् ॥१४८॥

अश्वगोण्यादयः शब्दाः साधवो विषयान्तरे।
निमित्तभेदात्सर्वत्र साधुत्वं च व्यवस्थितम् ॥१४९॥

आवपने गोणीति स्वविप्रयोगाभिधाने चाश्व इत्येतयोरवस्थितं साधुत्वम्। तथा सास्नादिमति हेषितादिलिङ्गे च निमित्तान्तरात्प्रवृत्तावेतयोरन्यत्र विषये लब्धसंस्कारयोः साधुत्वमेव विज्ञायते। गोणी वेयं गौर्गोणीति बहुक्षीरधारणादिविषयादावपनत्वसामान्यादभिधीयते। तथाविद्यमानं स्वमस्य सोयमस्व इति। तस्माद्वस्त्वपरिगृहीतकारणं न किंचिन्नियतमस्ति यत्र साधुत्वमसाधुत्वं वा व्यवतिष्ठेत ॥१४९॥

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥१५०॥

अपभ्रंशा हि साधूनां शब्दानां विषये प्रयुज्यमाना यथैवाक्षिनिकोचादयः परिचयादुपगृहीतस्वरूपा इव प्रसिद्धास्तथा साधुप्रनाडिकयार्थं प्रत्याययन्ति। तत्र साक्षादभिधानं नेति श्लोकान्तरोपन्यासः ॥१५०॥

अथ कस्मादेते गोशब्दस्य गाव्यादयः पर्याया न विज्ञायन्ते। न हि शिष्टसमाचारप्रसिद्धैरन्यदेवंप्रकारेषु स्मृतिनिबन्धनेष्वर्थेषु निमित्तमभिधीयते। गाव्यादयश्चेत् पर्यायाः स्युरेतेपि शिष्टैर्लक्षणैरनुगम्येरन् प्रयुज्येरंश्च। यश्च प्रत्यक्षपक्षेण प्रयोजकेष्वभिधेयेषु प्रवर्तते स साधुः। साक्षात्तु प्रयोजकं वाच्यमर्थरूपं साधुभिः प्रत्याय्यते। तस्मादाह—

१ साधवश्च—घ१, ङ.

२ वाराणसेये संग्रहेऽयं ग्रन्थ उत्तरश्लोकमवतारयन्दृष्टः।

३ अश्व°—घ, ङ। यथा गो°—क२,ख। अथ गो°—क १.४.५.७

४ तु—का०.

५ अश्वजात्यभि°—ङ.

६ °लिङ्गेन—कोशः. नात्र तृतीयार्थो विवक्षित इति सप्तम्यन्तं पदं परिगृहीतम्।

७ स्त्र—का०. व्यक्तमपपाठः।

अर्थापर्यालोचनैवात्र प्रमादस्य प्रयोजिकाभूदिति विभावयामः।

८ साधुत्वा°—घ, ङ इदमसाधु।

९ °गम्यैव—घ, ङ. अयमपपाठः, मूलकोशेष्वदर्शनात्। किं च। नागेशोपि मञ्जूषायाम् 'उपगम्येव' इत्येव पठति व्याख्याति च यथा—इवशब्देन तदुपगमस्य भ्रमत्वं सूचितम्।

१० इति न धृतम्—ग १.२.३.४.

११ अतोनन्तरं 'गोशब्दतुल्यतया' इत्याधिकं वाराणसेये संग्रहे।

(Handwritten margin notes: "Not so recorded by Rau"; "= Kārikā mss"; "नन्तरं")

*३ शिक्षमाणोपभाषते—ग १.२.३.४) * ११ °मुपगताः—घ२। °मुपागता येन—ङ.

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः।
ते यतः स्मृतिशास्त्रेण तस्मात्साक्षादवाचकाः ॥१५१॥

इत्ययमुक्तार्थश्लोकः ॥१५१॥

अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः ॥१५२॥

बालो हि करणमात्रशक्तिवैकल्याद्यत्नवानपि साधुप्रयुयुक्षायामव्यक्तां श्रुतिं प्रयुङ्क्ते तदा प्रतिपत्तारस्तत्प्रकृतिं व्यक्तं शब्दमवधारयन्ति। तमेवार्थसम्बन्धिनं मन्यन्ते, न बालप्रयुक्तमपभ्रंशम् ॥१५२॥

एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते।
तेन साधुव्यवहितः कश्चिदर्थोभिधीयते ॥१५३॥

सङ्कीर्णार्थां वाचि साधुविषयेऽपशब्दाः प्रयुज्यन्ते। तैः शिष्टा लक्षणविदः साधून् प्रतिपद्यन्ते। तैरेव साधुभिस्तदर्थमभिधीयमानं पश्यन्ति। अनुमानस्तु धूम इवाग्नेरसाधुरितरेषाम् ॥१५३॥

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥१५४॥

इहाभ्यासात्स्त्रीशूद्रचाण्डालादिभिरपभ्रंशाः प्रयुज्यमानाः तथा प्रमाद्यत्सु वक्तृषु रूढिमुपागता येन तैरेव प्रसिद्धतरो व्यवहारः। सति च साधुप्रयोगात्संशये

१ न—क२.३.४.५.७, ख, घ, ङ. अस्य पाठस्य बहुत्र कोशेषूपलम्भो नास्य साधुत्वे मानम्। एवंपाठे समुच्चायकचकारोपेक्ष्यते। किं च। स्मृतिशास्त्रस्य कर्तृत्वेनोपादानं नाभिमतं भगवद्भर्तृहरेरित्यौपरिष्टात् 'शिष्टैर्लक्षणैरनुगम्येरन्' इति ग्रन्थात्प्रतीयते।

२ अम्बाम्बेति—ग १. २. ३. ४. यदयं कारिकायां कर्तुः स्वः पाठो न भवितुमर्हतीत्यत्र हरिकृतभाष्यटीकाया वक्ष्यमाणो ग्रन्थः प्रमाणम्—यथा अम्बाम्बेति शिक्षमाणो बालोऽन्यथोच्चारयति।

शिष्यमाणोपभाषते—क२, ख.

४ व्यक्तैर्—क २, ४, ५, ख। व्यक्तो—क १, घ, ङ.

५ निश्चितः—घ २.

६ योपशब्दः—का०.

७ इतः पूर्वम् 'अन्ये त्वपि च' इत्याधिकम्—घ, ङ.

८ निर्गुणेषु—का०. अपपाठः.

९ येन क४,५, ग२ घ, ङ,ट. । ये तु—क १.४. का० । इदमसाधु। तेषामित्यनेनाभिधातृप्रत्यवमर्श इष्ट इतिविवरणग्रन्थादवसीयते।

१० बालादि°—ट, ठ, का०.

(Handwritten margin notes: "Not in Rau"; "How about करणत्वेन? = as causing"; "According to Rau all kārikā mss. have a variation of this. No kārikā ms. has अम्बाम्बेति"; "This has a different syntax and अन्यथा"; "स्वस्तीति in AL"; "स्वास्विति—ms.")

* १२ विवक्षायां — घ, ङ.

यस्तस्यापभ्रंशस्तेन सम्प्रति निर्णयः क्रियते । तमेव चासाधुं वाचकं प्रत्यक्षपक्षे[1] मन्यन्ते । साधुं चानुमानपक्षे व्यवस्थापयन्ति ॥१५४॥

दैवी[2] वाग्व्यतिकीर्णेयमशक्तैरभिधातृभिः[3] ।
अनित्यदर्शिनां त्वस्मिन्वादे[4] बुद्धिविपर्ययः ॥१५५॥

श्रूयते पुराकल्पे स्वशरीरज्योतिषां[5] मनुष्याणां यथैवानृतादिभिरसङ्कीर्णा वागासीत्तथा सर्वैरपभ्रंशैः । सा तु सङ्कीर्यमाणा पूर्वदोषाभ्यासभावनानुषङ्गात्कालेन प्रकृतिरेव तेषां प्रयोक्तॄणां रूढिमुपागता । अनित्यवादिनस्तु ये साधूनां धर्महेतुत्वं न प्रतिपद्यन्ते, मल्लसमयादिसदृशीं साधुव्यवस्थां मन्यन्ते, ते प्रकृतौ भवं[6] प्राकृतं साधूनां शब्दानां समूहमाचक्षते । विकारस्तु पश्चाद् व्यवस्थापितः, यः [7]संभिन्नबुद्धिभिः पुरुषैः स्वरसंस्कारादिभिर्निर्णीयते[8] इति ॥१५५॥

उभयेषामविच्छेदादन्यशब्दविवक्षया[9][10] ।
योन्यः प्रयुज्यते शब्दो न सोर्थस्याभिधायकः ॥१५६॥[11]

येषामपि च नैव पुराकल्पो न च दैवी वागसङ्कीर्णा कदाचिदासीत्तेषामपि गम्यागम्यादिव्यवस्थावदियं साध्वसाधुव्यवस्था नित्यमविच्छेदेन शिष्टैः स्मर्यते । तत्रान्यशब्दविवक्षया[12] बालप्रलापवदर्थेषु प्रयुज्यमानो यः शब्दो रूढो यश्च न रूढः तावुभावप्यर्थस्य न वाचकौ भवतः । तत्र तु साधुव्यवहिता वा भवत्यर्थप्रतिपत्तिरभ्यासाद्वा प्रमत्तानामक्षिनिकोचादिवत्सम्प्रत्ययमात्रं जायते ॥१५६॥

इति श्रीहरिवृषभमहावैयाकरणविरचिते वाक्यपदीये
आगमसमुच्चयो नाम ब्रह्मकाण्डं समाप्तम् ॥

---

१ प्रत्यक्षं—घ, ङ.
२ देवी—क२.३.४.५.७, ख, ठ. (Not in Raw)
३ व्यवकीर्ण०—क२.३.४.५.७, ख. (Not in Raw)
४ तस्मिन्—ग१.३.४. । यस्मिन्—ख.
५ स्वशरीर०—घ१,ट,का. भ्रष्टः पाठः । अशरीर०—घ२,ठ.
६ इति नास्ति—घ । सर्वं—ङ । नायं साधुर्विन्यास इति यथामति शोधितः ।
७ यः स भिन्न०—घ, ङ । इदमसाध्विति साधूकृतम् ।
८ ०भिर्नयते—घ,ङ । ०भिर्नीयते—ट । ०भिर्निर्णीयते—ठ । ०भिर्न हीयते—घ२.
९ विच्छेदेप्य०—क२.३.४.५.७, ख.
१० ०प्यदव०—क२,ख.
११ इति न धृतम्—ग१.२.३.४.
१२ विवक्षायां—घ ङ

* अक्षरयोजका अनभिसन्धि बह्वपकुर्वन्तोऽपि मर्षणीया वराकाः ।

अशुद्धसंशोधनम्

पृष्ठे	पङ्क्तौ	शुद्धम्	अशुद्धम्
१२(उपोद्घाते)	८	०बन्धच्छेदि	बन्धच्छिदि (कोशस्थः पाठः)
८ (ग्रन्थे)	१	०पदीये	०पदीते
१५	२६	अष्टाङ्गत्वं	अष्टाङ्गत्वं
२३	१४	न्याय्यलिङ्ग०	न्यायलिङ्ग०
२४	२२	तिष्ठ	तिष्ट
२९	२९	स्थित	स्थति
३०	२४	एव	एवं
३३	११	सा	स
३६	९	यथागमं	यथागममं
३९	१	संस्कार०	सस्कार०
४२		वृत्त्यनुकारेण	वृत्यनुकारेण
४४	११	साधारणत्वात्	स्वाधारत्वात्(कोशस्थः पाठः)
५४	२०	हस्तस्पर्शात्	हस्तपर्शात्
७३	१९	इति ।	इति
७४	१	सर्वे	सर्व
७७	५	इति । तथा	इति । तथा
८८	१७	अथैतस्यैत्यादिटिप्पणम् अस्थाने निवेशितम् । असतश्चान्तराले इत्यनेन सम्बन्धनीयम् ।	
१०२	१६	परमाणवः	परमाणवो
१०४	२१	११५ (श्लोकाङ्कटीकायाम्)	११६
१०५	३०	११६ ,,	११७
१०८	२२	सन्दंशेनापि	सन्दंशेनपि
१११	४	सत्यपि ज्ञाने ।	सत्यापि ज्ञाने
११२	१२	प्रतिबद्धम्	बद्धम्
१२६	२५	अन्तः संनिवेशित्व०	अन्तसंनिवेशित्व०
१३२	१	दुष्टमदुष्टं	दृष्टमदृष्टं

ऊर्ध्वं पञ्चचत्वारिंशाच्छ्लोकादेकापकर्षेण श्लोकाङ्काः पठनीयाः । अनक्षरा

प्रथमकाण्डगतकारिकाद्यचरणानामकारादिवर्णानुक्रमेण सूची

	पृष्ठाङ्कः
अग्निशब्दस्तथैवायम्	६६
अजस्रवृत्तिर्यः शब्दः	१०४
अणवः सर्वशक्तित्वात्	१०२
अतीन्द्रियानसंवेद्यान्	५१
अतोऽनिर्ज्ञातरूपत्वात्	६४
अत्यन्तमतथाभूते	११७
अत्रातीतविपर्यासः	२८
अथर्वणामङ्गिरसाम्	२९
अथायमान्तरो ज्ञाता	१०३
अध्याहितकलां यस्य	११
अनवस्थितकम्पेपि	१०१
अनादिनिधनं ब्रह्म	१
अनादिमव्यवच्छिन्नाम्	१३१
अनेकव्यक्त्यभिव्यङ्ग्या	९३
अन्तःकरणतत्त्वस्य	१०३
अपि प्रयोक्तुरात्मानम्	११८
अपोद्धारपदार्था ये	३६
अम्बाम्बेति यथा बालः	१३६
अरणिस्थं यथा ज्योतिः	५७
अर्थप्रवृत्तितत्त्वानाम्	२५
अर्थोपसर्जनीभूतान्	६३
अल्पे महति वा शब्दे	९९
अवस्थादेशकालानाम्	४७
अविकारस्य शब्दस्य	९३
अविभागाद् विवृत्तानाम्	१३२
असतश्चान्तराले यान्	८६
अस्तं यातेपु वादेपु	१२०
अस्वगोण्यादयः शब्दाः	१३५
आण्डभावमिवापन्नः	६०

	पृष्ठाङ्कः
आत्मभेदस्तयोः केचित्	५६
आत्मरूपं यथा ज्ञाने	६०
आद्यः करणविन्यासः	११०
आविर्भूतप्रकाशानाम्	५१
आसन्नं ब्रह्मणस्तस्य	२२
इतिकर्त्तव्यता लोके	१०९
इदं पुण्यमिदं पापम्	५३
इदमाद्यं पदस्थानम्	२८
इन्द्रियस्यैव संस्कारः	८०
इन्द्रियस्यैव संस्कारः	८१
उच्चरन्परतन्त्रत्वात्	६७
उभयेपामविच्छेदात्	१३७
एकमेव यदाम्नातम्	९
एकस्य सर्वबीजस्य	१२
एवं साधौ प्रयोक्तव्ये	१३६
कायवाग्बुद्धिविपयाः	१३४
कार्यकारणभावेन	३६
कार्यत्वे नित्यतायां वा	७४
गुणः प्रकर्षहेतुर्यः	६८
ग्रहणग्राह्ययोः सिद्धा	९५
ग्राह्यत्वं ग्राहकत्वं च	६३
चक्षुषः प्राप्यकारित्वे	८१
चैतन्यमिव यश्चायम्	५३
ज्ञाने स्वाभाविके नार्थः	१२०
तत्रार्थवत्त्वात्प्रथमा	७०
तद् द्वारमपवर्गस्य	२७
तद्विभागाविभागाभ्याम्	१३०
तस्मादकृतकं शास्त्रम्	५४
तस्मादभिन्नकालेपु	९७

	पृष्ठाङ्कः
तस्माद्यः शब्दसंस्कारः	११८
तस्य कारणसामर्थ्यात्	१०२
तस्य प्राणे च या शक्तिः	१०५
तस्याभिधेयभावेन	६९
तस्यार्थवादरूपाणि	१७
ते लिङ्गैश्च स्वशब्दैश्च	३६
ते साधुष्वनुमानेन	१३५
दूरात्प्रभेव दीपस्य	१००
देशादिभिश्च सम्बन्धः	९४
दैवी वाग्व्यतिकीर्णेयम्	१३७
द्रव्याभिघातात्प्रचितौ	१००
द्वावुपादानशब्देपु	५५
धर्मस्य चाव्यवच्छिन्नाः	४६
न चागमादृते धर्मः	४६
न चानित्येष्वभिव्यक्तिः	९४
न जात्वकर्तृकं कश्चित्	११९
न वर्णव्यतिरेकेण	७५
न शिष्टैरनुगम्यन्ते	१३६
न सोस्ति प्रत्ययो लोके	१११
नादस्य क्रमजन्मत्वात्	५८
नादैराहितबीजायाम्	८४
नानर्थिकामिमां कश्चित्	४५
नित्यत्वे कृतकत्वे वा	४४
नित्याः शब्दार्थसम्बन्धाः	२९
निर्ज्ञातशक्तेर्द्रव्यस्य	४८
पदभेदेपि वर्णानाम्	७४
पदे न वर्णा विद्यन्ते	७६
परेपामसमाख्येयम्	५०
पारम्पर्यादपभ्रंशाः	१३६
प्रकाशकानां भेदांश्च	९६
प्रतिबिम्बं यथान्यत्र	५९
प्रत्यक्षमनुमानं च	५०

	पृष्ठाङ्कः
प्रत्ययैरनुपाख्येयैः	८६
प्रत्यस्तमितभेदायाः	१८
प्रत्येकं व्यञ्जका भिन्नाः	८९
प्रविभागे यथा कर्ता	११५
प्राक्संज्ञिनाभिसम्बन्धात्	७०
प्राप्तरूपविभागायाः	२३
प्राप्त्युपायोऽनुकारश्च	१३
भागवत्स्वपि तेष्वेव	९२
भिन्नं दर्शनमाश्रित्य	७९
भेदानां बहुमार्गत्वम्	१५
भेदानुकारो ज्ञानस्य	८७
भेदेनावगृहीतौ द्वौ	६५
यः संयोगविभागाभ्याम्	९८
यत्नेनानुमितोप्यर्थः	४९
यत्र वाचो निमित्तानि	२९
यथाद्यसंख्याग्रहणम्	८८
यथानुपूर्वीनियमः	९१
यथानुवाकः श्लोको वा	८२
यथा प्रयोक्तुः प्राग्बुद्धिः	६२
यथार्थजातयः सर्वाः	२८
यथैकबुद्धिविपया	६१
यथैव दर्शनैः पूर्वैः	९०
यथैपां तत्र सामर्थ्यम्	१२४
यदेकं प्रक्रियाभेदैः	२९
यो य उच्चार्यते शब्दः	६६
यो यस्य स्वमिव ज्ञानम्	५२
रूपादयो यथा दृष्टाः	१२४
लब्धक्रियः प्रयत्नेन	१०२
वाग्रूपता चेदुत्क्रामेत्	११२
वायोरणूनां ज्ञानस्य	१०२
वितर्कितः पुरा बुद्ध्या	५७
विधातुस्तस्य लोकानाम्	२१